92 F 12

MALATI AND MADHAVA:

A SANSCRIT DRAMA,

BY

BHAVABHUTI

WITH TRANSLATIONS OF THE PRAKITA PASSAGES AND SHORT EXPLANATORY NOTES WHERE NECESSARY,


EDITED BY

KAILASA CHANDRA DUTT,

CALCUTTA:

PRINTED AT THE KAVAYA PRAKASA PRESS.

1866.



Digitized by Google

Digitized by Google

मालतीमाधवम्।

नाम

प्रकरणम्।



महाकवि श्रीभवभूतिविरचितम्।

श्रीकैलासचन्द्र दत्तेन

संस्कृतम्।

आवश्यकप्राञ्जलानुवादेन

विषमपदव्याख्यया च सहितम्।

कलिकातायाम्

काव्यप्रकाशयन्त्रे

मुद्रितम्।

शकाब्दाः १७८८ ई० १८६६।

Digitized by Google

Digitized by Google

मालतीमाधवम्

नाम

प्रकरणम् ।



सानन्दं नन्दिहस्ताहतमुरजरवाकर्णितकौमारवर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे धूलपाणे
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः * ॥

---

* धूलपाणेः शिवस्य ताण्डवे नृत्ते नन्दी गणभेदस्तस्य हस्तेन व्याहृतस्य ताडितस्य मुरजस्य महेलस्य रवेणाहूतो यः कौमारवर्हिः कार्त्तिकेयमयूरः। कुमारः कौञ्चदारणः, मयूरोवर्हिणोवर्ही नीलकण्ठो भुजङ्गभुगित्यमरः । तस्य त्रासात् भयात् भोगः फणा कायोवा तस्य सङ्कोचोऽविकाशस्तं भजतीति तथोक्ते फणिपतौ नासाग्ररन्ध्रं सानन्दं विशतीति सति। नासात्र विनायकस्यैव, तस्यैव झटिति अग्ररन्ध्रप्राप्त्या जीवनप्रत्याशया आनन्दइति भावः । अतएव प्रवेशानन्तरमानन्द इति कथं क्रियाविशेषणमिति दोषानवकाशः। अग्ररन्ध्रस्य शीघ्रं प्राप्त्यैवानन्दातिशयात्। इह नासाग्ररन्ध्रमिति वक्तव्ये अग्रपदग्रहणं तस्य झटिति प्राप्त्या हर्षसूचनाय । नासाग्रपदत्वात् उक्तिपोषालङ्कारइति प्राचीनाः । यदाहुर्दण्डी 'उक्तिपोषः। क्वचिदाक्षेपलब्धस्य साक्षाच्छब्देन कीर्त्तनात्' इति। गण्डे उड्डीनाभिरलिमालाभिर्भ्रमरपङ्क्तिभिर्मुखरिताः सशब्दीकृताः ककुभोदिशोयाभिस्तास्तथा । चीत्कारो भीतकरिणां त्रासध्वनिस्तत्सहिताः साहित्यमात्रं वर्तयंतः । वैनायक्योगजाननसम्बन्धीयाः वदनविधुतयश्चिरं पान्तु । विधुतेरचेतनत्वेऽपि रक्षणकर्तृत्वं देवतानुभावादेवेति ।

Digitized by Google

अपिच । चूडापीडकपालसंकुलगलन्मन्दाकिनीवारयो *
विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासन्दिग्धसुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः ।।
अपिच । पक्ष्मालीपिङ्गलिम्नः कणदव तडितां यस्य कल्पाः समूहो
यस्मिन् ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव ।
अर्धिर्निष्टप्तचूडाग्न्यग्निगलितसुधासारझङ्कारिकोणं
तार्तीयीकं पुरारेस्तदवतु मदनश्लोषणं लोचनं वः ।।

नान्द्यन्ते सूत्रधारः ।

अलमतिविस्तरेण । पुरतोऽवलोक्य । आर्ये ! उदितभूयिष्ठ † एषभगवान्नशेषभुवनद्वीपदीपकल्पनस्तमुपतिष्ठे ‡ ।

प्रणम्य । कल्याणानां त्वमसि महसां भाजनं विघ्नमूर्त्ते !
धुर्य्यां लक्ष्मीमथ मयि भगं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ ! नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् ! भूयसे मङ्गलाय ।। §

---

* चूडायां य आपीडस्तीर्थस्रोता कपालगुम्फितेत्यर्थः । तस्याः कपालैः सङ्कुलं व्याप्तं गलन्मन्दाकिनीवारि यासु ताः । विद्युत्प्रायं विद्युत्प्रभम् ।

† उदितं भूयिष्ठं वक्तुं यस्य, यस्य वक्तुभागउदितइत्यर्थः ।

‡ उपतिष्ठे पूजयामि ।

§ कल्याणानां माङ्गलिकानां महसां तेजसामाभाजनं पात्रम् । धुर्य्यां नृत्यधुरन्धरां लक्ष्मीं सम्पत्तिं । अथेति समुच्चयार्थे । भगमतिशयेन धेहि आरोपय । भगमित्यत्र दृशमिति पाठः सम्यक् । धेहीत्यत्र देहीति पाठे ददस्वेत्यन्वयः ! यद्यत् पापमस्तीति शेषः । प्रतिजहि नाशय । भद्रं अदोषं नाम्नानुकूलमित्यर्थः । भद्रमभीष्टं । मङ्गलाय इति कर्म्मार्थे चतुर्थी । मङ्गलं कर्त्तुमिति वा ।

Digitized by Google

नेपथ्याभिमुखमवलोक्य । भारिष! सुविहितानि * रङ्गमङ्गलानि सन्निपतितश्च † भगवतः कालप्रियनाथस्य यात्राप्रसङ्गेन ‡ नानादिगन्तवास्तव्यो § महाजनसमाजः आदिष्टश्चास्मि विद्वज्जनपरिषदा, यथा, केनचिदपूर्वप्रकरणेन वयं विनोदयितव्या इति । तत्किमित्युदासते भरताः ‖ ।

प्रविश्य पारिपार्श्विकः । भाव! परिषन्निर्दिष्टगुणं ** प्रबन्धं नाधिगच्छामः ।

सूत्र । कतमे ते गुणास्तत्र वानुदाहरन्त्यार्य्या विदग्धाश्चाभगवन्तो भूमिदेवाश्च । ††

---

* सुविहितानि भक्तिश्रद्धाजनितानि ।

† रङ्गोन्मत्तं तदर्थं मङ्गलानि पूजादीनि । रङ्गोनृत्ये रणे क्षितावित्यमरः । सन्निपतितः सन्निहितः ।

‡ यात्राप्रसङ्गेनेति नृत्यकालसूचनम् ।

§ वास्तव्यो वासी । महाजनसमाजोविद्वद्गोष्ठी ।

‖ उदासते उदासीना भवन्ति भरता भटाः । भरतास्तु कुशीलवा इत्यमरः ।

** पारिपार्श्विकलक्षणं यथा भरते । सूत्रधारस्य पार्श्वे यः वचनं कुरुतेऽर्थिनां । काव्यार्थसूचनालापं स भवेत् पारिपार्श्विकइति । परिषदा प्रेक्षकेन । प्रेक्षकस्तु, 'यस्तुष्टे तुष्टिमायाति शोके शोकमुपैति च । क्रुद्धः क्रुद्धे भये भीतः स नाट्ये प्रेक्षकः स्मृत' इति भरतः ।

†† आर्य्याः आर्यजातीयाः कुलशीलादिमन्तः । यद्वा आरात् याता दूरं गता याम्यत्वादिदोषेभ्यइत्यार्य्याः । विदग्धा काव्यरसवशमनसइत्यर्थः । चतुःषष्टिकलाकुशलाइति वा । भिन्नाः पूज्याः । भगवन्तः स्मृतिधराः । यदाह 'देवास्त्र लिङ्गिनश्चैव नानाव्रतधराश्च ये भगवानिति ते वाच्या पुरुषाः स्त्रिय एव वा' इति ।

Digitized by Google

नटः ।

भूम्ना रसानां गहनाः प्रयोगाः सौहार्द्यहृद्यानि विचेष्टितानि ।
औद्धत्यमायोजितकामसूत्रं चित्रा कथा वाचि विदग्धता च ।।*

सूत्र । स्मृतं तर्हि ।

नटः । भाव! किमिव ।

सूत्र । अस्ति दक्षिणापथे विदर्भेषु पद्मनगरं नाम नगरं। तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः षड्ङ्गपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिनो † ब्राह्मणाब्रह्मवादिनः प्रतिवसन्तिस्म ।

---

* यत्र रसानां शृङ्गारादीनां भूम्ना प्राचुर्य्येण गहनाः गभीराः सहृदयमात्रग्राह्याः प्रयोगाः सन्तीति शेषः । यत्र सौहार्द्यहृद्यानि प्रेममनोज्ञानि विचेष्टितानि मालतीमाधवादेः परस्परव्यापाराः । यत्र आयोजितं विहितं कामसूत्रमनङ्गप्रयोगोयत्र तत् । एवम्भूतं औद्धत्यं नायकनायिकासखीत्वादिगुणमाहात्म्यमस्ति । यद्वा औद्धत्यं निजोत्कर्षपुरस्सरमन्यावज्ञाविष्करणं तच्चायोजितस्य समन्तात् कार्य्याभिमुखीकृतस्य कामस्य मन्मथेच्छायाः सूत्रं सूचकम् । यत्र चित्रा आश्चर्य्यजनिका कथा । कल्पितत्वादसमयत्वाच्चेति भावः । औद्धत्यं रागातिशयः, आयोजितं सम्बद्धं, कामसूत्रं वात्स्यायनादिवचनं, अनतिक्रान्तकामशास्त्रमित्यर्थ इति केचित् ।

† तित्तिरिणा प्रोक्तमिति तैत्तिरीयं यजुस्तदेषां कण्ठेऽस्तीति । तैत्तिरीयनामशाखापाठिनइत्यर्थः । काश्यपाः काश्यपगोत्राः । चरणगुरवश्चरणैश्छन्दोभिर्महान्तः । गुरवः क्रियां कृत्वा वेदाध्यापयितारः । सगुरु र्यः क्रियां कृत्वा वेदमन्यै प्रयच्छतीति स्मरणात् । षड्ङ्गपावना षड्भौ भोजनादिकर्म्मणि पावना अग्र्यभोजिनः पवित्रा वा 'अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः षड्ङ्गपावना' इति मनुः । यद्वा यजुषः पारगोयस्तु साम्नां यश्चापि पारगः, अथर्व्वशिरसोध्येता ब्राह्मणाः षड्ङ्गपावनइति ।

Digitized by Google

ते श्रोत्रियाख्यत्वविनिश्चयाय भूरि श्रुतं ग्राह्यतमाद्रियन्ते ।
दृष्टाय पूर्त्ताय च कर्म्मणेऽर्थान् दारानपत्याय, तपोऽर्थमायुः * ॥
तदामुष्यायणस्य तत्रभवतः सुष्टहीतनाम्नोभट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवोभट्टश्रीकण्ठपदलाञ्छनो, भवभूतिनामा, जातूकर्णीपुत्रः, कविर्निसर्गसौहृदेन भरतेषु स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान् यत्र खल्वियं वाचोयुक्तिः । †

"पवनः पावनस्त्रेता यस्य पञ्चाग्नयोऽष्टहे । सायं प्रातः प्रदीप्यन्ते स विप्रः पञ्चाग्नि-पावनः"। पञ्चाग्नयः पवनश्चावसथ्योऽग्निः पावनः सभ्योऽग्निः त्रेता दक्षिणाग्निर्गार्ह-पत्याहवनीयाख्यादिति पञ्चाग्निकाः । व्रतव्रताश्चान्द्रायणव्रतयोगिनः । सोमपीथिनः सोमयज्ञे सोमरसपायिनः उम्बरनामा उम्बरमुत्कर्षसूचकं कुलनाम येषां यद्वा उम्बरं प्रसिद्धं । प्रसिद्धौ उम्बरं विदुरिति विश्वः ।

* श्रोत्रियाश्छन्दोध्येतारः । यदाह, जन्मना ब्राह्मणोज्ञेयः संस्कारैर्द्विज-उच्यते । विद्यया स भवेद्विप्रस्त्रिभिः श्रोत्रियउच्यते । तत्त्वविनिश्चयाय ब्रह्म-तत्त्वनिरूपणाय भूरि प्रचुरं श्रुतमित्यन्वयः । भूरिश्रुतमित्यत्रे, बहुभ्यो बहुधा बहुभिः सदाभ्यस्तमित्यर्थः । दृष्टाय कर्म्मणे यागादिकाय, पूर्त्ताय कर्म्मणे खाता-दिकाय । यागादीनां धनसाध्यतया तेषां धनादयो नतु भोगायेतिभावः । अपत्याय दारान् पत्नीः तपोऽर्थमायुर्जीवनम् । नतु व्यसनाद्यर्थमितिभावः । आदिरन्त-दृति सर्वत्र योज्यं ।

† अमुष्मिन् कुले जातआमुष्यायणस्तस्य प्रसिद्धकुलोत्पन्नस्येत्यर्थः । प्रख्यानात् पितृकृत्यत्वमामुष्यायणशब्दस्यतदृति रत्नमाला । तत्रभवतः पूज्यस्य । पूज्ये तत्र-भवानत्रभवांश्च भगवानपीति क्षेमः । सुष्टहीतं शोभनोच्चारणं नाम यस्येति सुष्ट-हीतनाम्नः । भट्टसुतः भाट्टाभिधः । पवित्रा पुण्यपदा कीर्तिः कीर्तनं यस्य तस्य नीलकण्ठनाम्नः । श्रीः सरस्वती कण्ठे यस्य श्रीकण्ठदृति पदं लाञ्छनं चिह्नं यस्य । श्रीकण्ठपदोपाधिकइत्यर्थः । जातूकर्णगोत्रप्रसूता जातूकर्णी तस्याः पुत्रः जातू-कर्णीपुत्रः । एवम्भायगुणभूयसीं, भूम्ना रथानामित्यादिप्रायैर्गुणैरुपचिताम् । वाचो युक्तिर्वचनम् ।

Digitized by Google

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रतिनैष यत्नः । *
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्म्मा, †
कालोह्ययं निरवधिर्विपुला च पृथ्वी ॥

अपिच । यद्वेदाध्ययनं, तथोपनिषदां ‡ सांख्यस्य, योगस्य च
ज्ञानं, तत्कथनेन, किं न हि ततः कश्चिद्गुणोनाटके ।
यत्प्रौढ़त्वमुदारता च वचसां, यच्चार्थतो गौरवम्,
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्योः ॥

ततो, यदस्माकमर्पितं प्रियसुहृदाऽत्रभवता भवभूतिनाम्ना प्रकरणं स्वकृतमालतीमाधवं नाम, तदेतदेव तत्रभवतः कालप्रियनाथस्य पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः तत्सर्वकुशीलवाः सङ्गीतप्रयोगेण मत्समीहितसम्पादनाय प्रवर्तन्तां ।

---

* इह तावन्त्रिधा पुरुषाः । केचिदज्ञा एव केचिदद्वैतमतमग्नमनसः काव्यरसविरक्ताः इतरे सहृदयामोदिकाव्यरसिकाः । तत्राद्यान् प्रत्याह ये केचिदज्ञाः न इह प्रबन्धे अवज्ञां अवधीरणां प्रथयन्ति ख्यापयन्ति, ते किमपि किञ्चिदल्पं जानन्ति । यद्वा किंशब्दश्चार्थे । ते किं जानन्ति किन्तु न जानन्तीत्यर्थः । द्वितीयानाह । ये नाम वयमिकसुखविमुखा मुमुक्षवः, ते किमपि अवाङ्मनसगोचरं परं ब्रह्म जानन्ति ।

† समानधर्म्मा तुल्यगुणः । यदुत्पत्स्यते तं प्रत्येष यत्नइति शेषः ।

‡ अद्वैतप्रतिपादकोवेदभागउपनिषत् तद्ज्ञानं, योगः पातञ्जलशास्त्रं, तयोरध्ययनज्ञानयोः कथनेन किमपि तु न किमपीत्यर्थः । तेषां नाटकेऽनुपयोगादिति भावः । यत्प्रौढ़त्वं, वाक्यार्थे पदं, पदार्थे वाक्यं, तत्कृतिः, यदाह दण्डी "पदार्थे वाक्यरचनं वाक्यार्थेच पदाभिधा । प्रौढ़िर्व्यासस्समासौ च साभिप्रायत्वमस्य च" इति । उदारता विकटत्वं यस्मिन् सति पदानि जनो नत्वन्वीक्षेति मन्यते । अर्थतोगौरवं अनर्घ्यार्थता ।

Digitized by Google

नटः । स्मृत्वा । एवं क्रियते युष्मदादेशः किन्तु या यस्य युज्यते भूमिका, * तां खलु तथैव भावेन सर्वे वर्ण्याः पाठिताः, सौगतपारिव्राजिकायास्तु † कामन्दक्याः प्रथममूमिकांभावएवाधीते, तदन्तेवासिन्याश्चहमवलोकितायाः ।

सूत्र । ततः किं ।

नटः । ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कथं ?

सूत्र । मकरन्दकलहंसप्रवेशावसरे तत्सुविहितं ।

नटः । तर्हि तत्प्रसिद्धप्रयोगादेवात्रभवतः सामाजिकानुपास्महे ।

सूत्र । वाढं, एषोऽस्मि कामन्दकी संवृत्तः ।

नटः । अहमप्यवलोकिता । इति परिक्रम्य निष्क्रान्ताः ।

प्रस्तावना ।‡

ततः प्रविश्य रङ्गपट्टिकानेपथ्ये § कामन्दक्यवलोकिते प्रविशतः ।

कामन्दकी । वत्से अवलोकिते !

अवलोकिता । आणवेदु भअवदी ।

कामं । अपि नाम तयोःकल्याणिनोर्भूरिवसुदेवरातापत्य-

---

* भूमिका वेशपरिग्रहः । यदाह भरतः । "अन्यरूपैर्यदन्यस्य प्रवेशः सा तु भूमिका" ।

† सौगतस्य बौद्धस्य, अस्त्यपरिव्राजिका इत्यभिधीकी । एतादृशीदौत्ये प्रयुक्ता ।

‡ दृष्ट किंस्वरूपाप्रस्तावनेति नेक्षुटमवगम्यते कथोद्घातरूपेति तु यथं सम्भावयामः ।

§ रङ्गपट्टिका नेपथ्यमलङ्कारो यवोस्ते ।

Digitized by Google

योर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात् ? । वामाक्षिस्पन्दनं-सूचयित्वा * सहर्षं ।

विदूरतेव कल्याणमान्तरश्लेन चक्षुषा ।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते ।।

अव । महन्तो खलु भअवदीए एसोचित्तविक्खेवो । अच्चरीअं, अच्चरीअं, जं दानीं चीरचीवरपरिच्छदं पिण्डवादमेत्तपाणअन्तीं भअवदीं, ईदिसे आआसे, अमच्चभूरिवसू णिओएदि । तहिं उक्खण्डिदसंसारावग्गहो अप्पा तुम्हेहिं णिउज्जिवीअदि (१) ।

कामं । वत्से! मा मैवं ब्रूहि ।

यस्मां विधेयविषये सभवान्नियुङ्क्ते, †
स्नेहस्य तत्फलमसौ प्रणयस्य सारः ।
प्राणैस्तपोभिरथवाभिमतं मदीयैः,
कृत्यं घटेत सुहृदो, यदि तत्कृतं स्यात् ।।

अयि, किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादिगन्तवासिनां साहचर्यमासीत्, तदैव चास्मत्सौहार्दिनीसमच्च-

(१) महान् खलु भवत्याएव चित्तविक्षेपः । आश्चर्यमाश्चर्यं, यद्येदानीं चीरचीवरपरिच्छदां पिण्डपातमात्रप्राणयन्तीं भगवतीं ईदृशे आयासे अमात्यभूरिवसुर्नियोजयति । तत्तोत्खण्डितसंसारावग्रहात्मा युष्माभिर्नियुज्यते । चित्तविक्षेपोऽवधिषयाभिनिवेशः । चीरेण वल्कलखण्डेन चीवरं सौगतपरिव्राजकवासस्तदेव परिच्छदः परिकरोयस्यास्तां । चीरचीवरं जीर्णवस्त्रमिति केचित् । पिण्डपातो नाम बौद्धानां भिक्षान्नमात्रेण भोजनं । अवग्रहोमोक्षप्रतिबन्धरूपः ।

* स्त्रीणां वामाक्षस्फुरणस्य शकुनशास्त्रे शुभसूचकत्वेन निर्दिष्टत्वात् ।
† सभवान् पूज्यवचनार्थः ।

Digitized by Google

मनयोर्भूरिवसुदेवरातयोर्दत्तेयं प्रतिज्ञा, अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य इति । तदिदानीं विदर्भराजमन्त्रिणा सता देवरातेन, माधवं पुत्रमान्वीक्षिकी-* श्रवणाय, कुण्डिनपुरादिमां † पद्मावतीं प्रहिणुता ‡ सुविहितं ।

अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिश्च ।
अलोकसामान्यगुणस्तनूजः प्ररोचणार्थं प्रकटीकृतश्च ।।

अव। तदो, किंति मालदीं अमच्चो अप्पणा ण माहवस्स पडिवादेदि, जेण चोरिआविआहे भअवदीं तुवरावेदि ? (१)

कामं। तां याचते नरपतेर्न्मसुहृन्नन्दनो नृपमुखेन § ।
तत्प्राच्यात्प्रतिषेधः कोपाय शिवस्वयमुपायः ।।

अव। अच्चरीयं ! अच्चरीयं ! ण क्खु अमच्चो माहवस्स णामम्पि जाणादित्ति निरवेक्खदाए लक्खीअदि (२) ।

कामं। संवरणं हि तत् ।
विश्लेषतस्तु बालत्वात्तयोर्विदितभावयोः ।
तेन माधवमालत्योः कार्य्यः स्वमतिनिह्नवः ‖ ।।

---

(१) ततः किमिति मालतीममात्यो माधवस्यात्मना न प्रतिपादयति । येन चौरिकाविवाहे भगवतीं त्वरयति ।

(२) आश्चर्यमाश्चर्यं ! न खल्वमात्यो माधवस्य नामापि जानातीति निरवेक्षतया लक्ष्यते ।

---

* आन्वीक्षिकी न्यायशास्त्रं ।

† कुण्डिनपुरं विदर्भराजधानी ।

‡ प्रहिणुता प्रेषयता ।

§ स नन्दनसचिवस्तत्र कुपितस्त्रीप्रसादकदूतिरुद्दटः । नृपमुखेन राजद्वारा ।

‖ स्वमतिनिह्नवो निजज्ञानगोपनं । यथा तावपि प्रकृतं न जानीतस्तथाकृतं तेनेत्यर्थः ।

Digitized by Google

अपिच । अनुरागप्रवाहस्तु वत्सयोः सार्व्वलौकिकः ।
श्रेयोऽभ्युपायकमेवं * हि प्रतार्य्यौ राजनन्दनौ ।।

मम्म । यद्दिस्सुव्वंकारप्पणयरमणीयं व्यवहरन्,
पराभ्यूहस्थानान्यपि लघुतराणि स्थगयति † ।
अयं विद्वानेकः सकलमभिसन्धाय कपटै-
रटस्सः स्थानर्थान् घटयति, च मौनञ्च भजते ‡ ।।

अव । मएवि तुह्मवअणादो, तेण तेण वअणोवण्णासेण, भूरिवसुमन्दिरासण्णराअमग्गेण माहवो सञ्चारीअदि (१) ।

आर्या । कथितमेव नो मालतीधात्रेय्या लवङ्गिकया ।
भूयोभूयः सविधनगरीरथ्यया पर्य्यटन्तं
दृष्ट्वा, दृष्ट्वा, भवनवलभीतुङ्गवातायनस्था ।
साध्वात्कामं नवमिव रतिर्मालती माधवं व-
ल्गाढोत्कण्ठालुलितलुलितै रङ्गकैराव्यतीति § ।

अव । वाढं, जं तए वि उह्मवण्णाविणोदणिमित्तं माहवपडिच्छन्दअं आलिहिदं, तं लवङ्गिआए अज्ज मन्दारिआए हत्थे णिहिदं दाव (२)

---

(१) मयापि युष्मत्वचनात्तेन तेन वचनोपन्यासेन, भूरिवसुमन्दिरासन्नराजमार्गेण माधवः सञ्चार्यते ।

(२) वाढं, यत्तयायुष्कण्ठाविनोदनिमित्तं माधवप्रतिच्छन्दकमालिखितं

---

* तयोरन्योन्यानुरागादेव परिणयो दत्तः न मया कारितइति वक्तव्यं ।

† अभ्यूहस्थानानि तर्कस्थानानि ।

‡ मौनञ्च भजते, विधिनिषेधपरं वचो न वदतीत्यर्थः ।

§ अयं हरोपाख्यानन्दाह्लानरमुत्पन्नं । लुलितलुलितैरतिस्निग्धकान्तिभिः । ललितलुलितैरितिपाठे पूर्व्वं ललितैरधुना लुलितैर्म्लानैरित्यर्थः ।

Digitized by Google

कामं। विचिन्त्य। सुविहितं लवङ्गिकया, यतो, माधवानुचरः कल-हंसकस्तां विहारदासीं,* मन्दारिकां कामयते, दूत्यनेन तीर्थेन † तत्प्रतिबन्धकं माधवान्तिकमुपेयादित्यभिप्रायः।

अव। अज्ज, माहवोवि कोदूहलमुप्पादिअ, मए पउत्तम-अणमहूसवं मअणुज्जाणं पभादे अणुप्पेसिदो, तहिं किल मालदी गमिस्सदि, तदो अक्खोसदंसणं भोदुत्ति (१)।

कामं। साधु, वत्से, साधु, अनेन मत्प्रियाभियोगेन ‡ स्मार-यसि मे पूर्वाग्निव्यां सौदामिनीं।

अव। भअवदि! सा सौदामिणी अज्जआ, समासादिदभअव-दीअमन्तसिद्धिप्पहावा, सिरिअपव्वदे कावालिअव्वदं धारेदि (२)।

कामं। कुतः पुनरियं वार्त्ता ?

अव। अत्थि, एत्थ णअरे, महासमसाणप्पदेसे, कराला णाम कावालुक्का (३)।

तल्लवङ्गिकया अद्य मन्दारिकाबाहुल्ये निहितं तावत्। बाढं, अतितरा-मनुरक्ता मालतीत्यर्थः। प्रतिबन्धकं प्रतिहतिं।

(१) अद्य माधवोपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मदनोद्यानं प्रभातेऽनुप्रेषितस्तत्र किल मालती गमिष्यति, ततोऽन्योन्यदर्शनं भवतीति।

(२) भगवति! सा सौदामिनी अधुना समासादितार्द्धमन्त्रसिद्धिप्रभावा श्रीपर्वते कापालिकव्रतं धारयति।

(३) अस्त्यत्र नगरे महाश्मशानप्रदेशे कराला नाम कापालुक्का।

---

* विहारः सौगतपारिव्राजकानामालयस्तत्र व्यापृतादासी विहारदासी।

† तीर्थेन उपायेन।

‡ प्रिये प्रीतिविषये कार्ये, अभियोग आसङ्गः।

Digitized by Google

कामं। अस्ति, या किल विविधजीवोपहारप्रियेति * साङ्कसिकानां प्रवादः।

अव। तहिं क्खु, सिरिपव्वदादो आअदस्स, रत्तिविहारिणो णादिदूरारण्णवासिणो साहअस्स, मुण्डधारिणोऽघोरघण्टणामधेअस्स, अन्तेवासिणी महाप्पभावा कवालकुण्डलाणाम, अणुसव्भं समाअच्छदि, तदो दूअं पउत्ती (१)।

कामं। सर्व्वं सौदामिन्यां सम्भाव्यते।

अव। अलं दाव एदिणा। भअवदि! एसोवि सहअरो माहवस्स, वालमित्तो मअरंदो णाम, णंदणस्स वहिणिं मदअंतिअं जदि समुव्वहदि, तंपि णाम माहवस्स दुदीअंपिअं किदं भोदि (२)

कामं। नियुक्तैव मया तत्प्रियसखी तत्र बुद्धरक्षिता।

अव। सुविहिदं भअवदीए किदं।

कामं। विचिन्त्य। तदुत्तिष्ठ, माधवप्रवृत्तिमुपलभ्य, मालतीमेव पश्यावः।

इत्युभे उत्तिष्ठतः।

---

(१) तत्र खलु, श्रीपर्व्वतादागतस्य रात्रिविहारिणो नातिदूरारण्यवासिनः साधकस्य, मुण्डधारिणोऽघोरघण्टनामधेयस्य, अन्तेवासिनी महाप्रभावा कपालकुण्डला नाम, अनुसन्ध्यं समागच्छति, ततश्चयं प्रवृत्तिः। साधकस्य योगिनः। मुण्डधारिणः कापालिकस्य। प्रवृत्तिर्वार्त्ता।

(२) अलं तावदेतेन। भगवति! एषोपि सहचरो माधवस्य, बालमित्रं मकरन्दो नाम, नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति, तदपि माधवस्य द्वितीयं प्रियं कृतं भवति।

---

* विविधानां जीवानां मनुष्यादीनां उपहारा बलयः प्रिया यस्याः सा।

Digitized by Google

कामं । विचिन्त्य । अत्युदारप्रकृतिर्मालती, तन्निपुणं निरूढार्थ * दूतीकल्पस्तन्नयितव्यः । सर्व्वथा ।

प्रारब्धोत्सवाकान्तं कुमुदमिव तं नन्दयतु सा,
सुजातं कल्याणी भवतु कृतकृत्यः स च युवा ।
वरीयानन्योन्यप्रगुणगुण † निर्म्माणनिपुणो,
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ।।

इति निष्क्रान्ते विष्कम्भकः । ‡

ततः प्रविशति गृहीतचित्रोपकरणः कलहंसः ।

कल । कहिं दाणिं तुलिदमअरद्धअरूआवलेवविब्भमावच्छित्तमालदीहिअमाहप्पं, णाहमाहवं पेक्खिस्सं । परिक्रम्य । परिस्संतोम्हि, जाव दूइउज्जाणे मुहुत्तं विस्समिअ मअरंदसहअरं णाहमाहवं पेक्खिस्सं (१) ।

इति प्रविश्योपविशति ।

ततः प्रविशति मकरन्दः ॥

---

(१) कुत्रेदानीं तुलितमकरध्वजरूपावलेपविभ्रमावच्छिन्नमालतीहृदयमाहात्म्यं नाथमाधवं प्रेक्षिष्ये । परिश्रान्तोऽस्मि यावद्दूतीोद्याने मुहूर्त्तं विश्रम्य मकरन्दसहचरं नाथमाधवं प्रेक्षिष्ये । तुलितो मकरध्वजस्य कामस्य रूपावलेपो-रूपगर्व्वोयेन तथोक्तेन विभ्रमेण अवच्छिन्नं तिरस्कृतं मालतीहृदयस्य माहात्म्यं गाम्भीर्य्यं येन तं ।

---

* निरूढार्थः स्वयं प्रभोरनपेक्षयापि साधकः । तदुक्तं "विधाय यश्च सन्दिष्टं कार्य्यं पूर्व्वाविरोधि यत् । उत्तरं साधयेत्तच्च निरूढार्थं विदुर्बुधाः" ।

† प्रगुणा अनुरूपा उत्कृष्टा वा येगुणास्तेषां निर्म्माणे कुशलः । यद्वा प्रकृष्टोगुणोयेषां तेषां गुणनिर्म्माणनिपुणइति ।

‡ विष्कम्भकलक्षणं यथा, "इत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः" इत्यादि ।

Digitized by Google

मक० । कथितमवलोकितवा मदनोद्यानं गतो माधवइति, भवतु, तत्रैव गच्छामि । परिक्रम्य दृष्ट्वा च । अयं वयस्यइतएवाभिवर्त्तते । निरूप्य । अस्तु तु

गमनमलसं, शून्यादृष्टिः, शरीरमसौष्ठवं,
ध्वसितमधिकं, किं खेतन्स्यात्स्मरव्यथितोऽथवा ।
भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनं,
ललितमधुरा खे ते भावाः क्षिपन्ति च धीरतां * ॥

ततः प्रविशति यथानिर्दिष्टो माधवः ।

माधवः । खगतं † । तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य,
चेतः कथं कथमपि व्यपवर्त्तते मे ।
लज्जां विजित्य, विनयं विनिवार्य्य, धैर्य्य-
मुन्मथ्य, मन्थरविवेकमकाण्डएव ‡ ॥

---

* शून्या बाह्यार्थाग्राहिणी । शून्यादृष्टिः कृता चिन्तासंमोहप्रणयादिषु । तथा, निश्चला खगताच्च ध्यानाद्बाह्यमजल्पती, तथासमपुटोपेता शून्यादृष्टिरुदाहृतेत्यादिस्मरणात् । एतदलसगमनत्वादिकं रोगजं कामजमेवेति वितर्कइत्यर्थः । अथवा पक्षान्तरे कृतः कामात् किमन्यत् नान्यदित्यर्थः । निश्चयस्त्वेकमाह भवने कन्दर्पाज्ञा भ्रमति, सर्व्वजनमाक्रन्दति । विकर्त्तुं शीलमस्येति विकारि । पूर्व्वदशात्यागेन दशान्तरत्यागो विकारस्तद्योगि यौवनं च यन्त युवेत्यर्थः । प्रललितमधुराइति पाठे प्रलल्या स्वभावेन मधुरा रमणीवदनविभ्रमादयउद्दीपनाइत्यर्थः । इह नर्म्मस्फोटरूपा कौशिकी वृत्तिः । ‘नर्म्मस्फोटो भावलेशैः सूचिताल्परसोमत” इति साहित्यदर्पणः ।

† “यत्तु श्राव्यं न सर्व्वस्य, खगतं तदिहोच्यत” इति भरतः ।

‡ कथं महता लक्ष्येण । व्यपवर्त्तते निवर्त्तते, इन्दुसुन्दरेति गुणकीर्त्तनं, विभाव्येति चक्षुःप्रीतिः, कथमपीत्युद्वेगः, लज्जां विजित्येत्युन्मादः, मन्थरविवेकमिति जड़तेत्यनेकावस्थोक्ता ।

Digitized by Google

आश्चर्यं ! यद्विस्मयस्मितमनल्पितान्यभाव-
मानन्दमन्दममतत्रवनादिवाभूत् ।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्कारचुम्बितमिव * व्यथमानमास्ते ॥

मक० । सखे माधव, कृतदृतः ।

माध० । परिक्रम्य । कथं, प्रियवयस्यो मम मकरन्दः !

मक० । उपकृत्य । सखे, ललाटन्तप † स्तपति घर्मांशुस्तदस्मिन्नुद्याने मुहूर्त्तमुपविश्यावः ।

माध० । यथा प्रियवयस्याय रोचते । इत्युपावुपविशतः ।

मक० । दृष्ट्वा । कथं, मयरंदसहयरो इदं ज्जेव वासवउलुज्जाणं अलंकरेदि माहवो, ता दंसेमि, मयणवेअणाविहमाणमालदीलोअणसुहावहं अत्तणो मे पडिच्छंदअं । अहवा मुहुत्तं विस्सामसोक्खं दाव अणुहोदु । (१)

मक० । तदस्यैव तावदुच्छ्वसितकुसुमकेशरकषायशीतलामोदवासितोद्यानस्य माधवमाहपस्याधस्तादुपविश्यावः । तथाकृतः ।

मक० । वयस्य माधव ! अद्यैव तावत्मकलनगराङ्गनाजनप्रवर्त्तितमहोत्सवाभिरामनन्दनोद्यानयात्राभिनिवृत्तमन्यादृशं भवन्तमवधारयामि, अपि नाम मनागवतीर्णोऽसि रतिरमणबाणगोचरं ?

(१) कथं मकरन्दसहचरस्तदस्मिन्नेव वासवकुलोद्योनमलङ्करोति माधवस्तदर्थयामि मदनवेदनाखिद्यमानमालतीलोचनसुखावहमात्मनस्तस्य प्रतिछन्दकं । अथवा मुहूर्त्तं विश्रामसौख्यं तावदनुभवतु ।

* अङ्कारचुम्बितमङ्कारस्पृष्टं ।

† घटीखारीत्यादिना खञ् । खित्यव्ययादिति मुन् ।

Digitized by Google

माधवो लज्जयाधोमुखस्तिष्ठति ।

मक० । विहस्य । तत्किमवनतमुग्धमुखपुण्डरीकस्तिष्ठसि ?

पश्य । अन्येषु जन्तुषु रजस्तमसाहतेषु,
विश्वस्य धातरि समः परमेश्वरे च ।
सोऽयं प्रसिद्धविभवः किल चित्तजन्मा
मा लज्जया तव कथञ्चिदपच्युतिर्भूत् ।। *

माध० । वयस्य ! किं न कथयामि श्रूयतां । गतोऽहमवलोकिताजनितकौतुकः कामदेवायतनं, तत्रचेतस्ततः परिक्रम्यावलोक्य च परिश्रमादुल्लसितमदिरामोदमधुरपरिमलाकृष्टसकलमिलदलिपटलसंकुलमुकुलितबकुलमुकुलावलीमनोहराभरणरमणीयस्या † भ्रूनभुवो बालबकुलस्यालवालपरिसरे स्थितः । तस्य च यदृच्छया निरन्तरनिपतितानि कुसुमान्यादाय विदग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्धवानस्मि । अनन्तरञ्च संचारिणीव देवस्य मकरकेतोर्जगद्विजयवैजयन्तिका, निर्गत्य गर्भभवना‡दुज्ज्वलविदग्ध§मुग्धनेपथ्यविरचनाविभावितकुमारीभावा महानुभावप्रकृतिरत्युदारपरिजना कापि ततएवागतवती ।

---

* रजस्तमसाहतेषु रजस्तमोगुणाप्रधानेषु । तिर्यग्योनिष्विति केचित् व्याचक्षते । समस्तस्यव्यापारः । अतो लज्जांत्यक्त्वा कथयेतिभावः ।

† परिश्रमात् स्थितदृत्यन्वयः । नतुसाकाङ्क्षत्वादितिभावः । मदिरामोदवन्मधुरो मनोहरो यः परिमलः सुगन्धः ॥ स्याच्छुगन्धे परिमलदृति विश्वः । मदिरामोदेन मधुरदृति कश्चित् । तदा दोहदत्वान्मदिरासम्बन्धदृत्यर्थः । सङ्कुलं व्याप्तं ॥

‡ गर्भभवनं गर्भागारं, गर्भागारं वासगृहमित्यमरः ।

§ विदग्धया श्रेष्ठयया ।

Digitized by Google

सा रामणीयकनिधेरधिदेवता वा
सौन्दर्य्यसारसमुदायनिकेतनं वा ।
तस्याः, सखे ! नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः । *

अथ सा प्रणयिनीभिरनुचरीभिरविरलकुसुमसञ्चयावचयलीलादोहदिनीभि† रभ्यर्थ्यमाना, तमेव बालवकुलपादपोद्देशमागतवती, तस्याश्च कस्मिंश्चिदपि महाभागधेयजन्मनि बहुदिवसोपचीयमानमिव मन्मथव्यथाविकारसुखमलब्धवानस्मि ।

यतः । परिस्पन्दितमृणालीम्लानमङ्गं, प्रवृत्तिः,
कथमपि ‡ परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः § कपोलः ।।

---

* रामणीयकस्य मनोज्ञतायाः निधेराधारस्याधिदेवताधिष्ठात्री देवता । यद्वा रामणीयकमेव निधिस्तस्याधिष्ठात्री रक्षिका देवता । यद्वा रामणीयकं रूपादिसम्पत्तिः । अनेन श्लोकोक्ता । “ रूपयौवनलावण्यैरूपभोगोपबृंहितैरङ्गरत्नमकानां श्लोकेति परिकीर्त्तिताः” । सौन्दर्य्यसारसमुदायस्य कान्तिनिर्य्यासपूरस्य । एतेन कान्तिरुक्ता । अतोऽनयोर्भेदः । नियतं कारणं समवायिकारणं । चन्द्रोमुखस्य, सुधा अधरस्य, मृणालं भुजयोः, ज्योत्स्ना लावण्यादीनां । सर्व्वोपमाद्रव्यघटितेयमिति भावः । मदनएव वेधाः स्रष्टा । वेदजड़स्य पुराणस्य ब्रह्मयोनात्व निर्म्माणकौशलमिति भावः ।

† सञ्चयः समूहः, दोहदोऽभिलाषः । लीलादोहदिनीभिरित्यत्र लीलाकुतूहलाभिरिति क्वचित् पाठः । अत्र कस्मिंश्चिदिति पदेन अनुमानरूपा गर्भसन्धिरुक्ता, यदाहुः, “ध्याद्यतद्यापकज्ञानमनुमानमुदीरित” मिति । अन्यत्रच “ लिङ्गादूहोऽनुमानं ता” ।

‡ कथमपि प्रवृत्तिरित्यनेन विघ्ननिवृत्तिरुक्ता ।

§ क्षेदपाण्डुरित्यत्र क्षेदकान्तइति क्वचित्पाठः ।

Digitized by Google

सा मम प्रथमदर्शनच्छद्मात्प्रभृति अमृतवर्त्तिरिव चक्षुषो-
रतिशयानन्दमुत्पादयन्ती, अयस्कान्तमणिशलाकेव लोहधातु-
मन्तःकरणमाकृष्टवती, किं बहुना,

सन्तापसन्ततिमहाव्यसनाय तस्या-
मासक्तमेतदनपेक्षितहेतु चेतः ।
प्रायः शुभस्य विदधात्यशुभस्य जन्तोः,
सर्व्वंसहा भगवती भवितव्यतैव ।।

मक० । वयस्य माधव ! स्नेहश्च निमित्तसव्यपेक्षइति विप्रति-
षिद्धमेतत् ।

पद्म० । व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ।। *

ततस्ततः ।

माध० । ततश्च तत्र,

सभ्रूविलासमथ सोऽयमितीरयित्वा,
सप्रत्यभिज्ञमिव † मामवलोक्य तस्याः ।
अन्योन्यभावचतुरेण सखीजनेन,
मुक्ताश्चिरा स्मितसुधामधुराः कटाक्षाः ।

---

* कोऽपि निर्व्वचनीयः । पदार्थान् वस्तुनारीप्रभृतीन् व्यतिषजति वि-
शेषतो योजयति बहिरुपाधीन् बाह्यहेतून् सौन्दर्य्यादीन् । तीव्रकरोदये कोमल-
कमलदलविकाशादच्छतकरोदये पाषाणदारणाच्च हेतोः सहजसिद्धत्वमनुभवते ।
प्रकृतेश्च स्वाभाविकः स्नेहइति भावः ।

† सप्रत्यभिज्ञमिव पूर्व्वदृष्टमिव ।

Digitized by Google

मक । स्वगतं । कथं प्रत्यभिज्ञापि नाम ?

माध । अथ ताः सलीलमुक्तालकरकमललालितताल्लिकातरल-वलयावलीकमुक्तस्खलन्तकलहंसविभ्रमाभिरामचरणसञ्चरणझण-झणायमानमञ्जीरमञ्जुशिञ्जितानुविद्धमेखलाकलापकिङ्किणीर-णत्कारमुखरं * प्रतिनिवृत्य भर्तृदारिके ! † दिष्ट्या वर्द्धामहे, यदत्रैव कोऽपि कस्यापि तिष्ठतीति मामङ्कुलीदलविलासेनाख्या-तवत्यः ।

मक । स्वगतं । हन्त, महतः प्रागनुरागस्योद्भेदः !

कल । आकर्ण्य । कथं, सरसरमणीआणुबन्धिणी दूतीअणकधा ?

मक । ततस्ततः ।

माध । अत्रान्तरे किमपि वाग्विभवातिदृप्तं ‡

वैचित्र्यसुल्लसितविभ्रमसुन्दराख्याः ।

तङ्कूरिसात्विकविकारमपास्तधैर्य-

माचार्यकं विजयि मान्मथमाविरासीत् ॥

ततश्च । स्मितविकसितानासुल्लसद्भ्रूलतानां,

मसृणमुकुलितानां प्रान्तविस्तारभाजां ।

---

* सलीलं सविलासचेष्टितं प्रतिनिवृत्येत्यन्वयः । मञ्जुर्मनोज्ञो मञ्जीरो नूपुरः । शिञ्जितानुविद्धः शब्दानुगतः । कलापोरुच्छः । यद्वा मेखलाच कलापश्च तयोः किङ्किणी क्षुद्रघण्टिका । " मेखलाच कलापश्च भवेच्छ्रोणिविभूषणं, एकयष्टिर्भ-वेत् काञ्ची, मेखलात्यष्टयष्टिका, रसना षोड़शी श्रेया, कलापः पञ्चविंशति" रिति-स्मरणात् ।

† राजा भट्टारकोदेवस्तत्सुता भर्तृदारिकेत्यमरः राजपदमीश्वरमात्परं तेनामात्यकन्यापि भर्तृदारिकेत्युच्यतइत्यवधेयं ।

‡ वाग्विभवातिदृप्तं वचनप्रपञ्चातिगर्वितं वैचित्र्यं यस्य तत् ।

Digitized by Google

प्रतिनयवनिपाते किञ्चिदाकुञ्चितानां,
विविधमङ्गमभूवं पात्रसालोकितानां ।। *

तैश्च । अलसवलितमुग्धस्निग्धनिष्यन्दमन्दै-
रधिकविकसदन्तर्भिन्नसायम्भरैतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं क्षीतसुन्मूलितञ्च ।। †

एवमहन्तु तस्याः सर्व्वाकारहृदयङ्गमायाः संभाव्यमानस्नेहरसेनाभिसन्धिना विधेयीकृतोऽपि पारिप्लवत्वं ‡ मालतीप्रतिनिक्षोतुकामः, प्राक्प्रस्तुतस्य बकुलदाम्नो यत्नाकथञ्चि § दवशेषंग्रथितवानेव, ततोमिलितवेत्रयष्टिपाणिवर्षवरप्रायपुरुषपरिवारा, गजवधूमारुह्य, नगरगामिनं मार्गमिन्दुवदनालङ्कृतवती ।

तदा च । यान्त्या मुहुर्व्वलितकन्धरमाननम्र-
दाक्षिप्तदृष्टि ॥ मृतपतनिभं वहन्त्या ।
दिग्धोऽमृतेन च, विषेण च, पक्ष्मलाक्ष्या,
गाढं निखात इव मे हृदये कटाक्षः ।।

ततः प्रभृति

---

* अत्र नर्म्मस्फोटरूपा कौशिकीवृत्तिः । यदाह भरतः कन्यानायकयोश्चेष्टास्फुटीभवति यत्र्युतः । नर्म्मस्फोटनमिच्छन्ति ।

† लज्जया अलसैर्मन्दैः कौतुकेन वलितैः । यद्वा अलसं वलितैरिति । अथ मुकुलनेन मुग्धैः रम्यैः प्रीत्या स्निग्धैः रूपदर्शनाद्भुतचित्तानां निष्यन्दैरनिमेषैः । अथ विषादान्मन्दैरित्यर्थः । अपविद्धं क्षिप्तं पराभूतमिति यावत् ।

‡ पारिप्लवत्वं चञ्चल्यं । चञ्चलन्नरलश्चैव पारिप्लवपरिप्लवत्वरः ।

§ चेतसस्तदपहृतत्वादिति भावः ।

॥ आदृत्तदन्तं आवर्जितनालं ।

Digitized by Google

परिच्छेदातीतः * सकलवचनानामविषयः, (ख)
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसाद्युपचितमहामोहमहनो-
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ॥

अपिच । परिच्छेदव्यक्तिर्भवति न पुरःस्थेऽपि विषये,
भवत्यभ्यासेऽपि स्मरणमनसोर्भावविरसं ।
न सन्तापश्छेदो हिमसरसि वा चन्द्रमसि वा
मनोनिष्ठाशून्यं भवति, च किमप्याखिलति च ॥ †

कथं । दृढं खलु, एसोक्खएवि अवहरिदो, अपि नाम मालत्येव सा भवेत् ? (१)

मक । सगतं । अहो ! अभिव्यङ्ग्यं, तत्किं निषेधयामि सुहृदं । अथवा । मामूसुहृत् खलु भवन्मदनव्यजन्मा,
मा ते कलीमसविकारघना मतिर्भूत् ।
इत्यादि नन्विह निरर्थकमेव यस्मा-
त्कामस्य तृप्तिरगुणो, नवयौवनञ्च ‡ ।

प्रकाशं । अपि बयस्येन विदिते तदन्यसमागमो ?

साध । सखे ! श्रूयतां, अथ तस्याः करेणुकारोहणसमयएव

(१) दृढं खल्वेष कथाप्यपहृतः, अपि नाम मालत्येव सा भवेत् ।

* इयत्तातिक्रान्तः । (ख) निर्वक्तुमशक्यः ।

† यद्विज्ञेऽपि घटादौ परिच्छेदव्यक्तिर्निर्णयाभिव्यक्तिर्न भवति । समीपवर्त्तिनं घटादिकमपि निर्णेतुं न शक्नोतीत्यर्थः । अनेन बाह्येन्द्रियाणां विषयव्याकृतिरुक्ता । निष्ठाशून्यं स्थैर्यरहितं ।

‡ इत्यादि निषेधवाक्यं । यतः कामोतृप्तिगुणः, नवयौवनञ्च तृप्तिगुणं प्रकाशितरूपादिकमित्यर्थः ।

Digitized by Google

महतः सखीकदम्बकादन्यतमा वारयोषिद्विलम्ब्य, बालबकुल-कुसुमावचयक्रमेण नेदीयसी भूत्वा, प्रणम्य, कुसुमापीडव्याजेन मामेवमुक्तवती, महाभाग ! सुश्लिष्टगुणतया रमणीयएष वः सुमनसां सन्निवेशः, कुतूहलिनी च नो भर्तृदारिका वर्त्तते, तस्यामभिनवो विचित्रः कुसुमेषुव्यापारस्तद्भवतु कृतार्थता वैदग्ध्यस्य, फलतु निर्म्माणरमणीयता विधातुरासादयतु सरसएष भर्तृदारिकायां कण्ठावलम्बनमहार्य्यतामिति ।

मकरन्दः । अहो ! वैदग्ध्यं ।

माध । तया च मदनुमुक्तया समाख्यातमियममात्यभूरिवसोः प्रसूतिर्म्मालती नाम, अहञ्च प्रसादभूमिर्भर्तृदारिकायाः धात्रेयिका, लवङ्गिका नामेति ।

कल । सहर्षं । किं णाम मालदीत्ति ? दिट्ठिआ विलसिदं खलु भअवदा देवेण कुसुमाउहेण, ता जिदं अम्हेहिं (१) ।

मक । अमात्यभूरिवसोरालजेत्यपर्य्यायनिर्व्यूढनामस्य ।

अपिच । मालती मालतीति मोदते भगवती कामन्दकी, ताञ्च किल राजा नन्दनाय प्रार्थयतइति किंवदन्ती श्रूयते ।

माध । तया चाहमभ्यर्थमानस्तां बकुलमालामात्मनः कण्ठादवतार्य्य दत्तवान् असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविह्वलतया विषमविरचितैकभागान्तामेव बहु मन्यमानां मह्यानयं प्रसादइति व्याकृत्य गृहीतवती, अनन्तरञ्च यात्राभङ्गप्रचलितस्य महतः पौरजनस्य संकुलेन विघटितायां तस्यामागतोऽस्मि ।

---

(१) किं नाम मालतीति ? दिष्ट्या विलसितं खलु भगवता देवेन कुसुमायुधेन, तज्जितमस्माभिः ।

Digitized by Google

मक । वयस्य ! मालत्या अपि स्नेहदर्शनान्नुन्निष्टमेतत्, योऽपि हि कपोलपाण्डुतादिसूचितःप्राक्प्रदृब्धस्तस्याः कामाभिष्वङ्गः, सोऽपि त्वन्निबन्धनदूत्यभिव्यक्तमेवैतत्, एतत्तु न ज्ञायते, क्व दृष्टपूर्व्वस्तया वयस्य इति, न खलु तादृश्यो महाभागधेयाः कुमार्य्योऽन्यत्रासक्तमनसोभूत्वान्यत्र चक्षूरागिण्यो भवन्ति ।

अपिच ।

अन्योन्यसन्निबद्धां सखीनां तस्यास्त्वयि प्रागनुरागसिद्धिं ।
कस्यापि कोऽपीति निवेदितस्य धात्रेयिकायाश्चतुरं वचश्च ॥

कल । उपसृत्य । एदं चित्तफलअं । इति चित्रफलकं दर्शयति । उभौ पश्यतः ।

मक । कलहंसक! केनैतन्माधवस्य प्रतिबिम्बमभिलिखितं ?

कल । जेणज्जेव्व से हिअअं अवहरिदं (१) ।

मक । अपि मालत्या ?

कल । अधरं ।

माध । वयस्य मकरन्द ! प्रसन्नप्रायस्ते वितर्कः ।

मक । कलहंसक ! कुतोऽस्याधिगमः ?

कल । मए दाव मन्दारिआए हत्थादो, तएवि अवक्किआसआसादो (२) ।

मक । अथ किमाह मन्दारिका माधवालेखप्रयोजनं मालत्याः?

कल । उक्कण्ठाविणोदोत्ति (३) ।

---

(१) येनैवास्य हृदयमपहृतं ।

(२) मया तावन्मन्दारिकाया हस्तात्तवापि त्वदवष्टम्भकाशात् ।

(३) उत्कण्ठाविनोद इति ।

Digitized by Google

मक० । वयस्य माधव! सर्व्वथा समाश्वसिहि ।

या कौमुदी नयनयोर्भवतः सुजन्मा,
तस्या भवानपि मनोरथबन्धुबन्धुः । *
तत्सङ्गमं प्रति सखे ! न हि संशयोऽस्ति,
यस्मिन्विधिश्च महांश्च कृताभियोगः ।।

द्रष्टव्यस्वरूपा च भवतो विकारहेतुस्तदहमेव लिख्यतां मालती।

माध० । यदभिरुचितं वयस्याय, तदुपनय चित्रफलकं चित्रवर्त्तिकाश्च । मकरन्दं उपनयति ।

माध० । लिखन् । सखे मकरन्द !

वारम्वारं तिरयति दृशोरुद्गमं वाष्पपूर-
स्तत्सङ्कल्पोपहितजडिमस्तम्भ † मभ्येति गात्रं ।
सद्यः खिद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः,
पाणिर्लेखाविधिषु नितरां वर्त्तते, किङ्करोमि ।।

तथापि व्यवसितोऽस्मि । चिरादभिलिख्य प्रदर्शयति ।

मक० । विलोक्य । उपपन्नस्तावदत्र भवतोऽभिप्रायः । वयौत्सुक्यं । कथमचिरेणैव निर्म्माय लिखितः श्लोकः । वाचयति ।

जगति जयिनस्ते भावा भवेन्दुकलादयः,
प्रकृतिमधुराः सन्त्येवान्ये मनोमदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका,
नयनविषयं जन्मन्येकः सएव महोत्सवः ।।

---

* मनोरथबन्धुर्मनोरथनिबन्धनाय प्रियः ।

† तस्याः सङ्कल्पेनानुध्यानेनोपहितो जडिमा सर्व्वकार्य्याप्रतिपत्तिर्यस्य तत् । स्तब्धं निश्चलं ।

Digitized by Google

प्रविश्य सत्वरं मन्दारिका। कलहंसअ! पदाणुसारेण उअलब्भोसि । माधवमकरन्दौ दृष्ट्वा सलज्जं। कधं, तेवि महाणुभावा दूअजेव्व ? (१)।

उपसृत्य प्रणमति ।

उभौ । मन्दारिके! दृष्टास्तां ।

मन्दा । उपविश्य । कलहंसअ! उवणेहि मे चित्तफलअं ।

कल । गृहीत्वा । गेण्ह एदं ।

मन्दा । विलोक्य । कलहंसअ ! केण उण, किंणिमित्तं वा, एत्थ मालदी आलिहिदा ? ।

कल । जो जेव्व जंणिमित्तं मालदीए (२) ।

मन्दा । सहर्षं । दिट्ठिआ दंसिदफलं दाणिं विण्णाणं पआवदूणो (३) ।

मक । मन्दारिके ! यदत्र वस्तुनि एष ते वल्लभः कथयति, अपि तथा तत् ?

मन्दा । महाभाअ ! अधदं ।

मक । क्व पुनर्मालती माधवं प्राग्दृष्टवती ?

मन्दा । लवङ्गिआ भणाहि, वादाअणगदोत्ति ।

मक । वयस्य! नन्वमात्यभवनासन्नरथ्ययैव बद्धग्रः सञ्चरावहे, तदुपपन्नमेतत् ।

मन्दा । अणुमण्णन्तु मं महाणुभावा, जाव एअं भअवदो देवस्स मअणस्स सुचरिदं पिअसहीए लवङ्गिआए णिवेदेमि।(४)

(१) कलहंसक ! पदानुसारेणोपलब्धोसि । कथं तावपि महानुभावावत्रैव ?

(२) य एव यन्निमित्तं मालत्या ।

(३) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः ।

(४) अनुमन्येतां मां महानुभावौ, यावदिदं भगवतो देवस्य मदनस्य सुचरितं प्रियसख्या लवङ्गिकाया निवेदयामि ।

Digitized by Google

मक। प्राप्तावसरमेतङ्गवत्याः। मन्दारिका चित्रफलकं गृहीत्वा निष्क्रान्ता।

मक। वयस्य! खरतरकिरणोऽयं भगवान्सहस्रदीधितिरलङ्करोति मध्यमङ्गम्, तदेहि तावत्स्नानायमेव गच्छावः। इत्युत्थाय परिक्रामतः।

माध। एवं हि मन्ये।

घर्म्माम्भोविसरविवर्त्तनै * रिदानीं
मुग्धाक्ष्याः परिजनवारसुन्दरीणां।
तत्प्रातर्विहितविचित्रपत्रलेखा-
वैदग्ध्यं जहति कपोलकुङ्कुमानि॥

अपिच। उन्मीलन्मुकुलकरालकुन्दकोष-
प्रस्यूतद्विनमकरन्दगन्धबन्धो!।
तामीषत्प्रचलविलोचनां † नताङ्गी-
मालिङ्गन्पवन! मम स्पृशाङ्गमङ्गं ‡॥

मक। अभिहन्ति, हन्त कथमेष माधवं
सुकुमारकायमनवग्रहः § ज्वरः।
अचिरेण वैद्युतविवर्त्तदारुणः,
कलभं कठोर इव कूटपाकलः॥

तदत्र भगवती कामन्दकी नः शरणं॥

माध। स्वगतं। आश्चर्यं!

---

* विसरः समूहः। विवर्त्तनं विविधवर्त्तनप्रसरणमिति यावत्।

† प्रचलविलोचनां विरहे पवनस्य दुःसहत्वेन भयादितस्ततः क्षिप्तनेत्रीं।

‡ अङ्गमङ्गं प्रत्यङ्गं।

§ अनवग्रहोऽप्रतिबन्धः।

॥ कूटपाकलो हस्तीवातज्वरः।

Digitized by Google

पश्यामि तामित इतः पुरतश्च पश्चा-
दन्तर्बहिः परित एव विवर्त्तमानां ।
उद्बुद्धसुग्धकनकाब्जनिभं वहन्ती-
मासक्तितिर्य्यगपवर्त्तितदृष्टि वक्त्रं ।। *

प्रकाशं । वयस्य ! मम हि सम्प्रति,

प्रसरति परिमाथी कोऽप्ययं देहदाह-
स्तिरयति करणानां ग्राहकत्वं प्रमोहः ।
रणरणकविदृब्धिं बिभ्रदावर्त्ति गात्रं,
ज्वलति हृदयमन्तस्तन्मयत्वञ्च धत्ते ।।

इति निष्क्रान्ताः सर्वे ।

इति वञ्जुलवीथीनाम प्रथमोऽङ्कः ।

---

* उद्बुद्धं विकसितं मुग्धं कान्तं यत् सुवर्णपद्मं । आसक्तेन मयासक्ता तिर्य्यगपवर्त्तिता दृष्टिर्यस्य तत् ।

Digitized by Google

द्वितीयोऽङ्कः ।



ततः प्रविशतस्ते द्वौ ।

एका । हला! सङ्गीदसालापरिसरे अवलोइदादुदीआ तुमं किं मन्तअन्ती आसि ? (१) ।

द्वितीया । सहि ! तेण किल माहवप्पिअवअस्सेण मअरन्देण सअलोज्जेव्व मअणुज्जाणवुत्तन्तो भअवदीए णिवेदिदो (२) ।

प्रथमा । तदो किं ?

द्वितो। तदो भट्टिदारिअं दट्ठुकामाए भअवदीए पउत्तिणिमित्तं अवलोइदा अणुप्पेसिदा । मएवि ताए कधिदं, जधा लवङ्गिआदुदीआ विवित्ते भट्टिदारिआ वट्टदित्ति (३) ।

प्रथ। हला! लवङ्गिआ क्खु केसरकुसुमाइं अवचिणोमित्ति, मअणुज्जाणादो जेव्व णागदा ता किं सम्पदं संपत्ता ? (४) ।

द्वितो । अधइं, तं क्खु परावदन्तीं जेव्व हत्थे गेल्लिअ, पडिसिद्धपरिअणा, भट्टिदारिआ उअरिअलिन्दअं समारूढा (५) ।

---

(१) हला ! सङ्गीतशालापरिसरे अवलोकिताद्वितीया त्वं किं मन्त्रयन्ती आसीः ।

(२) सखि ! तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदनोद्यानवृत्तान्तो भगवत्यै निवेदितः ।

(३) ततो, भर्तृदारिकां दृष्टुकामया भगवत्या प्रवृत्तिनिमित्तं अवलोकिता अनुप्रेषिता, मयापि तस्यै कथितं, यथा लवङ्किकाद्वितीया विविक्ते भर्तृदारिका वर्त्तते ।

(४) हला! लवङ्किका खलु केशरकुसुमान्यवचिनोमीति, मदनोद्यानादेव नागता तत् किं साम्प्रतं संप्राप्ता ।

(५) अथकिं, तां खलु परापतन्तीमेव हस्ते गृहीत्वा, प्रतिषिद्धपरिजना, भर्तृदारिकोपर्यलिन्दं समारूढा ।

Digitized by Google

प्रथ । णूणं तस्स महाणुभावस्स संकधाए अत्ताणं विणोदेदि ।

द्विती । निश्वस्य । कुदो से आआसो ! एदिणा अज्ज सविसेसदंसणेण अदिभूमिं क्खु ताए अहिणिवेसो गमिस्सदि । अण्णञ्च णन्दणस्स कारणादो महाराआ भट्टिदारिअं पत्थअन्तो अमच्चेण विसत्तो (१) ।

प्रथ । किंत्ति ?

द्विती । पहवदि णिअस्स कण्णआजणस्स महाराओत्ति । ता जादं आमरणं क्खु हिअअसल्लं मालदीए माहवाणुराओत्ति तक्केमि (२) ।

प्रथ । अवि णाम, भअवदी किंपि एत्थ भअवदीत्तणं दंसइस्सदि (३) ।

द्विती । अइ असम्बद्धभणीरहे ! एहि, गच्छम्हः ।

इति परिक्रम्य निष्क्रान्ते प्रवेशकः * ।

ततः प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च ।

मालती । ञ्जं सहि ! तदो, तदो ।

---

(१) कुतस्तस्या आश्वासः । एतेनाद्य सविशेषदर्शनेनातिभूमिं खलु तस्या अभिनिवेशो गमिष्यति । अन्यच्च, नन्दनस्य कारणान्महाराजो भर्तृदारिकां प्रार्थयमानोऽमात्येन विघ्नितः ।

(२) प्रभवति निजस्य कन्यकाजनस्य महाराजइति । तज्जातमामरणं खलु हृदयशल्यं मालत्या माधवानुरागइति तर्कयामि ।

(३) अपि नाम भगवती किमत्र भगवतीत्वं दर्शयिष्यति ।

---

* 'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा' इति ।

Digitized by Google

लवङ्गिका । तदो तेण महाणुभाएण उवणीदा मे दूअं बउलमाला (१) । इतिमालामर्पयति ।

माल । गृहीत्वा, सहर्षं निर्व्वर्ण्य । सहि ! एक्क-पास-विसम-पडिबद्धा क्खु दूअं विरअणा (२) ।

लवं । एत्थ दाव अरमणीअत्तणे तुमंज्जेव अवरज्झसि (३) ।

माल । कधं विअ !

लवं । जेण सो मुद्धो दुव्वा-सामलङ्गो तधा विहत्थीकदो (४) ।

माल । पिअसहि लवङ्गिए ! सव्वधा आसासणसीलासि (५) ।

लवं । सहि ! का एत्थ आसासणसीलदा ? णं भणामि, सोवि पिअसहीए मन्द-मारुदउव्वेल्लत-प्पफुल्ल-पुण्डरीअ-विब्भमेहिं पढ़मावद्ध-वउलावली-विरअणावदेस-संजमिद-वलामोडि-वित्थरन्तेहिं लोअणेहिं विअम्भमाण-विल्लअ-त्थिमिद-दीह-पेरन्त-परिअत्तणा-विलास-तण्डविद-भूलदा-विडम्बिदाणङ्ग-सारङ्ग-विब्भम-विअड्ढं अवलोअअन्ते पञ्चक्खीकदोज्जेव (६) ।

---

(१) ततस्तेन महानुभावेनोपनीता मे एषा बकुलमाला ।

(२) सखि ! एकपार्श्वविषमप्रतिबद्धा खल्वियं विरचना ।

(३) अत्र तावदरमणीयत्वे त्वमेवापराध्यसि ।

(४) येन स मुग्धो दूर्व्वाश्यामलाङ्गस्तथा विहस्तीकृतः । विहस्तो व्याकुलः ।

(५) प्रियसखि लवङ्गिके ! सर्व्वथा आश्वासनशीलासि ।

(६) सखि ! कात्र आश्वासनशीलता ? ननु भणामि, सोऽपि प्रियसख्या मन्दमारुतोद्वेल्लत्प्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमाबद्धबकुलावलीविरचनापदेशसंयमितवलामोडिविस्तृताभ्यां लोचनाभ्यां विजृम्भमाणविलासस्खलितदीर्घपर्य्यन्तपरिवर्त्तनाविलासताण्डवितभ्रूलताविडम्बितानङ्गशारङ्गविभ्रमविदग्धं अवलोकयन् प्रत्यक्षीकृतएव । वलामोडि वलाकारः ॥

Digitized by Google

माल । लवङ्किकाम्परिष्वज्य । अम्मो ! पिअसहि ! किं तस्स दाव महाणुभावस्स साहाविआ ज्जेव मुहुत्तसन्निधाइणो जणस्स विप्पलम्भहेतुआ विलासा, आउ जहा पिअसही संभावेदि ? (१)।

लवं । विहस्य सास्रूयमिव । तुमम्मि सहावेण ज्जेव तस्सिं अवसरे असङ्गीदअं णच्चिदासि (२)।

माल । सलज्जं । ङ्कं, तदो, तदो ।

लवं । तदो पडिणिअत्तमाण-जत्ताजण-सङ्कुलेण अन्तरिदे तस्सिं जणे, मन्दारिआए घरं उपगदम्मि, ताए क्खु चित्तफलअं पभादे हत्थीकिदं आसि (३)।

माल । किंणिमित्तं ?

लवं । तं क्खु माहवाणुचरो, कलहंसओ णाम कामेदि, सा तस्स दंसइस्सदित्ति, तदो पिअणिवेदिआ मे मन्दारिआ संवुत्ता (४)।

माल । स्वगतं । णूणं तेणावि कलहंसएण तं पडिछन्दअं अत्तणो णाहस्स दंसिदं ऊविस्सदि । प्रकाशं । सखि ! किं दाणिं दे पिअं (५)।

---

(१) अहो प्रियसखि ! किं तस्य तावन्महानुभावस्य स्वाभाविक एव मुहूर्त्तसन्निधायिनोजनस्य विप्रलम्भहेतुका विलासा, आहो यथा प्रियसखी संभावयति ? ।

(२) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसङ्गीतकं नर्त्तितासि ।

(३) ततः प्रतिनिवर्त्तमानयात्राजनसङ्कुलेनान्तरिते तस्मिन् जने, मन्दारिकाया गृहमुपगतास्मि, तया खलु चित्रफलकं प्रभाते हस्तीकृतमासीत् । हस्तीकृतं न्यासीकृतमित्यर्थः ।

(४) तां खलु माधवानुचरः कलहंसको नाम कामयते, सा तस्य दर्शयिष्यतीति, ततो मे प्रियनिवेदिका मन्दारिका संवृत्ता ।

(५) नूनं तेनापि कलहंसकेन तत्प्रतिच्छन्दकमात्मनो नाथस्य दर्शितं भविष्यति । सखि ! किमिदानीं ते प्रियं ।

Digitized by Google

लवं। एदं, क्खु, सन्दाविदस्स सन्दावआरिणो दुल्लह-मणोरहावेस-दूःसहाआस-दज्झन्त-चित्तस्स खणमेत्त-णिव्वावअं तुह पडिच्छन्दअं (१)। इति चित्रं दर्शयति।

माल। सहर्षं सोच्छ्वासं चित्रं निर्वर्ण्य। अहो! दाणिंपि मे हिअअस्स अणासङ्गो, जेण एवंपि आसासणं विप्पलम्भोत्ति संभावेमि। कधं! अक्खराइम्पि! (२)। इति वाचयति।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः इत्यादि पूर्वोक्तं पठित्वा सानन्दं। महाभाग! सरिसी क्खु दे णिम्माणस्स विरअणा-मधुरदा, दंसणं उण तक्कालमणोहरं परिणामदीहसन्ताव-दारुणं। धण्णाओ क्खु ताओ कण्णाओ जाओ तुमं ण पेक्खन्ति, अवि णाम अत्तणो हिअअस्स पहवन्ति। इति रोदिति। (३)

लवं। सहि! किं एव्वंपि दे णत्थि आसासो? (४)

माल। सहि! कधं?

लवं। जस्स कारणादो, उक्खणिदअबन्धणं विअ, कङ्केल्लिपल्लवं, किलिस्सन्त-णोमालिआ-कुसुम-णिम्मला परिक्खिज्जसि, सोवि जाणविदो भअवदा मम्महेण सन्दावस्स, दूसहत्तणंत्ति (५)।

---

(१) एतत्, खलु, सन्तापितस्य सन्तापकारिणो दुर्लभमनोरथावेशदुःसह-यासदह्यमानचित्तस्य क्षणमात्रनिर्वापकं तव प्रतिच्छन्दकं।

(२) अहो! इदानीमपि मे हृदयस्य अनासङ्गो, येनैवमप्याश्वासनं विप्रलम्भ-इति सम्भावयामि। कथमक्षराण्यपि!।

(३) महाभाग! सदृशी खलु ते निर्म्माणस्य विरचनामधुरता, दर्शनं पुनस्त-त्कालमनोहरं परिणामदीर्घसन्तापदारुणं। धन्याः खलु ताः कन्यका यास्त्वां न प्रेक्षन्ते, अपि नामात्मनोहृदयस्य प्रभवन्ति।

(४) सखि! किमेवमपि ते नास्त्याश्वासः?

(५) यस्य कारणादुत्खण्डितबन्धनमिव कङ्केल्लिपल्लवं क्लाम्यन्नवमालिकाकु-

Digitized by Google

माल । कुसलं दाणीं तस्स महाणुभावस्स भोदु, मम उण दुल्लहो आस्सासो । सखं । विसेसदो अज्ज पिअसहि! (३०) ।

संस्कृतमाश्रित्य ।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं,
प्रमाथी निर्धूमं ज्वलति विधृतः * पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति, न चाम्बा, न भवती ।।

लवं । एवं ज्जेव, पच्चक्खसोक्खदाइणो परोक्ख-दुक्ख-दुःसहाआस-कारिणो सज्जणसमाअमा होन्ति । अवि अ, जस्सं वादायणन्तर-मुहुत्त-मेत्त-दंसणेण, सविसेस-समिद्ध-ज्जदवड्ढमान-पुण्णिमा-चन्दोदआ, णिक्करुण-काम-व्वावार-संसइद-जीविदा दे सरीरावत्था, तस्मज्जेव संपत्तसविसेसदंसणा अज्ज सन्तप्पसित्ति किं एत्थ भणिदव्वं । ता, पिअसही सलाहणिज्जं दुल्लह-मणोरह-फलं जीअलोअस्स, गुरुआणुराअ-सरिस-महाणुभाअ-वल्लह-समागमोत्ति, एत्तिअं जाणीमो (१) ।

सुमनिःसङ्गा परिखिद्यसे, सोऽपि त्वापितो भगवता मन्मथेन सन्तापस्य दुःसहत्वमिति । कङ्केलिरशोकः ।

(१) कुशलमिदानीं तस्य महानुभावस्य भवतु, मम पुनर्दुर्लभ आश्वासः विशेषतोऽद्य प्रियसखि ।

(२) एवमेव, प्रत्यक्षसौख्यदायिनः परोक्षदुःखदुःसहायासकारिणः सज्जनसमागमा भवन्ति । अपिच यस्य वातायनान्तरमुहूर्त्तदर्शनेन सविशेषसन्वर्द्धमानपूर्णिमाचन्द्रोदया निष्करुणकामव्यापारसंशयितजीविता ते शरीरावस्था, तस्यैव सम्प्रतिविशेषदर्शनाद्य सन्तप्यसीति किमत्र भणितव्यं । तत् प्रियसखी श्लाघनीयं दुर्लभमनोरथफलं जीवलोकस्य, गुरुकानुरागसदृशमहानुभाववल्लभसमागम इत्येतावज्जानीमः ।

---

* विधुतः सम्भावितः ।

Digitized by Google

माल । सखि ! दयितमालती-जीविते, साहसोपन्यासिनि ! अपेहि । अथवा, अहमेव वारंवारं प्रलोकयन्ती, दुःखावस्थापितधीरत्वावष्टम्भेनात्मनोहृदयेन दूरविजृम्भमाणदुर्विनयलज्जी अत्यपराध्यामि तथापि प्रियसखि ! । (१)

भूयस्संस्कृतमाश्रित्य ।

ज्वलतु गगने रात्रौ रात्रावखण्डकलः * शशी,
दहतु मदनः, किंवा मृत्योः परेण विधास्यति ।
मम तु दयितः, श्लाघ्यस्तातो जनन्यमलाम्बया,
कुलममलिनं नत्वेवायं जनो, न च जीवितं ।।

सर्वं । स्वगतं । एत्थ दाणीं को उवाओ ?

अथ नेपथ्यार्द्धप्रविष्टा प्रतीहारी । एसा भअवदी कामन्दइ ! ।

उभे । किं भअवदी ?

प्रती । भट्टिदारिअं दट्ठुकामा आअदा ।

उभे । तदो किं विलम्बीअदि ?

प्रतीहारी निष्क्रान्ता ।

मालती चित्रफलकं आच्छादयति ।

सर्वं । स्वगतं । सुसमीहिदं खु जादं ।

ततः प्रविशति, कामन्दक्यवलोकिता च ।

काम। साधु, सखे भूरिवसो ! साधु, प्रभवति निजस्य कन्या-जनस्य महाराज दुःखभयलोकाविरुद्धवचनमुपन्यस्तं । अपिच ।

---

(१) सखि ! दयितमालतीजीविते, साहसोपन्यासिनि ! अपेहि । अथवा, अहमेव वारंवारं प्रलोकयन्ती, दुःखावस्थापितधीरत्वावष्टम्भेनात्मनोहृदयेन दूरविजृम्भमाणदुर्विनयलज्जी अत्यपराध्यामि तथापि प्रियसखि ! ।

---

* अखण्डकलः सम्पूर्णमण्डलः ।

Digitized by Google

अद्य मन्मथोद्यानवृत्तान्तेन भगवतो विधेरनुकूलतामवगच्छामि, वकुलावलीचित्रफलकव्यतिकरसंविधानकौतुकमङ्गुतं प्रमोद-मुल्लासयति इतरेतरानुरागो हि दारकर्म्मणि परार्द्धं मङ्गलं, गीत-श्चायमर्थोऽङ्गिरसा, यस्यां वाङ्मनश्चक्षुषोरनुबन्धस्तस्यामद्विरिति।

अव । एसा मालदी! ।

कामं । निर्वर्ण्य ।

निकामं श्यामाङ्गी सरसकदलीगर्भसुभगा,
कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी ।
अवस्थामापन्ना मदनदहनोद्दाहविधुरा-
मियं नः कल्याणी रमयति, मनः कम्पयति च ।।

अपिच । परिपाण्डुपांसुलकपोलमाननं
दधती, मनोहरतरत्वमागता ।
रमणीयजन्मनि जने परिभ्रमन्
ललितो विधिर्विजयते हि मान्मथः ।।

अथवा । नियतमनया सङ्कल्पनिर्मितः प्रियसमागमोऽनुभूयते। तथाह्यस्याः ।

नीवीबन्धोच्छ्वसनमधरस्पन्दनं, दोर्विषादः,
स्वेदश्चक्षुर्म्मीलनमधुराकेकरस्निग्धतारं ।
गात्रस्तम्भः, स्तनमुकुलयोरुत्प्रबन्धः प्रकम्पो,
गण्डाभोगे पुलकपटलं, मूर्च्छना, चेतना च ।।*

इत्युपसर्पति ।

लवं । मालतीं चालयित्वा । मालदि ! इदो । उभे उत्तिष्ठतः ।

---

* दोर्विषादो बाह्वोर्निःसहत्वं । आलिङ्गनसौख्यादिति भावः । उत्प्रबन्धो-विच्छेदरहितः । गण्डाभोगे गण्डमण्डले ।

Digitized by Google

माल। भअवदि! वन्दामि।

कामं। महाभागे! अभिमतफलभाजनं भूयाः। *

लवं। एदं आसणं, एत्थ उवविसदु भअवदी। सर्वा उपविशन्ति।

माल। कुसलं भअवदीए?

कामं। निःश्वस्य। कुशलमिव।

लवं। स्वगतं। पत्थावणा क्खु एसा कवडनाडअस्स। प्रकाशं।
गुरुअ-वाह-त्थम्भ-मन्थरिद-कण्ठ-पडिलग्ग-णीसासं, असारिसंजेव्व भअवदीए वअणं, ता किं दाणीं उव्वेअकारणं भविस्सदि (१)।

कामं। नन्वयमेव चीरचीवरविरुद्धः परिचयः। †

लवं। कधंविअ?

कामं। अयि! त्वमपि न वेत्सि?

दृढमिह मदनस्य जैत्रमस्त्रं, सहजविलासनिबन्धनं शरीरं।
अनुचितवरसंप्रयोगशोच्यं, विफलगुणातिशयं भविष्यतीति।

मालती वैचित्यं नाटयति। ‡

लवं। अत्थि एदं, णरेन्दवअणाणुरोधिणा अमच्चेण णन्दणस्स पडिवण्णा मालदीत्ति सअलो जणो अमच्चं ज्जुगुच्छेहि (२)।

---

(१) प्रस्तावना खलु एषा कपटनाटकस्य। गुरुवाष्पस्तम्भमन्थरितकण्ठ-प्रतिलग्ननिश्वासमन्याद्दशमेव भगवत्या वचनं। तत् किमिदानीमुद्वेगकारणं भविष्यति। मन्थरितं मन्दीकृतं।

(२) अस्त्येतन्नरेन्द्रवचनानुरोधिनामात्येन नन्दनस्य प्रतिपन्ना मालतीति, सकलो जनोऽमात्यं जुगुप्सते।

---

* अभिमतेत्यत्र समाहित इति क्वचित्पाठः। सुजन्मतायाः फलस्य भाजनमिति च पाठान्तरं।

† परिचयः मालत्यभिधङ्क उद्वेगकारणमितिशेषः।

‡ वैचित्यं विमनस्कत्वं।

Digitized by Google

माल । स्वगतं । कथं उपहारीकिदम्हि तादेण राइणो ? (१)

काम । आश्चर्यं !

गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथवा,
कुतोऽपत्यस्नेहः कुटिलनयनिष्णातमनसाम् ।
इदं त्वेदंपर्य्यं * यदुत नृपतेर्न्मन्त्रसचिवः,
सुतादानान्मित्रं भवतु, सहि मे नन्दन इति ।।

माल । स्वगतं । राआराहणं क्खु तादस्स गुरुअं, ण उण मालदी (२)

लवं । एवं जधा भअवदीए आणत्तं, अण्णधा तस्सिं वरे दुइंसणे अइक्कन्त-जोव्वणे किं ण विआरिअं अमच्चेण ? (३)

माल । स्वगतं । हा हदम्हि! समुवत्थिदाणत्थ-वज्ज-पदणा मन्द-भाइणी (४) ।

लवं । ता पसीददु भअवदी, परित्ताहि इमादो जोवण-मरणादो पिअसहीं, तवावि एसा दुहिदाज्जेव्व (५) ।

काम । अयि सरले ! किमत्र भगवत्या मया वाच्यं ! प्रभवति प्रायः कुमारीणां जनयिता दैवञ्च । यच्च किलकौशिकी-† शकु-

(१) कथमुपहारीकृतास्मि तातेन राज्ञः ?

(२) राजाराधनं खलु तातस्य गुरुकं न पुनर्म्मालती ।

(३) एवं यथा भगवत्या आज्ञप्तं, अन्यथा तस्मिन् वरे दुर्दर्शने अतिक्रान्त-यौवने, किं न विचारितममात्येन ?

(४) हा हतास्मि समुपस्थितानर्थरूपवज्रपतना मन्दभागिनी ।

(५) तत्प्रसीदतु भगवती, परित्रायस्वास्माज्जीवनमरणात्प्रियसखीं, तवाप्येषा दुहितैव ।

* इदम्परमेतदभिप्रायकमिति यावत् ।

† कौशिकी कुशिकवंशसम्भवा ।

Digitized by Google

न्तला दुष्मन्तं, अप्सराः पुरूरवसञ्चकमे, इत्याख्यानविद् आचक्षते, वासवदत्ता च राज्ञे सञ्जयाय पिता दत्तमात्मानमुदयनाय प्रायच्छदित्यादि, तदपि साहसिक्यमित्यनुपदेष्टव्यकल्पं, सर्व्वथा,

राज्ञः प्रियाय सुहृदे सचिवाय कार्य्या-
दृत्वात्मजां भवतु निर्वृतिमानमात्यः ।
दुर्दर्शनेन घटतामियमध्वनेन,
धूमग्रहेण * शशिनो विमला कलेव ॥

माल । साहं खगदं । हा ताद! तुमम्पि मम णाम एवंवत्ति † सव्वधा जिदं भोअतिण्हाए (१) ।

अव । चिराइदं भअवदीए, णं भणामि, अमुत्थसरीरो महाभाओ माहवोत्ति (२) ।

कामं । गम्यते, वत्से ! अनुजानीहि मां ।

लवं । जनान्तिकं ‡ । सहि! मालदि! सम्मदं भअवदीए सआसादो, तस्स महाणुभावस्स उग्गम्म जाणीमो (३) ।

माल । सहि! अत्थि मे कोदूहलं ।

---

(१) हा तात ! त्वमपि मम नाम एवमिति सर्व्वथा जितं भोगतृष्णया ।

(२) चिराथितं भगवत्या, ननु भणाम्यस्वस्थशरीरः खलु महाभागोमाधवइति ।

(३) सखि ! मालति ! सम्मतं भगवत्याः सकाशात्, तस्य महानुभावस्योद्गमं जानीमः । उद्गममुत्पत्तिं ।

---

* धूमग्रहेण राहुणा ।

† एवमिति मां प्रतिनिरनुक्रोश इत्यर्थः ।

‡ विपताकाकरेणान्यामपवार्यान्तरा कथां । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकमिति ।

Digitized by Google

लवं । अकामं । भअवदि ! को एसो माहवो णाम, जस्स भअवदी सिणेहगुरुअं अत्ताणं धारेदि ? (१)

कामं । अप्रस्ताविकी मह्त्येषा कथा ।

लवं । तधाबि आचक्खदु, मे भअवदी पसादं करेदु (२) ।

कामं । श्रूयतां, अस्ति विदर्भाधिपतेरमात्यः, समग्रधुर्य्यपुरुषप्रकाण्डचक्रचूड़ामणिर्देवरातो नाम, यमशेषभुवनमहनीयपुण्यमहिमानमात्मनस्मृतीर्थ्यं * पितैव ते जानाति योऽसौ यादृशश्चेति । अपि च । व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः,

सुकृतविलसितानां स्थानमूर्जस्वलानां ।

अकलितमहिमानः केतनं मङ्गलानां,

कथमपि भुवनेऽस्मिन् तादृशास्सम्भवन्ति ।। †

माल । सहि ! तं क्खु भअवदीगहिदणामधेअं सव्वदा तादो सुमरेदि (३) ।

---

(१) भगवति ! क एष माधवो नाम, यस्य भगवती स्नेहगुरुकमात्मानं धारयति ? । यस्य क्षते इति शेषः ।

(२) तथाप्याचष्टां मे भगवती प्रसादं करोतु । आचक्ष्विअ भअवदी पसादमिति पाठान्तरं ।

(३) सखि ! तं खलु भगवतीग्टहीतनामधेयं सर्व्वदा तातः स्मरति ।

---

* धुरिकार्य्ये साधु धुर्य्यो मन्त्री । -प्रकाण्डचक्रचूड़ामणिः सर्व्वप्रधानमन्त्रीत्यर्थः । महनीयं पूज्यं पुण्यं प्रशस्तं । यद्वा महनीयौ पुण्यमहिमानौ यस्य तं । समानस्तीर्थमुपाध्यायो यस्य तं । समग्रधुर्य्यपुरुष इत्यत्र समग्रपुरुष इति क्वचित्पाठः ।

† व्यतिकरितदिगन्ता व्याप्तदिग्भागाः । ऊर्जस्वलानां बलवतां सुकृतविलसितानां पुण्यविपाकानां स्थानं । यद्वा पुण्यानां विलसितानाञ्चेति । अकलितोऽपरिच्छेद्यः । केतनं निवासः । कथमपि भाग्यादिना तादृशास्तुल्या इत्यर्थः ।

Digitized by Google

लवं । सखि! समं खलु विज्ञाधिगमो कदोत्ति, तक्कालसंवेदिणो मन्तन्ति (१) ।

कामं । तत उदयगिरेरिवैकएव स्फुरितगुणद्युतिसुन्दरः कलावान् ।
दृश जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचन्द्रः* ॥

लवं । जनान्तिकं । सखि! अभिणाम माहवो भवे ?

कामं । असौ विद्याधारः शिशुरपि विनिर्गत्य भवना-
द्दिशाघातः सम्प्रत्यविकलशरच्चन्द्रमधुरः ।
यदालोकस्थाने भवति पुरसुन्मादतरलैः,
कटाक्षैर्नारीणां कुवलयितवातायनमिव † ॥

अत्र बालसुहृदा मकरन्देन सह, विद्यामान्वीक्षिकीमधिगच्छति, स एव माधवो नामेति ।

माल । सानन्दं जनान्तिकं । सखि! सुदं तुमए ?

लवं । सखि! कुदोवा महोदहिं वज्जिअ पारिआअस्स उग्गमोत्ति (२) ।

नेपथ्ये गङ्गध्वनिः ।

कामं । अहो! कालातिपातः सम्प्रति हि !

---

(१) सखि ! समं खलु विद्याधिगमः कृत इति तत्कालसंवेदिनो मन्त्रयन्ते । तत्कालवेदी जनो मन्त्रेदी इति पाठान्तरम् ।

(२) सखि ! कुतो वा महोदधिं वर्ज्जयित्वा, पारिजातस्योद्गम इति ।

---

* ततो देवरात्। स्फुरितानां गुणानां शीलादीनां या द्युतिरुत्कर्षस्तेन सुन्दरः । यद्वा स्फुरितगुणद्युतिश्चासौ सुन्दरश्चेति । कलावान् चतुःषष्टिकला-कुशलः । नयनवतां चक्षुष्मतां महोत्सवस्य कारणं नेत्रप्रीतिजनकत्वात् । चन्द्र-पक्षेऽपि यथाक्रमं विशेषणानि योज्यानि ।

† यदालोकस्थाने उन्मादतरलैः कामावेशचपलैर्नारीणां कटाक्षैः पुरं कुवलयितवातायनमिव नीलनलिनगवाक्षमिव भवति ।

Digitized by Google

क्षिपन्निद्रामुद्रां मदनकलहच्छेदसुलभा-
मवाप्तोत्कण्ठानां विहगमिथुनानां प्रथमतः * ।
दधानः सौधानामलघुषु निकुञ्जेषु घनता-
मसौ सन्ध्याशङ्खध्वनिरतिभृतः खे विचरति ।।

तदुत्तिष्ठामः । इत्युत्तिष्ठति ।

माल । अपवार्य । कधं उवहारीकदत्ति राइणो ताएण, राआराहणं क्खु ताअस्स गुरुअं, ण उण मालदी । साधु । हा ताअ! तुमम्पि णाम मम एव्वंत्ति, सव्वधा जिदं भोअतिण्हाए । सानन्दं । कधं महाकुलप्पभवो वि सो महाणुभावो सुभणिदं पिअसहीए कुदो वा महोदधीत्यादि पठति । अवि णाम तं पुणोवि पेक्खिस्सं (१) ।

सर्वं । अवलोक्य । इदो एहि, एदिणा सोवाणेण ओदरम्ह ।

कामं । अपवार्य । साधु, संप्रति मया तटस्थयैव, मालतीं प्रति निर्दिष्टार्थदूतीजनस्य, लघुकृतो भारः ।

तथाहि । वरेऽन्यस्मिन् द्वेषः, पितरि विचिकित्सा च जनिता,
पुरावृत्तोद्गारैरपि च कथिता कार्यपदवी ।

---

(१) कथमुपकारीकृतास्मि राज्ञस्तातेन, राजाराधनं खलु तातस्य गुरुकं, न पुनर्मालती । हा तात ! त्वमपि नाम तथैवमिति, सर्वथा जितं भोगतृष्णया। कथं महाकुलप्रभवोऽपि स महानुभावः सुभणितं प्रियसख्या, कुतोवा महोदधीत्यादि । अपि नाम पुनरपि तं प्रेक्षिष्ये ।

---

* अवाप्तोत्कण्ठानां प्रत्यासन्नविरहात् सोत्कण्ठानां विहगमिथुनानां चक्रवाकद्वन्द्वानां मदनकलहच्छेदसुलभां सुरतावसानसुलभां निद्रामुद्रां सुरतश्रमजनितामित्यर्थः ।

Digitized by Google

सुतं तन्माहात्म्यं, यदभिजनतो यच्च गुणतः
प्रसङ्गात् वक्ष्यन्ते त्वयि विधिविधेयाः परिचयः * ॥

इति निष्क्रान्तावलोकितौ।

इति मालतीमाधवे धवलगृहो नाम द्वितीयोऽङ्कः।

---

* अन्यस्मिन् वरे नन्दने द्वेषः कारितः। विचिकित्सा निन्दा। पुराद्यन्तोद्धारैः भक्तुल्लादीनां पितृनिरपेक्षालादानकथनैः। गुणतो लावण्यादैर्यन्माहात्म्यमभिलक्ष्यते। विधिविधेयो दैवसम्पाद्य इत्यर्थः।

Digitized by Google

तृतीयोऽङ्कः ।



ततः प्रविशति बुद्धरक्षिता ।

बुद्ध। परिक्रम्याकाशे । अवलोइदे! अवि जाणासि कहिं भअवदीत्ति ?

प्रविश्य अवलोकिता । बुद्धरक्खिदे! किं पमुज्झासि ? कोवि आलो भअवदीए पिण्डवादवेलं वज्जिअ मालदीं अणुवत्तमाणाए (१) ।

बुद्ध । ऊं, तुमं उण कहिं पेसिदासि ?

अव । अहं खु भअवदीए माहवसआसं अणुप्पेसिदा, सन्दिट्ठं अ तस्स, जधा सङ्करघरसम्बद्धं कुसुमाअरं णाम उज्जाणं गदुअ कुञ्जणिउञ्ज-पेरन्त-रत्तासोअ-गहणे चिट्ठदु, गदो अ तत्थ माहवो (२) ।

बुद्ध । किंत्ति तहिं माहवो अणुप्पेसिदो ?

अव । अज्ज कसणचउद्दसीत्ति, तत्थ भअवदीए समं मालदी सङ्करघरं गमिस्सदि, तदोकिल एवं सोहग्गं वड्ढदित्ति देवदाराहणणिमित्तं सहत्थकुसुमावचअं उद्दिसिअ, लवङ्गिआ-

---

(१) बुद्धरक्षिते ! किं प्रमुह्यसि ? कोऽपि कालो भगवत्याः पिण्डपातवेलां वर्जयित्वा मालतीमनुवर्त्तमानायाः ।

(२) अहं खलु भगवत्या माधवसकाशमनुप्रेषिता, सन्दिष्टञ्च तस्य, यथा, शङ्करगृहसम्बद्धं कुसुमाकरं नामोद्यानं गत्वा, कुञ्जनिकुञ्जपर्यन्तरक्ताशोकगहने तिष्ठतु, गतश्च तत्र माधवः ।

Digitized by Google

दुहीआं मालदीं, भअवदीजेव्व कुसुमाअरुज्जाणं आणदूसदि, तदो असोसदंसणं भोदुत्ति। तुमं उण कहिं पत्थिदा? (१)

बुद्ध। अहं खु सङ्करन्दंजेव्व पत्थिदाए पिअसहीए मदअन्तिआए आमन्तिदा, तदो भअवदीए पादवन्दणं कदुअ, तहिं जेव्व गच्छामि (२)।

अव। तुमं खु भअवदीए अहिं पओअणे णिउत्ता, तत्त को वुत्तन्तो? (३)।

बुद्ध। मए खु भअवदीए समादेसेण, तासु तासु विस्सम्भकथासु, दूरिसोतारिसोत्ति मअरन्दस्स उअरि पिअसहीए मदअन्तिआए दूरं आरोविदो परोच्चाणुराओ एसो अ से मणोरहो, अवि णाम तं पेक्खिस्सदित्ति (४)।

अव। साधु बुद्धरक्खिदे! साधु।

बुद्ध। एहि गच्छम्ह।

इति परिक्रम्य निष्क्रान्ते प्रवेशकः।

---

(१) अद्य कृष्णचतुर्दशीति, तत्र भगवत्या समं मालती शङ्करन्दृहं गमिष्यति, ततः किल एवं सौभाग्यं वर्द्धत इति, देवताराधननिमित्तं स्वहस्तकुसुमावचयमुद्दिश्य, लवङ्किकाद्वितीयां मालतीं भगवत्येव कुसुमाकरोद्यानमानेष्यतीति, तत्रोऽन्योन्यदर्शनं भवतिति। त्वं पुनः क्व प्रस्थिता?

(२) अहं खलु शङ्करन्दृहमेव प्रस्थितया प्रियसख्या मदयन्तिकया आमन्त्रिता, ततो भगवत्याः पादवन्दनं कृत्वा तत्रैव गच्छामि। आमन्त्रिता आज्ञप्ता।

(३) त्वं खलु भगवत्या यस्मिन् प्रयोजने नियुक्ता, तत्र को वृत्तान्तः? मकरन्दस्य मदयन्तिकापरिणामोऽपि किं वृत्त इत्यर्थः।

(४) मया खलु भगवत्याः समादेशेन तासु तासु विस्रब्धकथासु, दृष्टश्चासौ दृष्ट इति मकरन्दस्योपरि प्रियसख्या मदयन्तिकाया दूरमारोपितः परोक्षानुरागएष चास्या मनोरथः, अपि नाम तं प्रेक्षिष्ये इति?

Digitized by Google

प्रविश्य कामन्दकी ।

तथा विनयनम्रापि मया मालत्युपायतः * ।
नीता कतिपयाहोभिः सखीविस्रम्भसेव्यतां ।।

सम्प्रति । व्रजति विरहे वैचित्त्यं, नः प्रसीदति सन्निधौ,
रहसि रमते, प्रोत्या दायं ददात्यनुवर्त्तते ।
गमनसमये कण्ठे लग्ना, निरुध्य निरुध्य मां,
सपदि शपथैः प्रत्यावृत्तिं प्रणम्य च याचते † ।।

दृष्ट्वा साधीयस्येव सम्प्रत्यागतानिबन्धनं ।

शाकुन्तलादीनितिहासवादान् प्रस्तावितानन्यपरैर्वचोभिः ।
श्रुत्वा मदुत्सङ्गनिवेशिताङ्गो चिराय, चिन्तासिमितत्वमेति ।।

तदद्य माधवसमक्षमुत्तरमुपक्रमिष्ये ‡ ।

नेपथ्याभिमुखं । वत्से ! इत इतः ।

ततः प्रविशति मालती लवङ्किका च ।

माल । सगतं । कथं उवज्झारीकहत्थिं । इत्यादि पूर्वोक्तं पठति ।

लवं । सहि ! एसो क्खु मऊर-मऊ-रसोल्लोल्ल-मञ्जरी-कवलण-केलि-कल-कोदूहल-उल-कोलाहलाकुलिद-सहआरसिहरट्ठीण-चटुल-चञ्चरीअ-णिअर-व्वदुअरुहलिद-हल-कराल-चम्पआ-णिवास-मणोहरो, मराल-मंसल-जहण-परिणाहव्वहण-मन्थरोरु-भर-विसंठुल-खलिद-चलण-संचार-मसिण-गमणोवणीद-सेअ-

---

* उपायतः शकुन्तलादिकथयेत्यर्थः । अपिशब्द एवार्थे ।

† वैचित्त्यं दौर्मनस्यं । प्रसीदति प्रसन्ना भवति । रहसि विजने रमते मया सहेति शेषः । दायं सोत्कण्ठमुत्तरं ददाति । देये दाने च दायः स्यात् दायः सोत्कण्ठभाषणे इति मेदिनी । दायं कर्पूरादिदेयमिति केचित् । अनुवर्त्तते अनुगच्छति । प्रत्यावृत्तिं पुनरागमनं ।

‡ उत्तरमनन्तरकृत्यं ।

Digitized by Google

सीअर-सुहाविंदुज्जन्त-मुद्ध-लुद्ध-चन्द्द-चन्दणाअमाण-सीअल-फ्फरसो, तुमं परिस्सअदि कुसुमाअरुज्जाणमारुदो, ता पविसस्सु (१)। इति परिक्रम्य प्रविशतः।

ततः प्रविशति माधवः।

माध। सहर्षं। कान्त! परागता भगवती। दूरं हि मम आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति।

सन्तापदग्धस्य * शिखण्डियूनोर्दृष्टेः पुरस्तादचिरप्रभेव॥

दृष्ट्वा। अये! लवङ्गिकाद्वितीया मालत्यपि।

आश्चर्यसुत्पलदृशो वदनामलेन्दु-
सान्निध्यतो मम सुरुर्जडिमानमेत्य †।
जाड्येन चन्द्रमणिनेव महीधरस्य
सन्धार्यते द्रवमयो मनसो विकारः॥

सम्प्रति रमणीयतरा मालती।

उच्चलयति मनोभवाग्निं, मद्यति हृदयं, कृतार्थयति चक्षुः।
परिस्फुटितचम्पकावलीविलासलुलिताखसैरङ्गैः॥

---

(१) सखि एष खलु मधुरमधुरसार्द्रार्द्रमञ्जरीकवलनकोकिलकलकोकिलकुल-कोलाहलाकुलितसहकारशिखरोद्भेदचटुलचञ्चरीकनिकरव्यतिकरोद्वलितदरक-रालचम्पकाधिवासमनोहरो, मरालमांसलजघनपरिणाहोद्वहनमन्थरोरुभरविसं-ष्ठुलस्खलितचरणसञ्चारमहसागमनोपनीतखेदशीकरसुधाबिन्दूयमानमुग्धमुखचन्द्र-चन्द्रायमानशीतलस्पर्शस्खातं परिष्वजति कुसुमाकरोद्यानमारुतस्तत्प्रविशावः। कवलनं भक्षणं, चटुलो मनोज्ञः, चञ्चरीको भ्रमरः। अधिवासो गन्धः।

---

* सन्तापदग्धस्येति विशेषणमुभयत्रापि बोद्धव्यं।

† जड़िमानं सर्व्वकार्य्याप्रतिपत्तिरूपं।

Digitized by Google

माल । सखि! दूरमस्मिं कुसुमनिकुञ्जे कुसुमायुधं अवधिणुआ (१)।

माध । प्रथमप्रियावचनसंश्रवस्फुरत्पुलकेन संप्रति मया विडम्ब्यते।
घनराजिनूतनपयस्समुच्चयोच्चणच्चणबद्धकुन्तलकदम्बडम्बरः * ॥

लवं । सखि! एवं करेमि । पुष्पाणि चयं नाटयतः ।

माध । अपरिमेयाश्चर्यमाधार्यकं भगवत्याः ।

माल । सखि! दूरीकृतं अस्माभिः अवधिणुआ ।

कामं । मालतीं परिष्वज्य । अयि! विरम, निस्त्रपासि जाता † ।

तथाहि । स्खलयति वचनं ते, कंपयत्यङ्गबल्लरीम्,
जनयति मुखचन्द्रोद्भासिनः स्वेदबिन्दून् ।
मुकुलयति च नेत्रे सर्वथा सुभ्रु! खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन ॥

मालती लज्जते ।

लवं । सोहणं भगवदीए आणत्तं ।

माध । कृतकृत्यः परिक्रान्तः ।

कामं । तद्गच्छावः, किञ्चिद्गत्वा स्थेयमाख्यातुकामाऽस्मि ।

सर्वौ उपविशन्ति ।

कामं। मालत्याश्चिबुकमुन्नमय्य । शृणु विचित्तमिदं, सुभगे ! ।

माल । अवहिदम्हि ।

---

(१) सखि, दूरमस्मिन् कुसुमनिकुञ्जे कुसुमायुधमवधिणुआ ।

---

* डम्बरः प्रपञ्चो विडम्ब्यते सदृश्यीक्रियते । विडम्बयत इत्यत्र अवलम्बयत इति क्वचित्पाठः । तथाच डम्बरः साडम्बरं अवलम्बयत इत्यर्थः । समुच्चयनित्यत्र समुच्चयनमिति क्वचित्पाठः ।

† निस्त्रपा परिभ्रान्ता । विरम पुष्पावचयव्यापारात् । निस्त्रपा कामपीड़िता विरम, विश्रमेण रमस्व इति श्लिष्टवर्णपदघटनेदमिति बोध्यम् ।

Digitized by Google

कामं । अस्ति तावदेकदा प्रसङ्गतः कथित एव मया माधवाभिधानकुमारो यस्त्वमिव मामकीनस्य मनसो द्वितीयं निबन्धनम् ।

लवं । सुमरामो ।

कामं । स खलु मन्मथोद्यानयात्रादिवसात्प्रभृति, दुर्म्मनायमानः, परवानिव शरीरोपतापेन ।

यदिन्दावानन्दं, प्रणयिनि जने वा, न भजते,
व्यनक्त्यन्तस्तापं तदयमतिधीरोऽपि विषमम् ।
प्रियकुश्यामाङ्गप्रकृतिरपि चापाण्डुमधुरं
वपुः क्षामं क्षामं वहति, रमणीयञ्च भवति ।।

लवं । एवम्पि तस्सिं अवसरे भअवदीं तुवराअन्तीए, अवलोइदाए उद्दीरिदं आसि, जधा अस्सत्थशरीरो माहवोत्ति (१) ।

कामं । यावदस्मणवं, मालत्येवास्य मन्मथोन्मादहेतुरिति, ममापि स एव निश्चयः ।

अनुभवं वदनेन्दुरुपागमन्नियतमेव यदस्य महात्मनः ।
क्षुभितमुत्कलिकातरलं मनः पय इव स्तिमितस्य महोदधेः ।।

माध । अहो ! उपन्यासगुद्धिः, अहो महत्त्वारोपणे यत्नः ।

अथवा ।

शास्त्रेषु निष्ठा, सहजश्च बोधः, प्रागल्भ्यमभ्यस्तगुणा च वाणी ।
कालानुरोधः, प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु ।।

कामं । अतस्तेन जीवितादुद्विजमानेन दुष्करमपि न किञ्चित्क्रियते ? असौ हि,

---

(१) एवमपि तस्मिन्नवसरे भगवतीं त्वरयन्त्या अवलोकितयोदीरितमासीत्, यथा अस्वस्थशरीरो माधव इति ।

Digitized by Google

धत्ते चञ्चुर्मुकुलिनि रसत्कोकिले बालचूते,
मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः ।
दाहप्रेम्णा * सरसविसिनीपत्रमात्रान्तराय-
स्वाम्यन्मूर्त्तिः श्वयति बलवो मत्यवे चन्द्रपादान् ।।

माध । अन्य एवाचुसः कथाप्रकारो भगवत्याः ।।

माल । सखम् । अहिदुक्करं करेहि ।

कामं । तदेवं प्रकृत्या सुकुमारः कुमारः कदाचिदप्यन्यत्रा-परिक्लिष्टपूर्व्वस्तपस्वी, † ततोऽधुना शक्यमनेन मरणमप्यनुभवितुं ।

माल । जणान्तिकं । सहि ! अत्तणो कारणादो तस्स सव्व-लोआलङ्कारभूदस्स, किमपि आसङ्कमाणीए भअवदीए भीदाविदम्हि, ता किं दाणिं एत्थ पडिवज्जिअं (१) ।

माध । दिष्ट्यानुकम्पितोऽस्मि भगवत्या ।

सर्वं । भअवदी एवंवादिणीत्ति आअण्णीअदि, अम्हाणम्हि भट्टिदारिआ, भवणासत्तरच्छामुहमुक्कमणोरहस्स, तस्सज्जेव बलवो अणुभूदसंसा भविअ, रविकिरणासिलिट्ठ-सुद्ध-कमलिणी-कन्द-सुन्दरावअव-सोहा-विभाविदाणङ्ग-वेअणाधिअदर-रमणी-आलि, परिअणं दूणेहि । आभिणन्दिदकेलिकलाऊ, केवलं कम-लाअमाण-कन्तहत्थ-पसरहत्थ-गण्ड-मण्डला दिआसाइं गमेहि । अविअ । विअसिआरविन्द-मअरन्द-णिअन्द-सुन्दरेण, हर-द-लिअ-कुन्द-आअन्द-मङ्ग- विन्दु-सन्दोह-वाहिणा, मअणुज्जा-

(१) सखि ! आत्मनः कारणात्तस्य सर्व्वलोकालङ्कारभूतस्य, किमपि आशङ्कमानया भगवत्या भीतायितास्मि, तत् किमिदानीमत्र प्रतिपत्तव्ये ।

* दाहप्रेम्णेत्यत्र दावप्रेम्नेति पाठान्तरं ।

† तत्रैव प्रथममनुरक्त इत्यर्थः ।

Digitized by Google

पेरन्त-मारुदेण-उत्तम्मदि । जइ च तस्सिं जत्ताहिअहे णिअ-मङ्गसव-ब्भूदअ-दंसण-पडिअस्स-कूवस्स भअवदो कामस्स विअ, काम-काणणालङ्कार-आरिणो तस्स, विविह-विब्भमाभिरामं, अणुक्खाणुराआणुबन्ध-मङ्गधीकिद-जोव्वणारम्भं अणोसहिट्ठि-विणिवाद-वञ्चणावसर-जूरविद*-चित्त-तुवरन्त-कीदूहलं संसु-ल्लसिद-सत्तस-त्तम्भ-मत्थरावअव-पडिलग्ग-सेअ-पुलअ-उल्लम्प-सुन्दरं, आणन्दिदसहीअणं पियसहीए परप्परावलोअणसुहं स-मासादिदं, तदो पब्भट्ठि, संविसेस-दूसहाआस-विअम्भमाणू-हामट्ठिट्ठदाह-दारुणं दसापरिणामं अणुभवन्ती, मुहुत्तमेत्त-सम्पत्त-मुच्चन्दोदआ वालकमलिणी विअ पम्हलअट्ठि । तहा-विअ, मुहुत्तमेत्त-ट्ठिअअ-विणिट्ठिद-णिअ-वल्लहसमागमा, निब्भर-सलिलासार-सिञ्चमाणेव्व-मेदणी सीदलाअट्ठित्ति आ-णामि। जेण पप्फुरिद-कन्त-दसण-च्छदुच्छलन्त-दन्त-मुत्तिआवलि-कन्ति-सविसेस-सोहिदं, निरन्तरुल्लसिद-पुलअ-पल्लव-कवोल-घोलन्त-संदट्ठाणन्द-वाहत्थवअं दूसि-विअसिद-णिच्चन्द-मन्दा-रुत्ताण-मसिण-मउलाअन्त-णेत्त-णीलुप्पलं, अविरलुल्लिअ-सेअ-जल-विन्दु-सुन्दर-ललाट-पट्टं नवचन्दलेहामणोहरं मुह-मुह-पुण्डरीअमुव्वहन्ती, विअड्ढ-सहअरी-चित्त-संसद्द-कोआर-भावा भोदि। किंअ । उद्दाम-ससिमउहणिउरम्ब-पुञ्जिद-पउत्ति-

---

* जूरविद इति सर्वत्र पाठः । अस्य च खिद्यमान इति संस्कृतेनानुवादः सर्वैरेव टीकाकृद्भिः कृतः । मालाङ्कीटीकायाञ्च 'खिदेर्जूर' इति सूत्रं लिखितं। १८५४ अब्दे लण्डनमुद्रित-प्राकृत-प्रकाश-प्रदर्शिते 'खिदेर्विसूर' 'क्रुधेर्जूर' इति सूत्रद्वये क्रमान्वयेन पठिते दृष्टे अपि अनयोः पाठवैपरीत्यसम्भावनया तदनुसारी पाठोनास्माभिः कल्पितः ।

Digitized by Google

णीसन्द-चन्द-मणिहार-धारिणी, कप्पूर-पूर-सविसेस-सिसिर-च-न्दण-रस-छड्डा-सार-णिब्भर-हत्थुरिद-काम-कन्दली-वत्त-सव्वाङ्ग-णादि-वावार-तुवरन्त-सहअरी-सत्थ-विरइअ-सेवाणीअ-कमलिणी-दल-अलहासअणीए उसिहा, रअणीओगमेदि। कधंविअ उवलद्ध-णिहासुहा सेअ-पप्फुरिद-पाद-पल्लवुव्वन्त-पिण्डालत्तअ-रंसा थरथराअन्त-पीवरोरु-मूल-वास-विसंवादि-णीवि-बन्धणा उक्खु-डअ किञ्चन्तरुत्तरंग-णीसास-विसम-समूससन्तपच्चल-पओहरो-वरि-णिहित-वेवन्त-भुअलदा-वेट्ट-बन्धणा भत्ति-पडिवोध-वेला-वि-सज्जिदुव्विग्ग-दिट्ठि-वाद-विसाद-सुण्ण-सअणिज्ज-संजादमोह-मोलन्त-लोअणा, ससम्भम-सहीअण-पउत्त-पढिवण्ण-मुच्छा-वि-क्खेअ-समअ-संगलिद-दीह-णीसास-सेस-जीविदा, किंकादव्वदा-मूढदाए पढम-पत्थिद-णिअ-जोव्विदावसाणं। दुव्वार-देव्व-विल-सिदोवालम्भ-मेत्त-वावारं अत्तारिसं जणं करेहि, ता पेक्खदु भअ-वदी, इमेसु दाव लावण्ण-भट्टु-णिम्माण-परिवेलवेसु अङ्गेसु दारुण-विअम्भिदस्स केच्चिरं कुसलावसाणदा मम्मइस्स भविस्सदि। कधं अ इमाइं रमण-केलि-कलह-कोवोवराअ-पल्लविअ-केरली-कवोल-कोमलुव्वेल्लन्त-विमल-चन्द-चन्दिआ-उद्दाम-दूलिद-तिमिराव रणाइं विभावरीमुहाइं। इमे अ उल्लसिद-दुद्ध-सिन्धु-पूर-धवलु-ज्जल-जोण्हा-जल-पक्खालिअ-गअणांगणा, परिमलिद-पाटल वउल-णिम्मइण-वइल-परिमलुग्गार-सम्वलण-मसिण-मंसला-अन्त-मलअ-मारुदुद्धूमाविद-दस-दिसामुहावसन्त-रअणी-परि-णाहा अणत्थ-कारिणो भविस्संति पिअसहीएत्ति (१)।

(१) भगवती, एवं वादिनीत्याख्यायते, अस्माकमपि भट्टदारिका, भवना सन्नरथामुखमुहूर्त्तमवलोकनस्य, तस्यैव बडुगोऽनुभूतदर्शना भूत्वा, रविकिरणा-

Digitized by Google

कामं । लवङ्गिके !

यदि तद्विषयोऽनुरागबन्धः स्फुटमेतद्धि फलं * गुणज्ञतायाः ।
इति नन्दितमध्यवस्यया स्यात्सुहृदयं दारुणया विदार्यते मे † ॥

श्लिष्टमुग्धकमलिनीकन्दसुन्दरावयवशोभाविभावितानङ्गवेदनाधिकतररमणीयापि, परिजनं दुनोति । नाभिनन्दित कौलिकलाः, केवलं कमलायमानकान्तहृत्पर्यस्तगण्डमण्डला दिवसानि गमयति । अपिच । विकसितारविन्दमकरन्दमधुबिन्दुसन्दोहवाहिना, मदनोद्यानपर्यन्तमारुतेनोत्साम्यति । यत्र तस्मिन् वासन्तदिवसे, निजमहोत्सवाभ्युदयदर्शनप्रतिपन्नरूपस्य भगवतः कामस्येव, कामकामनालङ्कारकारिणस्तस्य, विविधविभ्रमाभिरामममनुरूपानुरागानुबन्धमहार्घीकृतयौवनारम्भमन्योन्यदृष्टिविनिपातवञ्चनावसरखिद्यमानचित्तत्वरमाणकौतुकं, समुल्लसितसाध्वसस्खलन्मन्थरावयवप्रतिलग्नस्वेदपुलकोत्कम्पसुन्दरं, आनन्दितसखीजनं, प्रियसख्या परस्परावलोकनसुखं समासादितं ; ततःप्रभृति, सविशेषदुःसहायासविजृम्भमाणोद्दामदेहदाहदारुणं दशापरिणाममनुभवन्ती मुहूर्त्तमात्रसम्प्राप्तपूर्णचन्द्रोदया वालकमलिनीव म्लायति । तथापि अ, मुहूर्त्तमात्रहृदयविनिहितनिजवल्लभसमागमा निर्भरस्खलितासारसिच्यमानेव मेदिनी शीतलायत इति जानामि । येन प्रस्फुरत्कान्तदशनकुड्मलदन्तमौक्तिकावलिकान्तिसविशेषशोभितं, निरन्तरोल्लसितपुलकपल्लवकपोलघूर्णमानसन्ततानन्दवाष्पस्तवकमीषद्विकसितनिस्यन्दतारोत्तानमदनमुकुलायमाननेत्रनीलोत्पलं, अविरलोद्भिन्नस्वेदजलविन्दुसुन्दरललाटपट्टं, नवचन्द्ररेखामनोहरं, मुग्धमुखपुण्डरीकमुद्वहन्ती विदग्धसहचरीचित्तसंशयितकौमारभावा भवति । किञ्च । उद्दामग्रन्थिमयूख निकुरम्बचुम्बितप्रहसन्निस्यन्दचन्द्रमणिहारधारिणी, कर्पूरपूरसविशेषशिशिरचन्दनरसकूटासारनिकरदन्तुरितवालकन्दलीपल्लवसंवाहनादिव्यापारत्वरमाणसहचरीसार्थविरचितोपनीतवालकमलिनीदलजलार्द्रशयनीये उद्विद्रा, रजनीर्गमयति । कथमप्युपलब्धनिद्रासुखा खेदप्रहृतपादपल्लवोद्वान्तपिण्डालक्तकरसा, थरथरायमानपीवरोरुमूलवासविसंवादिनीविबन्धना, उत्सरत्खलमानहृदयान्तरोत्तरङ्गनिश्वास-

---

* विफलमिति क्वचित्पाठः । विशिष्टं फलमिति च तद्व्याचक्षते ।

† एतदवस्यया मरणमध्यस्याः सम्भाव्यतइति भावः ।

Digitized by Google

माध । स्थानएव क्लान्तासो भगवत्याः ।

काम । अहो ! प्रमादः ।

प्रकृतिललितमेतत्सौकुमार्यैकसारम्
वपुरयमपि सत्यं दारुणः पञ्चबाणः ।
चलितमलयवातोद्भूतचूतप्रसूनः,
कथमयमपि कालश्चारुचन्द्रावतंसः * ।।

सवं । अस्सस्स, जाणिदं भोदु भअवदीए । एदं माहवपडिच्छन्दसणाहं चित्तफलअं । मालत्याःस्तनांशुकमपनीय दर्शयति । एसावि तस्सज्जेव सहत्थविरइदेत्ति कंठावलम्बिदा वउलमाला जीवणं पिअसही एत्ति (१) ।

विषमसमुच्छ्वसत्स्थूलपयोधरोपरिनिहितवेपमानभुजलतावेष्टबन्धना झटिति प्रतिबोधवेलाविसर्जितोद्विग्नदृष्टिविनिपातविज्ञातशून्यशयनीयसञ्जातमोहमीलल्लोचना, ससम्भ्रमसखीजनप्रयत्नप्रतिपन्नमूर्च्छाविच्छेदसमयसंगतदीर्घनिश्वासखेदजीविता, किंकर्त्तव्यतामूढतयाप्रथमप्रार्थितनिजजीवितावसानं । दुर्व्वारदैवविलसितोपालम्भमात्रव्यापारमस्माद्दृशं जनं करोति, तत्प्रेक्ष्यतां भगवती, एतेषु तावल्लावण्यभूविष्टनिर्म्माणपरिप्लवेष्वङ्गेषु दारुणविजृम्भितस्य कियच्चिरं क्रूरलावण्यता अस्यास्य भविष्यति । कथञ्च दूरमानि रमणकौलिकलङ्कोपोपरागपल्लवितकेरलीकपोलकोमलोद्वेल्लद्विमलचन्द्रिकोद्दामदलिततिमिरावरणानि विभावरीमुखानि । एते च उल्लसितदुग्धसिन्धुपूरधवलोज्वलज्योत्स्नाजलप्रक्षालितगगणांगणाः परिगलितपाटलवकुलनिर्म्मथनबहलपरिमलोद्गारसंवलनसङ्कटमांसलायमानमलयमारुतोद्भूमायितदशदिङ्मुखावसन्नरजनीपरिणाहा अनर्थकारिणो भविष्यन्ति प्रियसख्याइति । विसंवादीत्यत्र विसंकुलइति क्वचित्पाठः । केरली केरलस्त्री ।

(१) अन्यत्र । ज्ञातं भवतु भगवत्या । एतन्माधवप्रतिच्छन्दकसनाथं चित्रफलकं । एषापि तस्यैव स्वहस्तविरचितेति कण्ठावलम्बिता वकुलमाला जीवितं प्रियसख्या इति ।

---

* तदेवंविधेऽनर्थहेतौ कथमियं जीविष्यतीत्यहो प्रमादः ।

Digitized by Google

माध० । सस्पृहं ।

जितमिवभुवने त्वया यदस्याः, सखि वकुलावलि! वल्लभासि जाता ।
परिणतविसकाण्डपाण्डुमुग्धस्तनपरिणाहविलासवैजयन्ती * ॥

नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।

पुनर्नेपथ्ये । रे रे सङ्करघराधिवासिणो जणवदा! सोक्खं जोव्वणारम्भ-गव्व-सम्भरिद-दुव्विसहामरिस-रोस-वड्ढिअर-वलामोडि-विहडिदुद्दाडिद-लोहपञ्जर-पंडिअद्ध-सिङ्खला-णिरोह-पडिभङ्ग-संङ्खलिद-णिअ-लीला-विलास-पेरन्तुद्देल्लन्त-वड्ढलुत्तङ्ग-लङ्गल-विअड-वैजअन्तिआ-डम्बरुद्दाम-सरीर-सन्निवेसो, मडाद्दो-अवक्कमिअ, तक्खण-सतिक्ख-कवलिदाणेअ-देहि-देहा-वयव-मज्झ-णिट्ठुर-अत्थि-खण्ड-टङ्कार-कडकडाअन्त-करअन्त-कठिण-दाढा-कराल-मुहकन्दरो, पअण्ड-वज्ज-णिग्घाअ-दारुण-चवेडामोडण-पाडिदाणेअ-णर-तुरङ्गजंगल्लुग्गार-भरिद-गल-गुहा-मग्ग-गम्भीर-घग्घरो-रल्लिगल्लूरणसद्द-संदब्भ पडिरवाभोअ-भीसिद-णट्ठ-विट्ठाबिद्दासेस-जण-णिवहो, कटोर-णहर-कप्पर-क्कमण-णिहअ-दारिद-जन्तुणग्गा-प्पउत्त-रत्त-कद्दमिअ-गद्दवहो, दुट्ठसद्दूलोकु णिअ-कअन्त-लीलाद्दंकरेदि, ता रक्खध अधासत्तीए अप्पजीविदंत्ति । प्रविश्य बुद्धरक्षिता सत्रासं । परित्ताअध, एसा णो णिअसही अमअणन्दणस्स बहिणिआ मदअन्तिआ, एदिणा दुट्ठसद्दूलेण विणिहदविद्दाविअसेसपरिअणा अहिट्ठवीअदि (१) ।

(१) रे रे शङ्करघट्टवासिनो जनपदा ! एष खलु यौवनारम्भगर्वसंभृत-दुर्विषहामर्षरोषव्यतिकरबलात्कारविघटितोद्घाटितलोहपञ्जरप्रतिबद्धशृङ्खलानि-

* परिणतः प्रौढो यो विसकाण्डो मृणालदण्डस्तद्वत्मुग्धो मनोहरो यः स्तन परिणाहः स्तनविस्तारस्तस्यविलासपताकेव । अत्र ईर्षाख्योव्यभिचारिभावो वल्लभासि जातेत्यादिपदद्योत्यः । तथाच मालत्यालिङ्गनं तव सम्यङ्न ममेति भावः ।

Digitized by Google

माल । लवङ्गिए ! अहो प्पमादो ।

माध । ससंभ्रममुत्थाय । सुन्दरि ! क्वासौ ।

माल । दट्ठा सहर्षसाध्वसं आत्मगतं । अम्महे! एसोवि अत्थज्जेव्व ।

माध । स्वगतं । कान्त! पुण्यवानस्मि, यदहमतर्कितोपनतदर्शनोल्लसितलोचनयानया ।

रोधप्रतिभङ्गसङ्कुलितनिजलीलाविलासपर्यन्तोद्देशदुच्छलदृहलोत्तुङ्गलाङ्गलविकट-वैजयन्तिकाडम्बरोद्दामशरीरसन्निवेशो, मठादपक्रम्य, तत्क्षणसंहृष्टकवलितानेकदेहिदेहावयवमध्यनिष्ठुरास्थिखण्डटङ्कारकटकटायमानकरपत्रकठिनदंष्ट्राकरालमुखकन्दरः, प्रचण्डवज्रनिर्घातदारुणघर्घटोत्पाटनोद्भवकवलितानेकनरतुरङ्गजाङ्गलोद्धारपरिवर्तगलद्रुहागर्भगम्भीरघर्घरोरल्लिगल्लुरणशब्दसन्दर्भप्रतिरवाभीषितनष्टनिष्ठापितग्रेषजननिवहः, कठोरनखरकर्परोत्क्रमणनिर्दयदारितजन्तुगात्रावयवप्रवृत्तरक्तकर्दमितगतिपथो, दुष्टशार्दूलः, कुपितकृतान्तलीलायितं करोति । तदुच्यतां यथाशक्ति प्रियसख्या मदयन्तिकाया जीवितमिति । परित्रायध्वं, एषा नः प्रियसखी अकाण्डनन्दनस्य भगिनी मदयन्तिका, एतेन दुष्टशार्दूलेन विनिहतविद्रावितात्रेयपरिजनाभिभूयते । यौवनारम्भगर्वेण सम्भृतौ प्रबद्धौ यौ दुर्विषहामर्षक्रोधौ । स्थिरः क्रोधएवामर्षः । यदाह 'क्रोधः कृतापराधेषु स्थितोऽमर्षइति स्थितः । प्रतिकूलेषु तैस्तस्य प्रबोधः क्रोधउच्यते' । तयोर्व्यतिकरेण मिलनेन यो बलात्कारस्तेन विघटितो विमुक्तबन्ध उद्घाटितो भग्नो यो लोहपञ्जरस्तत्प्रतिबद्धदुष्टशार्दूलनिरोधप्रतिभङ्गेन संकुलिता या निजलीला तद्विलासपर्यन्ते उद्देशान् कम्पमानोयोद्धृहलोत्तुङ्गलाङ्गलः स एव विकटवैजयन्तिका भयङ्करपताका तस्या आडम्बरेण उद्दामः । उद्दामरइति पाठे उद्धताकारो भयङ्करोवा । शरीरसन्निवेशो यस्य तथोक्तः । तत्क्षणं संहृष्टं कवलिता ये अनेकप्राणिदेहावयवास्तेषांमध्ये कठोराणि यान्यस्थीनि तेषां खण्डे खण्डने यट्टङ्कारोध्वनिभेदस्तेन कटकटायमानाः करपत्रवत्कठिना या दंष्ट्रास्ताभिः करालो भीषणो मुखकन्दर आस्यकुहरं यस्य सः । जाङ्गलोद्धारेण । मांसोद्धारेण निष्ठापितो निष्ठापर्यन्तं प्रापितो ।

Digitized by Google

अविरलमिव दान्ता पौण्डरीकेण नद्धः,
स्खपित इव च दुग्धस्रोतसां निर्भरेण * ।
कवलित इव क्षत्स्वच्छया स्फारितेन,
प्रसभमसृतवर्षेणेव सान्द्रेण सिक्तः ।।

बुद्ध । महाभाग ! उज्झाण-वाहिरत्था-मुहे ।

माधवः साटोपं परिक्रामति ।

कामं । वत्स ! अप्रमत्तो भूत्वा विक्रमस्व ।

माल । जनान्तिकं । लवङ्गिए ! हद्धी ! हद्धी ! संसऊ क्खु जादो । सर्वाः स्खलितं परिक्रामन्ति ।

माध । अये दृष्टा सवीभत्सं । अहह !

संसक्तत्रुटितविवर्त्तितान्त्रजालव्याकीर्णस्फुरदपतत्तरुण्डखण्डः ।
कीलालव्यतिकरगुल्फदग्नपङ्कः प्राचण्डंव्रजति नखायुधस्य मार्गः †॥

अहो प्रमादः ।

वयं वत विदूरतः क्रमगता पशोः कन्यका ।

सर्वाः । हा मदयन्तिए !

कामन्दकीमाधवौ सहर्षाकूतं ।

कथं तदभिपातितादधिगतायुधः पूरुषात् ।
कुतोऽपि मकरन्द एत्य सहसैव मध्ये स्थितः ।।

इतरा । साङ्क, महाभाग ! माङ्क ।

---

* निर्भरेणेत्यत्र निर्झरेणेति क्वचित्पाठः ।

† नखायुधस्य व्याघ्रस्य मार्गः प्राचण्डं रौद्रत्वं वहति । संसक्तेन अन्योन्यमिलितेन त्रुटितेन छिन्नेन विवर्त्तितेन उपर्य्युपरि तिर्य्यक् पतितेन अन्त्रजालेन व्याकीर्णानां व्याप्तानां । सद्योहतत्वात् स्फुरतामुल्लतां अपतत्तनां अधोमुखानां रुण्डानां कबन्धानां । खण्डाः यस्मिन् कीलालव्यतिकरेण रक्तसङ्गेन गुल्फदग्धो गुल्फपरिमाणः पङ्को यस्मिन् ।

Digitized by Google

कामन्दकीमाधवौ । सभयं ।—दृढञ्च पशुना हृतः ।

इतरा: । अय्याहिदं ! अय्याहिदं ! ।

कामन्दकीमाधवौ । सहर्षं ।—प्रमथितश्च दंष्ट्रायुधः ।

इतरा: । सानन्दं । दिट्ठिआ परिहदं दुज्जादं (१) ।

कामं । साकूतं । कथं व्यालनखरप्रहारनिःसृतरक्तप्रवाहः, क्षितितलनिषक्तखड्गलतावष्टम्भनिश्चलः, संभ्रान्तमदयन्तिकावलम्बितस्याम्यतीव वत्सो मे मकरन्दः ।

इतरा: । हद्धी ! हद्धी ! गाढप्पहारदाए क्किलम्मदि महाभागो (२) ।

माध । कथं प्रसुप्त एव । कामन्दकीं प्रति । भगवति ! मां परित्रायस्व ।

कामं । अतिकातरोसि । तदेहि तावत्पश्यावः ।

इति परिक्रम्य निष्क्रान्ताः सर्वे ।

इति मालतीमाधवे शार्दूलविद्रावणोनाम तृतीयोऽङ्कः ।

---

(१) दृष्ट्या प्रतिहतं दुर्ज्ञातं ।

(२) हा धिक् ! हाधिक् ! गाढप्रहारतया क्लाम्यति महाभागः ।

Digitized by Google

चतुर्थोऽङ्कः ।



ततः प्रविशतो मदयन्तिकालवङ्किकाभ्यामवलम्बितौ प्रमुग्धौ माधवमकरन्दौ, सम्भ्रान्ता कामन्दकी मालती बुद्धरक्षिता च ।

मद० । **पसीद भअवदि ! परित्ताहि परित्ताहि मदअन्तिआणिमित्त-संसइद-जीविदं आवण्णजणाणुकम्पिणं महाभागं** (१) ।

इतराः । **हञ्जे ! हञ्जे ! किं दाणिं अच्छीहिं एत्थ पेक्खिदव्वं ।**

कामन्दकी । उभौ कमण्डलूदकेन सिञ्चा । **ननु भवत्यः पटाञ्चलेन वत्सौ वीजयन्तु ।** मालत्यादयस्तथा कुर्वन्ति ।

मक० । समाश्वस्यावलोक्य च । **वयस्य ! कातरोऽसि, किमेतत्, ननु स्वस्थ एवास्मि ।**

मद० । सहर्षं । **अम्महे ! पडिबुद्धं दाणिं मअरन्दपुण्णिमाअन्देण** (२) ।

माल० । माधवस्य ललाटे हस्तं दत्वा । **सहि लवङ्गिए ! दिट्ठिआ वड्ढसि, णं भणामि, पडिबुद्धोज्जेव्व दे पिअवअस्सो, पडिवण्णचेअणो महाभागो मअरन्दोत्ति** (३) ।

माध० । आश्वस्य । **वयस्य ! साहसिक ! एह्योहि ।** इत्यालिङ्गति ।

कामं० । उभौ शिरस्याघ्राय । **दिट्ठ्या जीवितवत्सास्मि ।**

इतराः । **पिअं पिअं णो संवुत्तं ।** सर्वा हर्षं नाटयन्ति ।

---

(१) प्रसीद भगवति ! परित्रायस्व, परित्रायस्व, मदयन्तिकानिमित्तसंशयितजीवितमापन्नजनानुकम्पिनं महाभागं ।

(२) आश्चर्यं ! प्रतिबुद्धमिदानीं मकरन्दपूर्णिमाचन्द्रेण ।

(३) सखि लवङ्गिके ! दिष्ट्या वर्द्धसे, ननु भणामि, प्रतिबुद्ध एव ते प्रियवयस्यः, प्रतिपन्नचेतनो महाभागो मकरन्द इति ।

Digitized by Google

बुद्ध । जनान्तिकं । सहि मदअन्तिए ! एसोज्जेव्व सो ।

मद । तदैव ज्ञातं मया, यथा एषो महाभागो माधवः, अयमपि स जन इति (१)।

बुद्ध । अवि, सच्चवादिणी अहं ? ।

मद । ण क्खु अण्णारिसेसु तुल्लारिसीओ पक्खवादिणीओ होन्ति । माधवमवलोक्य । सहि! मालदीएवि रमणीओ दूमणिं महाणुहावे अणुरायप्पवाहो (२)।

पुनर्मकरन्दमेव सस्पृहमवलोकयति ।

काम । स्वगतं । रमणीयोर्ज्जितं हि मदयन्तिकामकरन्दयोरेवाद्य दर्शनं । प्रकाशं । वत्स मकरन्द ! कथं पुनरायुष्मानस्मिन्नवसरे मदयन्तिकाजीवितत्राणहेतोर्भवता दैवेन सन्निधापितः ।

मक । अद्याहमन्तर्नगर एव कांश्चिद्वास्तव्यानुपश्रुत्य, माधवस्य चित्तोद्वेगमधिकमाशङ्कमानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानदृष्टान्तः, परापतन्नेव शार्दूलशावस्कन्दगोचरगतामेतामभिजातकन्यकामभ्युपपन्नवानस्मि । मालतीमाधवौ विलक्षतः ।

काम । स्वगतं । दृष्टेन खलु मालतीप्रदानेन भवितव्यं । प्रकाशं । वत्स माधव ! दिष्ट्या सुहृदुद्वाहवाञ्छितोसि मालत्याः, तदत्र मवसरः प्रीतिदायस्य ।

माध । भगवति ! दूयंहि ।

यद्बालव्रणितसुहृत्प्रमोहसुग्धं सौजन्याद्विहितवती गतव्यथं मां ।

---

(१) तदेव ज्ञातं मया, यथा एष महाभागो माधवः, अयमपि स जन इति ।

(२) न खल्वन्याङ्गनेषु युष्मादृक्षाः पक्षपातिन्योभवन्ति । सखि ! मालत्या अपि रमणीयएवास्मिन् महानुभावेऽनुरागप्रवादः ।

Digitized by Google

तत्कामं प्रभवति पूर्णपात्रतया स्वीकर्तुमम हृदयञ्च जीवितञ्च ॥

सर्वं । पडिच्छिदो क्खु णो पिअसहीए अअं पसादो (१) ।

मद । सगतं । जाणादि महाभागधेओ जणो अवसरे रमणिज्जं मन्तिदुं (२) ।

माल । सगतं । किं णाम मअरन्देण उल्लेअणआरणं सुदं भविस्सदि ? (३) ।

माध । वयस्य ! का पुनर्ममाधिकोद्वेगहेतुर्वार्त्ता ?

प्रविश्य पुरुषः । वत्से मदयन्तिके ! भ्राता ते ज्यायानमात्यनन्दनः समादिशति, अद्य परमेश्वरेणाक्रन्दनमरणत्र, यूरिव सोरुपरि परं विश्वासमस्मासु च प्रसादमाविष्कुर्वता, स्वयमेव प्रतिपादिता मालती, तदेहि सम्भावयामः प्रमोदमिति ।

मक । वयस्स सेयं वार्त्ता । मालतीमाधवौ वैचित्यं नाटयतः ।

मद । मालतीं सगर्भमालिङ्ग्य । सहि मालदि ! तुमं क्खु एक्कणअरणिवासेण सहपंसुकीलणादो पहुदि मे पिअसही आसि वहिणिआ अ, सम्पदं पुणो वरस्स मरुअणं जादासि (४) ।

कामं । वत्से मदयन्तिके ! दिष्ट्या वर्द्धसे भ्रातुर्मालतीलाभेन ।

मद । भअवदि ! तुम्हाणं आसिसाम्पदावेण, सहि लवङ्गिए ! फलिदा णो मणोरहा तुम्हाणं लाहेण (५) ।

---

(१) प्रतीष्टः खलु नः प्रियसख्या अयं प्रसादः ।

(२) जानाति महाभागधेयो जनोऽवसरे रमणीयं मन्तितुं ।

(३) किं नाम मकरन्देनोद्वेगकारणं श्रुतं भविष्यति ? ।

(४) सखि मालति ! खल्वेकनगरनिवासेन सहपांशुक्रीडनात् प्रभृति मे प्रियसखी आसीः, भगिनिका च, साम्प्रतं पुनर्वो स्नुषस्य मरुतं जातासि ।

(५) भगवति ! युष्माकमाशीःप्रसादेन, सखि लवङ्गिके ! फलिता नो मनोरथा युष्माकं लाभेन । फलिष्यन्त्यत्र भाविष्यन्तीति क्वचित्पाठः ।

Digitized by Google

सखी । सखि ! किं आत्मानमपि अत्र मन्तिदव्यं (१) ।

मद । एहि बुद्धरक्षिते! दाणिं विवाहमङ्गलं सम्भावेम्ह ।

बुद्ध । सखि! गच्छाम । दूरमुत्क्षिप्तः ।

सखी । भगवति ! अथवा एते हृदयभरितोद्भूतविज्ञानानन्दसुन्दरा-न्दोलितधीरत्व-मनोहराः परिघर्षन्ते मदयन्तिकामकरन्दयोर्दरदलितनीलोत्पलदामसदृक्षाः कटाक्षविक्षेपाः तथा तर्कयामि मनोरथसिद्धिमुत्तरसम्बन्धा एवेति (२) ।

बालं । विदूषक । नन्वहं दूरौ विलोकनेन मानसं मुग्धमुग्धः प्रमोदमनुभवन्नः ।

तथाहि । दूरोन्मिर्यग्व्यलितविषमं कुञ्चितप्रान्तमेत-
त्तोमोद्वेल्लिमितखचितं किञ्चिदारेचितभ्रु ।
जातस्तोदानुभवमदृशं खञ्जनिष्कम्पपक्ष्म
स्त्रीणां शंसत्यविरलजनव्योर्दृष्टमालोकराग्यं * ।।

पुरुषः । इतः इतः ।

मद । सखि बुद्धरक्षिते ! अपि नाम पुणो वि दाव दीसइ एस जीविदप्पदो पुण्डरीअलोअणो ? (३) ।

---

(१) सखि ! किमत्मानमप्येतन्मन्त्रयितव्यं ।

(२) भगवति ! यथा एते हृदयभरितोद्भूतविज्ञानानन्दसुन्दरान्दोलितधीरत्व-मनोहराः परिघर्षन्ते मदयन्तिकामकरन्दयोर्दरदलितनीलोत्पलदामसदृक्षाः कटाक्षविक्षेपाः तथा तर्कयामि मनोरथसिद्धिमुत्तरसम्बन्धा एवेति ।

(३) सखि बुद्धरक्षिते ! अपि नाम पुनरपि तावत् दृश्यते एष जीवितप्रदः पुण्डरीकलोचनः ? ।

---

* किञ्चिदारेचिते भ्रुवौ यत्र तत् । आकुञ्चितपुटापाङ्गकृष्टितर्द्धनिमेषिणी मुग्ध्यादुत्तरा या दृष्टिरालोकरागा स्मृता ।

Digitized by Google

बुद्ध। जदू दैवमणुकूलं भविस्सदिति। पुरुषेण निष्क्रान्ते।

माध। अपवार्य्य।

चिराद्याशातन्तु* त्रुटतु विसिनीसूत्रभिदुरो,
महानाधिव्याधिर्निरवधिरिहानीं प्रसरतु।
प्रतिष्ठामव्याजं व्रजतु मयि पारिप्लवधुरा,
विधिः स्वास्थ्यन्वक्तां, भवतु कृतकृत्यश्च मदनः॥

अथवा। समानप्रेमाणं जनमसुलभं प्रार्थितवतो,
विधौ वामारम्भे मम खलु धिषेषा परिणतिः।
तथाप्यस्मिन्दानश्रवणसमयेऽस्याः प्रविगल-
त्प्रभं प्रातश्चन्द्रद्युतिवदनमन्तर्दहति मां।

कामं। स्वगतं। एवमतिदुर्म्मनायमानः पीडयति मां वत्सो माधवो, वत्सा मालती च दुष्करं निराशा प्राणिति। प्रकाशं। पृच्छामि तावदायुष्मन्तं, अपि भवानमंस्त यथा भूरिसुरेव मालतीमस्मभ्यं दास्यति?।

माध। सलज्जं। नहि नहि।

कामं। तर्हि प्राणवस्थायाः परिहीयसे?

मक। भगवति! दत्तपूर्व्वेत्याशङ्कते।

कामं। जानासि तां खलु वार्त्तां, इदन्तु प्रसिद्धमेव, यथा मन्दनाय मालतीं प्रार्थयमानं भूरिवसुर्नृपतिमुक्तवान्, प्रभवति निजस्य कन्यकाजनस्य महाराज इति।

मक। अस्त्येतत्।

कामं। अद्यैव स्वयं राज्ञैव दत्ता मालतीति पुरुषेणावेदितं, तदत्स! हृदि प्रतिष्ठानिबन्धनानि देहिनां व्यवहारतन्त्राणि,

* आशातन्तुर्मालतीप्राप्त्याशारूपहृदयावलम्बनं त्रुटतु भिद्यतां।

Digitized by Google

वापि पुण्यापुण्यहेतवो व्यवस्थिताः, सर्व्वत्र वचनानामाधक्यं, सा च भूरिवसोर्व्वागदतालिकैव, न खलु मद्धाराजस्य मालती निजा कन्यका, कन्याप्रदाने च नृपतयः प्रमाणमिति नैवंविधो-धर्म्माचारसमयः,* तस्माद्विमर्शितव्यमेतत्, कथय, वत्स! मामनवधानां मन्यसे । पश्य ।

मा वा सपत्नेष्वपि नाम तङ्कृत्यापं यदस्यां त्वयि वा विशङ्कसे ।
तत्सर्व्वथा सङ्गमनाय यत्नः प्राणव्ययेनापि मया विधेयः ।।

मक । सुष्ठु युज्यमानमादिश्यते युष्माभिः ।

अपिच । दृया वा, स्नेहो वा, भगवति! निजेऽस्मिन् शिशुजने,

भवत्याः संसाराद्विरतमपि चित्तं द्रवयति ।
अतश्च प्रव्रज्यासमयसुलभाचारविमुखः,
प्रसक्तस्ते यत्नः प्रभवति पुनर्दैवमपरं ।।

नेपथ्ये । भअवदि कामन्दइ! एसा भट्टिणी विण्णवेदि, जधा मालदीं घेउण तुरिदमाअच्छदुत्ति (१) ।

कामं । वत्से! उत्तिष्ठ । सर्व्वेऽत्तिष्ठन्ति ।

मालतीमाधवौ मकरन्दानुरागमन्योन्यमवलोकयतः ।

माध । स्वगतं । कष्टमेतावती लोकयात्रा मालत्या समं माधवस्य, अहो नु खलु भोः ।

सुहृदिव प्रकटोऽप्यसुखप्रदः प्रथममेकरसामनुकूलतां ।
पुनरकाण्डविवर्त्तनदारुणो विधिरहो विघिनष्टि मनोरुजं ।।

(१) भगवति कामन्दकि! एषा भट्टिनी विज्ञापयति, यथा मालतीं गृहीत्वा त्वरितमाच्छेति ।

* धर्म्माचारसमयो धर्म्माचारसिद्धान्तः । समयाः शपथाचारकालसिद्धान्तसंविदइति विश्वः ।

Digitized by Google

माल । स्वगतं । महाभाग ! सौम्यगात्र ! एतिकं दिट्ठोसि।

सखं । हद्धी! हद्धी! शरीरसंशयं येव्व णो प्रियसखी आरोविदा अम्हेण (१) ।

माल । परिणदं दाणीं जीविदतिण्हाए एलं । सखं । णिल्लूढं अ णिक्करुणदाए तादस्सवि कावालिअत्तणं, पडिट्ठिदो दुट्ठदैवस्स दारुणसमारम्भसरिसो परिणामो, कं एत्थ उवालब्भामि मन्दभाइणी, कं वा असरणा सरणं पडिवज्जामि (२) ।

सखं । सहि हृदो हृदो । इति निःक्रामन्ति ।

माध । स्वगतं । नूनमाश्वासनमात्रमेवैतत् माधवस्य सहजस्नेहकातरा करोति भगवती । सोद्वेगं । हन्त सर्व्वथा संशयितजन्मसाफल्यः संवृत्तोऽस्मि, तत्किमिदानीं कर्त्तव्यं । विचिन्त्य । न खलु मद्दामांसविक्रयादन्यदुपायान्तरं पश्यामि । प्रकाशं । वयस्य ! मकरन्द ! अयि भवानुत्कण्ठते मदयन्तिकायाः ?

मक । अथ किं ।

तन्मे मनः क्षिपति यत्सरसप्रहार-
मालोक्य मामगणितस्खलदुत्तरीया ।
त्वत्तैकहायनकुरङ्गविलोलदृष्टि-
राश्लिष्टवत्यमृतसम्बलितैरिवाङ्गैः ॥

माध । सुलभैव बुद्धरचिताप्रियसखी भवतः ।

---

(१) हा धिक्, हा धिक्, शरीरसंशयमेव नः प्रियसखी आरोपिताऽनात्मेन ।

(२) परिणतमिदानीं मे जीविततृष्णायाः फलं । निर्व्यूढञ्च निष्करुणतया तातस्यापि कापालिकत्वं, प्रतिष्ठितो दुष्टदैवस्य दारुणसमारम्भसदृशः परिणामः, कमिहोपालभे मन्दभागिनी, कं वा अशरणा शरणं प्रतिपद्ये । कापालिकत्वं नृशंसता ।

Digitized by Google

अपिच । प्रमथ्य क्रव्यादं मरणसमये रक्षितवतः
परिष्वङ्गं लब्ध्वा तव, कथमिवान्यत्र रमतां ।
तथा च व्यापारः कमलनयनाया नयनयो-
स्त्वयि व्यक्तस्नेहस्त्रिमितरमणीयश्चिरमभूत् ।।

मक । ततुत्तिष्ठ पारास्मिन्सुसम्भेद * मवगाह्य, नगरीमेव प्रविशावः । उत्थाय परिक्रामतः ।

माध । अयमसौ महानद्योः सम्भेदः य एषः ।
जलनिबिडितवल्लव्यक्तनिम्नोन्नताभिः
परिगततटभूमिः स्नानमात्रोत्थिताभिः ।
रुचिरकनककुम्भश्रीमदाभोगतुङ्ग-
स्तनविनिहितहस्तास्वस्तिकाभिर्वधूभिः ।।

इति निष्क्रान्ताः सर्वे ।

चतुर्थोऽङ्कः समाप्तः ।

---

* पारा सिन्धुश्च नदीभेदौ तयोः सम्भेदः सङ्गमः ।

Digitized by Google

पञ्चमोऽङ्कः ।

ततः प्रविश्याकाशयानेन भीमघोण्टला कपालकुण्डला ।

कपा । षडधिकदशनाडीचक्रमध्यस्थितात्मा,
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।
अविचलितमनोभिः साधकैर्ध्यायमानः,
स जयति परिणद्धः शक्तिभिः शक्तिनाथः * ।

इयमहमिदानीं

नित्यं न्यस्तषड्ङ्गचक्रनिहितं हृत्पद्ममध्योदितं,
पश्यन्ती शिवरूपिणं लघवशादात्मानमभ्यागता ।
नाडीनामुदयक्रमेण जगतः पञ्चात्मतार्कर्षणा-
दभ्राम्नोत्पतनश्रमा विघटयन्त्यग्रे नभोऽम्भोमुचः † ।

अपिच । उल्लोल-स्खलित-कपाल-कण्ठमाला-
संघट्ट-क्वणित-कराल-किङ्किणीकः ।

---

* अविचलितं विषयान्तरव्याहृत्तं मनो येषान्तैः साधकैर्ध्यायमानः अन्विष्यमाणः । शक्तिभिर्ब्राह्मीमाहेश्वर्यादिभिरष्टाभिः परितो नद्धो वेष्टितः । शक्तिभिर्ज्ञानेच्छाप्रयत्नात्मिकाभिर्नद्ध उपचित इति केचित् । जयति सर्वोत्कृष्टतया वर्त्तते ।

† न्यस्तानि देहे मन्त्रन्यासेनार्पितानि यानि षड्ङ्गानि हृदयशिरःशिखा-नेत्रादीनि तेषां चक्रे समूहे निहितमारोपितं । नित्यन्यस्तेति पाठे नित्यं प्रत्यहं न्यस्तानीत्यर्थः । लघवशाच्चित्तैकाग्र्यतया । नाड़ीनामीड़ापिङ्गलादीनामुदयक्रमेण वायुपूरणपरिपाट्या, जगतः शरीरस्थ पञ्चभूतात्मकस्य, पञ्चात्मतानां पृथिव्यप्तेजोवायुाकाशानां यदाकर्षणं तस्मादभ्राम्न उत्पतनेन आकाशयानेन श्रमो यथा सा । अग्रे नभ इत्यत्र अग्रेभुव इति पाठे पुरोवर्त्तिन इत्यर्थः ।

Digitized by Google

पर्य्याप्तं मयि रमणीयडामरत्वं, *
सम्पन्ने गगनतलप्रयाणवेगः ।।

तथाहि । विध्वग्वृत्तिर्जटानां प्रचलति निबिडग्रन्थिबन्धोऽपि भारः,
संस्कारक्षामदीर्घं पटुरटति लतावृत्तिखट्वाङ्गघण्टा ।
ऊर्ध्वं धूनोति वायुर्विहतगगनधिरःश्रेणिकृष्णेषु गुच्छ-
न्युत्तालः किङ्किणीनामनवरतरणत्कारहेतुः पताका ।।

परिक्रम्यावलोक्य च गन्धमाघ्राय । दूरं तावत्पुराणनिम्बतैलाक्त-परिभव्यमानरसोनगन्धिभिश्चिताधूमैः पुरस्तादिभावितस्य गहनः श्मशानवाटस्य † नेदीयः करालायतनं, यत्र पर्य्यवसितमन्त्रसाधनस्याक्षतुरोरघोरघण्टस्याज्ञया सविशेषमद्यपूजासम्भारो मया सन्निधापनीयः, कथितञ्च मे गुरुणा, वत्से कपालकुण्डले ! अद्य भगवत्याः करालायाः प्राग्नुपयाचितं स्त्रीरत्नमुपहर्त्तव्यं । तदत्रैव नगरे विहितमास्त इति तद्विचिनोमि । सकौतुकमवलोक्य । तत्कोऽयमतिगम्भीरमधुरावृतिः उत्तम्भितकुटिलकुन्तलः, कृपाणपाणिः श्मशानवाटमवतरति ? य एषः ।

कुवलयदलश्यामोऽप्यङ्गं दधत्परिधूसरं,
स्खलितचरणन्यासः क्षीणान्मृगाङ्कनिभाननः ।
हरति विनयं वामो यस्य प्रकाशितसाहसः
प्रविगलदसृक्कृपङ्कः पाणिर्लम्बरजाकुलः ।।

निरूप्य । अये स एष कामन्दकीसुहृत्पुत्रो महामांसस्य पण्डिता माधवः । तत्किमनेन, भवतु समीहितं सम्पादयामि विगलितप्रायश्च पश्चिमसन्ध्यासमयः ।

---

* रमणीयडामरत्वं रमणीयत्वं भीषणत्वञ्च उद्भटत्वं वा कोविसंरम्भनिर्भरत्वमिति केचित् ।

† श्मशानवाटस्य श्मशानमार्गस्य । विभावितस्य अनुमितस्य ।

Digitized by Google

तथाहि सम्प्रति ।

व्योम्नस्तापिच्छरुचावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्य्यन्ताः प्रान्तदृत्या पयसि वसुमती नूतने मज्जतीव ।
वात्यासंवेगविष्वग्विततवलयितस्फीतधूम्याप्रकाण्डं
प्रारब्धोऽपि त्रियामा तरुणयति निजं नीलिमानं वनेषु ।।

परिक्रम्य निष्क्रान्ता । विष्कम्भकः ।

ततः प्रविशति यथानिर्दिष्टो माधवः ।

माध । साम्प्रतं । प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्वस्था मुग्धदृशो निसर्गमधुराश्चेष्टाभवेदुर्मयि ।
यास्वन्तःकरणस्य वाह्यकरणव्यापाररोधी क्षणा-
दाश्लेषापरिकल्पितास्वपि भवत्यानन्दसान्द्रोदयः ।।

किञ्च ।

अतिमुक्तसङ्ग्रथितकेशरावलीसतताधिवाससुभगार्पितस्तनं ।
अपि कर्णजाहृ-* विनिवेशितानन: प्रियया तदङ्गपरिवृत्तमाप्नुयां ।

अथवा । दूरे तावदेतत् दृष्टमेव प्रार्थ्यते ।

सम्भूयेव सुखानि चेतसि परं भूमानमातन्वते,
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः ।
यद्वालेन्दुकलोच्चयादवचितैः सारैरिवोत्पादितं,
तत्प्रश्लेषमनङ्गमङ्गलघटं भूयोऽपि तस्यां सुखं ।।

यत्सत्यमधुना तत्सन्दर्शनेनातिस्खल्योऽपि न विप्रोषः । मम हि सम्प्रति सातिशयप्राक्तनोपलम्भसम्भावितात्मजन्मनः संस्कारस्या-

* कर्णजाहे कर्णमूले । तदङ्गदृत्यत्व तदङ्ग इति क्वचित्पाठः । अवचितैर्दृष्टैः सारैरुत्पादितं अनङ्गस्य मङ्गलार्थं घटं यद्वा मङ्गलघटितं हिरण्यघटितं घटं । यद्वा अनङ्गस्य मङ्गलानामुपचयहेतूनां सौकुमार्य्यादीनां घटं इति जगद्धरः ।

Digitized by Google

नवरतप्रबोधात्प्रतीयमानस्तद्विसदृशप्रत्ययान्तरैरतिरस्कृतप्रवाहः, प्रियतमास्मृतिप्रत्ययोत्पत्तिसन्तानस्तन्मयमिव करोत्यन्तर्दृष्टि-सारूप्यतश्चैतन्यं । तथाहि ।

लीनेव प्रतिविम्बितेव, लिखितेवोत्कीर्णरूपेव च,
प्रत्युप्तेव च, वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासन्ततितन्तुजालनिविड़स्यूतेव लग्ना प्रिया ।।

नेपथ्ये कलकलः ।

माध । अहो ! सम्प्रति प्रगल्भमानकौणपनिकायस्य * महती श्मशानवाटस्य रौद्रता । अस्मिन् हि

पर्य्यन्तप्रतिरोधिमेदुरचयस्थानं चिताज्योतिषा-
मौज्ज्वल्यं परभागतः प्रकटयत्याभोगभीमं तमः ।
संसक्ताकुलकेलयः किलकिलाकोलाहलैः सम्मदा-
दुत्ताला: कटपूतनाप्रभृतयः सांराविणं कुर्व्वते † ।।

भवत्वाघोषयामि तावत् । भोः श्मशाननिकेतनाः कटपूतनाः ! ।

अग्रस्खपूतमव्याजं पुरुषाङ्गोपकल्पितं ।
विक्रीयते महामांसं, गृह्यतां गृह्यामिदं ‡ ।।

पुनर्नेपथ्ये कलकलः ।

---

* कौणपनिकायस्य राक्षससमूहस्य । राक्षसः कौणपः क्रव्यादित्यमरः ।

† परभागतः गुणोत्कर्षाधानात् । कटाः शवाः पुतना श्मशानवासिनो-राक्षसाः तत्प्रभृतयः ।

‡ अग्रस्खपूतं अग्रेखण्डितं अग्रस्थहतमांसस्य रणे सुलभतया तेषामग्राह्यत्वात् । अव्याजमकपटं, यद्वा • दृष्टसिद्धिं पणीकृत्य साहसाद्दुपार्ज्जितं । अग्र-स्खपूतमव्याजमेतन्मांसं विदुर्बुधा इति । मालाङ्कस्तु अव्याजपुरुषाङ्गोपकल्पितमिति पठति ।

Digitized by Google

माध । कथमाघोषणानन्तरमेव सर्वतः समुच्चलदुत्तालवेतालसमुत्रातसुखाव्यक्तकलकलाकुलः प्रचलितदुर्वादिर्भवद्भूतसङ्कटः श्मशानवाटः । आश्चर्यं!

कर्णाभ्यर्णविदीर्णसूक्ष्मविकटव्याहारहीनाग्निभि-
र्दंष्ट्राकोटिविसङ्कटैरितदृतोधावद्भिरालीर्व्यते ।
विद्युत्पुञ्जनिकाशकेशनयनश्मश्रूजटाजालकै-
र्लक्ष्यालक्ष्यविशुष्कदीर्घवपुषां शुल्काशुखानां मुखैः ।।

अपिच । एतत्पूतनचक्रमक्रमलतप्रारब्धमुक्तैर्टका-
मुत्पुच्छाप्परितो दृमांसविषसैराघर्षरं क्रन्दतः ।
खर्जूरद्रुमदग्धजङ्घ-* मसितत्वग्दुर्विभक्षात-
स्त्रासुग्रन्थिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते ।।

समन्तादवलोक्य विहस्य च । अहो प्रकारः पिशाचानां । एतेहि।

ततदृग्दुरसनोग्रमाल्यगर्भं दधति विहार्यं विवर्णदीर्घदेहाः ।
ललदजगरघोरकोटराणां द्युतिमिव दग्धपुराक्षरोहिणानां † ।।

परिक्रम्य । हन्त ! बीभत्समेवाग्रे वर्त्तते ।

उत्कृत्योत्कृत्य कृत्तिं प्रथममथदृषच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि भक्ष्वा ।
आर्त्तैः पर्य्यस्तनेत्रैः प्रकटितदशनैः प्रेतरङ्कैः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमश्नि ।।

अपिच। निष्टप्तस्विद्यदस्थः क्वथनपरिणमन्मेदसः प्रेतकायान्
कृत्वा संसक्तधूमानपि कुणपभुजो भूयसीभ्यश्चिताभ्यः ।

---

* खर्जूरद्रुमपरिमितजङ्घमित्यर्थः ।

† रोहिनो रोहिण इतिख्यातस्तरुः । रोहितापि सएव । अतएव रोहिडः श्लीहनाशकइत्यमरः । रोहणानामिति पाठे तरुणामित्यर्थः ।

Digitized by Google

उत्पक्वस्रंसिमांसं प्रचलदुभयतः सन्धिनिर्मुक्तमारा-
देते निष्कृष्य जंघानलकमुदथिनोर्मज्जधाराः पिबन्ति ।।

विहस्य । अहो ! प्रादोषिकः प्रमोदः पिशाचाङ्गनानां । तथाहि । अन्त्रैःकल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोंऽसभृतः, पिनद्ध सहसा हृत्पुण्डरीकस्रजः ।
एताः प्रोद्गिलितप्रकृष्टकुकुभप्रग्लुपः, सम्भूय कान्तैः पिव-
न्त्यस्थिस्रेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः * ।।

परिक्रम्य पुनरग्रस्थेति पठित्वा । कथं द्रागतिप्रशान्तभीषणभी-
षिकाप्रकारैर्भटित्यपक्रान्तं पिशाचैः । अहो! निःसत्त्वता पिशाचानां । परिक्रम्य दृष्ट्वा सनिर्वेदं । विचित्रश्चैष समन्तात् श्मशानवाटः ।

तथाहि । स्खलियं पुरतएव ।

गुञ्जत्कुञ्जकुटीरकौशिकघटाच्छूत्कारसंवलित-
क्रन्दत्फेरवचण्डडाल्कृतिश्रुतप्राग्भारभीमैस्रटैः ।
अन्तःप्रोद्गिरदङ्गकर्करचयः संरोधशून्यद्रुम-
स्रोतोनिर्गमघोरघर्घरवा पारेश्मशानं सरित् † ।।

नेपथ्ये । हा तात निष्करुण ! एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते (१) ।

(१) हा तात निष्करुण ! एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते ।

* अन्त्रैः कल्पितं रचितं मङ्गलार्थमवैधव्यचिह्नं, प्रतिसरो हस्तसूत्रं कङ्कणं वा-
वैलाः । स्त्रीहस्तएव रक्तोत्पलं तेन व्यक्तं बहुत्वं कर्णभूषणं तद्विभ्रति याः । पिनद्ध परिधाय । कान्तैः सम्भूय पिबन्तीत्यन्वयः ।

† गुञ्जन्तीनां कुञ्जरूपकुटीरवर्त्तिनीनां कौशिकघटानां पेचकसमूहानां च्छूत्का-
रेरूपं संवलितं ध्वनितं, क्रन्दतां फेरवाणां शृगालानां चण्डो डार्ल्कृतिश्चयो-
र्द्वन्द्वः ताभ्यां भृतः यः प्राग्भारस्तेन भीषणैस्तटैरुपलक्षिता ।

Digitized by Google

माध । साकूतमाकर्ण ।

नादस्तावद्विकलकुररीकूजितस्निग्धतार-
श्चिन्ताकीर्णः परिचितदृवस्रोतसंवादमेति ।
अन्तर्भिन्नं भ्रमति हृदयं, विप्लुतत्यङ्गमंगं,
देहस्तम्भः, स्खलति च गतिः, कः प्रकारः, किमेतत् ।।
करालायतनाम्नायमुच्चरत्करुणध्वनिः ।
विभाव्यते ननु स्थानमनिष्टानां तदीदृशं ।।

भवतु, पश्यामि । इति परिक्रामति ।

ततः प्रविशतो देवतार्चनव्यापृतहस्तौ कपालकुण्डलाघोरघण्टौ जवबध्यचिङ्गा मालती च ।

माल । हा ताद णिक्करुण ! एसो दाणिं दे णरेन्दचित्ता-राहणोवअरणो जणो विवज्जई । हा अम्ब ! सिणेहमअ ! हिअए तुमं पि दहासि दे्वदुव्विलसिदेण । हा मालदीमअ-जीविदे ! मम कल्लाणसाहणेअसुहसअलवावारे भअवदि ! चि-रस्स आणाविदासि दुःखं सिणेहेण, हा पिअसहि लवङ्गिए ! सिविणआवसरमेत्तदंसणा अहं दे संवुत्ता (१) ।

माध । हन्त! सैवेयं मदिरेक्षणा, संप्रति निरस्तएव सन्देहः; तदहमपि नामैनां जीवन्तीं सम्भावये । त्वरितं परिक्रामति ।

अघोरघण्टकपालकुण्डले । देवि चामुण्डे! नमस्ते नमस्ते ।

---

(१) । निष्करुण ! एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते, हा अम्बः ! स्नेहमयहृदये त्वमपि हतासि दैवदुर्विलसितेन, हा मालतीमयजीविते ! मम कल्याणसाधनैकशुभसकलव्यापारे भगवति ! चिरस्य ज्ञापितासि दुःखं स्नेहेन ; हा प्रियसखि लवङ्गिके ! स्वप्नावसरमात्रदर्शना अहन्ते संवृत्ता ।

Digitized by Google

सावष्टम्भनिगुम्भनिर्भरनमद्भूगोलनिष्पीडन-
न्यञ्चत्कर्परकूर्मकम्पविगलद्ब्रह्माण्डखण्डस्थिति ।
पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवं
वन्दे नन्दितनीलकण्ठपरिषद्व्याक्लृप्तर्द्धि वः क्रीडितं * ॥

अपिच ।

प्रचलितकरिक्रक्षिपर्य्यन्तचञ्चन्नखाघातभिन्नेन्दुनिस्यन्दमा-
नामृतश्वेतजीवत्कपालावलीमुक्तषण्डाट्टहासत्वसद्भूरिभूतप्रवृत्त-
स्तुति, ध्वस्तदंसितभुजङ्गभोगाङ्कदग्रन्थिनिष्पीडनस्फारफुल्लफणा-
पीठनिर्य्यद्विषज्ज्योतिरुज्जृम्भणोद्दामरव्यक्तविस्तारिदोःषण्डपर्य्या-
सितक्ष्माधरं । ज्वलदनलपिङ्गनेत्रस्फुटाच्छन्नभीमोत्तमाङ्गभ्रमि-
प्रस्तुतालातचक्रक्रियास्यूतदिग्भागमुक्तङ्कखट्वाङ्गकोटिध्वजोद्भूति-
विच्छिन्नतारागणं, प्रमुदितकटपूतनोत्तालवेतालतालस्फुटत्कर्ण-
सम्भ्रान्तगौरीघनाश्लेषहृष्यन्मनस्यम्बकागन्हि, वस्त्राण्डवं, देवि !
भूयाद्भीत्यै च कृत्यै च नः † ॥ इत्यभिनयतः ।

माध० । हा धिक् प्रमादः ।

न्यस्तालक्तकरक्तमाल्यवसना, पाषण्डचाण्डालयोः
पापारम्भवतोर्नगीव वृकयोर्मैरुर्गता गोचरं ।

---

* सावष्टम्भो यो निगुम्भः पादयन्त्रणं तेन निर्भरं नमतो भूगोलस्यावनि-
चक्रस्य निष्पीडनेन न्यञ्चदधोगच्छत् कर्परं पृष्ठास्थि यस्य तथोक्तस्य कूर्मस्य
कम्पेन विगलन्ती भ्रश्यन्ती ब्रह्माण्डखण्डस्य स्थितिर्यत्र तत् । पातालप्रतिमल्लं
पातालसदृशं । नन्दितावां नीलकण्ठपरिषदि व्यक्ता प्रकटा ऋद्धिर्विभवो यस्य तत् ।

† प्रचलितगजासुरचर्म्मपर्य्यन्तेषु चञ्चतामुल्लसतां नखानामाघातैर्भिन्नादिन्दो-
र्मस्तकस्यादित्यर्थः । चरदच्छतस्य स्रोतेन स्रवेन जीवन्तीभिः कपालावलीभिर्मुण्ड-
मालाभिर्मुक्तैश्चण्डाट्टहासैरुल्लसद्भिर्भूरिभूतै प्रवृत्ता स्तुतिर्यत्र तत् ।

Digitized by Google

सेयम्भूरिवसोर्वसोरिव सुता मृत्योर्मुखे वर्त्तते
हा धिक्कष्टमनिष्टमस्तकरणः कोऽयं विधेः प्रक्रमः ।।

कपाल। त्वं भद्रे! स्मर, दयितोऽत्र यस्तवाभू-
देव, त्वां त्वरयति हा करुणः कृतान्तः ।

माल। हा दइअ णाह माहव! परलोअगदोवि सुमरिदव्वो तुम्हेहिं अअं जणो, ण उ सो उवरदो, जस्स वल्लहो जणो सुमरेदि (१)।

कपाल। हन्त! माधवानुरक्तेयं वराकी तपस्विनी।

अघोर। भक्तिमुद्यम्य। यद्यस्तु तदस्तु, व्यापादयामि।
चामुण्डे! भगवति! मन्त्रसाधनादा-
वुद्दिष्टामुपनिहितां भजस्व पूजां ।।

इति हन्तुमुपक्रान्तः।

माध। सहसोपसृत्य प्रकोष्ठे मालतीं निधाय। दुरात्मन्! एष प्रतिकृतोऽसि कापालिकापसद! नन्वयं न भवसि।

माल। सहसावलोक्य। परित्ताअदु मं महाणुभावो माहवो।

इति माधवमालिङ्गति।

माध। महाभागे! न भेतव्यं।
मरणसमये त्यक्ता शङ्कां प्रतापनिरर्गल-
प्रकटितनिजस्नेहः सोऽयं सखा पुर एव ते।
सुतनु! विसृजोत्कम्पं सम्प्रत्यसाविह पाप्मनः
फलमनुभवत्युग्रं पापः प्रतीपविपाकिनः ।।

अघो। आः क एष पापोऽस्माकमन्तरायः संवृत्तः।

(१) हा दयित नाथ माधव! परलोकगतोऽपि स्मर्त्तव्योऽयं जनो युष्माभिः, न खलु स उपरतो यस्य वल्लभः स्मरति।

Digitized by Google

कपा । भगवत्यौ एवायमस्याः स्नेहभूमिः कामन्दकीसुहृत्पुत्रो, महामांसस्य पणयिता, माधवो नाम ।

माध । साधु । महाभागे ! किमेतत् ?

माल । चिरादाश्वस्य । महाभाग ! अहं ण किम्पि जाणामि, एत्तिअं उण जाणामि, उवरिअलिन्दे पसुत्ता, दूइपरिअट्टिआ, तुह्मे उण कहिं (१) ।

माध । सलज्जं । तत्पाणिपङ्कजपरिग्रहपुण्यजन्मा
भूयासमित्यभिनिवेशकदर्थ्यमानः ।
भाग्यैर्नृमांसपणनाय, परेतभूमा-
वाकर्ण्य, भीरु ! रुदितानि तवागतोऽस्मि ।।

माल । सनतं । हद्धी ! हद्धी ! कधं मम कारणादो एव्वं एदे अप्पणिरपेक्खा परिक्कामन्ति (२) ।

माध । अहो नु खलु भो ! स्तदेतत्काकतालीयं नाम । सम्प्रति हि
राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे,
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीं ।
आतङ्काद्विकलं, द्रुतं करुणया, विच्छोभितं विस्मयात्,
क्रोधेन ज्वलितं, मुदा विकसितं, चेतः कथं वर्तताम् ।।

अघो । रे रे ब्राह्मणडिम्भ ! ।
व्याघ्राघ्रातमृगीकृपाकुलमृगन्यायेन, हिंसारुचेः,
पाप ! प्राणुपहारकेतनजुषः, प्राप्तोऽसि मे गोचरं ।

---

(१) महाभाग ! अहं किमपि न जानामि, एतावदेव पुनर्जानामि, उपर्यलिन्दे प्रसुप्ता दूत्या विवृद्धाऽस्मि, यूयं पुनः क्व ? ।

(२) हा धिक् ! हा धिक् ! कथं मम कारणादेवमेते आत्मनिरपेक्षाः परिक्रामन्ति ।

Digitized by Google

सोऽहं प्राग्भवतैव भूतजननीस्तृप्तोमि, खड्गाहति-
च्छिन्नस्कन्धकबन्धनृत्यरुधिरप्राग्भारनिष्यन्दिना * ॥

माध० । दुरात्मन्! पापण्ड! चाण्डाल!।

असारं संसारं, परिसुषितरत्नं त्रिभुवनं,
निरालोकं लोकं, मरणशरणं बान्धवजनं ।
अदर्पं कन्दर्पं जननयननिर्म्माणमफलं,
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥

अपिच । रे रे पाप!।

प्रणयिसखीसलीलपरिहासरसाधिगते-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः,
पततु शिरस्यकाण्डभयमद्य दुर्वृत्त भुजः ।

अघोर० । भ्रां दुरात्मन्! प्रहर, नन्वयं न भवसि ।

माल० । पसीद णाह साहसिअ! णाम दारुणो कुल अअं हदासो, पडिणिअत्तीअदु दुआदो अणत्थसंसआदो (१) ।

कपा० । भगवन्! अप्रमत्तो भूत्वा, दुरात्मानं व्यापादय ।

माधवाघोरघण्टौ मालतीकपालकुण्डले प्रति । अयि भीरु!

धैर्य्यं निधेहि हृदये, हत एष पापः,
किं वा कदाचिदपि केनचिदन्यभावि ।

---

(१) प्रसीद नाथ साहसिक, नाम दारुणः खल्वयं कृताग्रः, प्रतिनिवर्त्ततामस्मादनर्थसंशयात् ।

---

* व्याघ्राक्रान्तहृदयां कृपया आगच्छन् मृगो यथा विनश्यति तद्वदित्यर्थः । प्राणिनामुपहारो यत्र तत् केतनं गृहं करालायतनं तत्रेवेनः । तृप्तोमि प्रीणयामि ।

Digitized by Google

सारङ्गसङ्गरविधाविभकुम्भकूट-
कुट्टाक*-पाणिकुलिशस्य हरेः प्रमादः ॥

नेपथ्ये कलकलः । सर्व आकर्णयन्ति ।

पुनर्नेपथ्ये । भो भो मालत्यन्वेषिणः सैनिकाः! दूयममात्यभूरिवसुभाग्यासयन्त्यप्रतिहतोप्रतिज्ञा भगवती कामन्दकी वः समादिशति ।

पर्य्यवष्टम्भतामेतत्कपालायतनं द्रुतं,
नाघोरघण्टादन्यस्य कर्म्मैतद्दीर्घणाङ्कुतं ।
न करालोपहाराच्च फलमन्यद्विभाव्यते ।

कपा । भगवन्! पर्य्यवष्टब्धाः स्मः ।

अघोर । सम्प्रति विश्लेषतः पौरुषस्यावसरः ।

माल । हा तात! हा भगवति! ।

माध । भवतु, बान्धवसमाजसुस्थितां मालतीं विधाय, तत्समक्षमेनं दुरात्मानं व्यापादयामि । मालतीमन्यतः कापालिकञ्चान्यतः प्रेरयन्परिक्रामति ।

माधवाघोरघण्टौ । अन्योन्यमुद्दिश्य । आः पाप!

कठोरास्थिग्रन्थिव्यतिकररणत्कारमुखरः,
खरस्नायुच्छेदक्षणविहितवेगव्युपशमः ।
निरातङ्कः पङ्केष्विव पिशितपिण्डेषु विलस-
न्नसिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु ।

इति निष्क्रान्ताः सर्वे ।

मालतीमाधवे पञ्चमोऽङ्कः ।

---

* कुट्टाकः कुट्टनशीलः ।

Digitized by Google

षष्ठोऽङ्कः ।



ततः प्रविशति कपालकुण्डला ।

कपा । आः दुरात्मन् ! मालतीनिमित्तं व्यापादितास्मद्गुरो ! माधवशतक ! अहं त्वया तस्मिन्नवसरे निर्दयं निघ्नन्त्यपि स्त्रीत्यवज्ञाता । सक्रोधं । तदवश्यमनुभविष्यसि कपालकुण्डलाकोपस्य विजृम्भितं ।

भ्रान्तिः * कुतस्तस्य भुजङ्गशत्रोर्यस्मिन्नमुक्तानुशया सदैव ।
जागर्त्ति दंशाय निशातदंष्ट्राकोटिर्विषोद्गारगुरुर्भुजङ्गी ॥

नेपथ्ये । भो राजान !-स्वरमवयसामाज्ञया सज्वरध्वं,
कर्त्तव्येषु, श्रवणसुभगं भूमिदेवाः पठन्तु ।
क्षिप्तं नानारचननिवहैश्चेष्यतां मङ्गलेभ्यः,
प्रत्यासन्नस्त्वरयतितरां सन्नयात्राप्रवेशः † ॥

यावत्सम्बन्धिनो न परापतन्ति, तावद्वत्सया मालत्या सह नगरदेवताग्टहमविघ्नमङ्गलाय गन्तव्यमित्यादिशन्ति भगवतीनिदेशवर्त्तिनोऽमात्यदाराः, तथा ग्टहीतसविशेषमण्डनः प्रतीक्षतामानुयात्रिको जनः ।

कपा । भवत्विदानीं मालतीविवाहपरिकर्म्मसत्वरप्रतीहारशतसंकुलादस्मात्प्रदेशादपक्रम्य, माधवापकारं प्रत्यभिनिविष्टा भवामीति । निष्क्रान्ता । विष्कम्भकः ।

ततः प्रविशति कलहंसकः ।

---

* भ्रान्तिर्निद्रेति: ।

† जन्या वरस्य स्निग्धाः । सज्वरध्वं प्रवर्त्तध्वं ।

Digitized by Google

आणत्तोह्मि, णअरदेवदागब्भहरट्ठिदेण समअरन्देण, णाहमाहवेण, जहा जाणाहि दाव जत्तासुहं पउत्ता मालदी ण वेति, ता आव णं आणन्दइस्सं (१)।

ततः प्रविशतो माधवमकरन्दौ ।

माध । मालत्याः प्रथमावलोकनदिनादारभ्य, विस्तारितै-

भूयः स्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं परां ।

अद्यान्तः खलु सर्व्वथास्य मदनायासप्रबन्धस्य मे,

कल्याणं विदधातु वा भगवतीनीतिर्विपर्य्येतु वा * ।।

मक । वयस्य! कथं हि भगवत्याः सुमेधसो नीतिर्विपर्यये-ष्यति ।

कल । उपसृत्य । णाह माहव ! दिट्ठिआ वड्ढसि, पउत्ता क्खु जत्तासुहं मालदित्ति ।

माध । अपि नाम सत्यं ?

मक । सखे ! किमश्रद्धान इव प्रकुरुषे, न केवलं प्रदत्ता, प्रत्या-सन्ना च वर्त्तते । तथाहि ।

अस्माक-† मेकपदमेव मरुद्विकीर्ण-

जीमूतजालरसितानुकृतिर्निनादः ।

गम्भीरमङ्गलमृदङ्गसहस्रजन्मा

शब्दान्तरग्रहणशक्तिमपाकरोति ।।

---

(१) आज्ञप्तोऽस्मि, नगरदेवतागर्भमन्दहसितेन समकरन्देन नाथमाधवेन, यथा जानीहि तावद्यात्रासुखं प्रदत्ता मालती न वेति, तद्यावदेनमानन्दयिष्यामि। णअरदेवदागब्भहरट्ठिदमाहवपासवत्तिणा मअरन्देणेति पाठान्तरं ।

---

* विस्तारितैरित्यत्र विस्तारिभिरिति क्वचित्पाठः । प्रथमे वकुलवीथी-चेष्टादिभिः, द्वितीये चित्रावलोकनादिना, तृतीये सुप्तोपभोगवर्णनादिना, चतुर्थे मोहनाग्रकरस्पर्शादिना पञ्चमे प्रकल्पितालिङ्गनादिना विस्तार इति भावः ।

† अस्माकं शब्दान्तरग्रहणशक्तिमित्यन्वयः ।

Digitized by Google

तदेहि जालमार्गेण पश्यामः । तथा कुर्वन्ति ।

कल। णाह! पेक्खस्सु, पेक्खस्सु, इमेअ दाव उप्पडिअ-राअ-हंस-विब्भमाहिराम-चामरसमीरणोव्वेल्लकदलिआवलि-तर-ङ्गिदुत्ताल-गअणंगण-सरोअर-णिरन्तररुहण्ड-पुण्डरीअ-विब्भमं वहन्तो, धवलादवत्तणिवहा दीसन्ति। एदाअ सविलास-कवलिद-तंबोल-वीटिआपूरिअ-कवोल-मण्डलाभोअ-व्वदूअर-क्खलिद-मञ्जर-मञ्जुलुग्गीद-बद्ध-कोलाहलेहिं विविहरअणालङ्कार-किरणावली-विडम्बिद-महिन्द-चाव-खण्ड-विच्छेअ-विच्छुरिअ-णह-त्थलेहिं, अब्भासिआ, कणन्त-कणअ-किंकिणी-जाल-झणझण-झङ्करिणीओ करिणीओ (१)। माधवमकरन्दौ सकौतुकं पश्यतः।

मक। रमणीयाः खल्वमात्यभूरिवसोर्विभूतयः। तथाहि।

प्रेङ्खद्भूरिमयूरमेचकचयै* रुन्मेषिचापच्छद-
च्छायासम्बलितैर्विवर्त्तिभिरिव प्रान्तेषु पर्य्याहृताः।
व्यक्ताखण्डलकार्मुका इव भवन्त्युच्चित्रवीनांशुक-
प्रस्तारस्थगिता इवोन्मुखमणिज्योतिर्व्वितानैर्दिशः॥

कल। कधं, ससम्भमाणेक्क-पडिहार-मण्डलावज्जिदुज्जल-कणअ-कलहौअ-पङ्क-विचित्त-वेत्त-लदा-परिक्खित्त-रेहा-रदुद्द-मण्डलो दूरदो ज्जेव्व संच्छिदो परिअणो एसा अ वहल-सिन्दूर-णि-

(१) नाथ! पश्य, पश्य एते तावदुत्पतितराजहंसविभ्रमाभिरामचामरसमीरणोद्वेल्लत्कदलिकावलीतरङ्गितोत्तालगगनाङ्गनसरोवरनिरन्तरोद्गतपुण्डरीकविभ्रमं वहन्तो, धवलातपत्रनिवहा दृश्यन्ते। एताश्च सविलासकवलितताम्बूलवीटिकापूरितकपोलमण्डलाभोगव्यतिकरस्खलितमधुरमङ्गलगीतबद्धकोलाहलैः विविधरत्नालङ्कारकिरणावलीविडम्बितमहेन्द्रचापविच्छेदविच्छुरितनभःस्थलैर्वारसुन्दरीकदम्बैरध्यासिताः कणत्कनककिङ्किणीजालझनझनझङ्कारिण्यः करिण्यः।

* क्वचित् मयूरमेचकचयैरितिपाठोदृश्यते।

Digitized by Google

अर-सञ्जा-राओवरत्त-चडुल-मुह-घोलन्त-कन्त-मक्खन्त-माला-भरण-धारिणीं करेणुरअणिं अलङ्करन्ती, दूदोज्जेव्व कोदूहलु-ब्भुद-समच्छ-लोअ-दीसन्त-मणहरा, पांडुर-परिक्खम-देह-सोहा, पढम-चन्द-लेहा-विब्भमं वहन्तीं किञ्चिअन्तरं पत्तरिदा मालदी (१) ।

मक० । वयस्य ! पश्य पश्य

दूयमवयवैः पाण्डुच्छायैरलंकृतमण्डना *
कलितकुसुमा वालेवान्तर्लतापरिशोषिणी ।
वहति च वरारोहा रम्यां विवाहमहोत्सव-
श्रियमुदयिनीमुद्गाढां च व्यनक्ति मनोरुजं ॥

कथं विषादिता गजवधूः ।

माध० । सानन्दं । कथमवतीर्य्य भगवतीलवङ्गिकाभ्यां समभितः प्रहृष्टोऽहम् ।

ततः प्रविशति कामन्दकी मालती लवङ्गिका च ।

कामं । सहर्षमपवार्य ।

विधाता भद्रं नो वितरतु मनोज्ञाय विधये,
विधेयासुर्देवाः परमरमणीयां परिणतिं ।

(१) कथं स्वयमुन्मूलनेऽपि प्रतिहतमरुद्वायुवर्जितोज्ज्वलकनकवलयभ्रान्तिपङ्कविधित्वेन लतापरिशिष्टरेखारचितमण्डलो दूरत एव संस्थितोऽस्याः परिजनः । एषा च बकुलसिन्दूरनिकरसन्धारागौरपक्षचटुलमुखघूर्णत्कान्तनत्वमालाभरणधारिणीं करेणुरत्नमलंकुर्वती, इत एव कौतूहलोन्मुखसमस्तलोकदृश्यमानमनोहरा, पाण्डुरपरिणामदेहशोभा, प्रथमचन्द्रलेखाविभ्रमं वहन्ती, किञ्चिदन्तरे प्रहृता मालती । कलहोऽपङ्कदत्यत्र कलहोऽंकित इति क्वचित्पाठः ।

* अतिरम्यतया अलीभिरेव भूषणान्यलङ्कृतानीति भावः ।

Digitized by Google

कृतार्थीभूयासं प्रियसुहृदपत्यीपयमने,
प्रयत्नः कल्पोऽयं फलतु, शिवदार्थी च भवतु ॥

माल० । स्वगतं । केण उण उवाएण सम्पदं मरणणिव्वाणादो अन्तरं सम्भावइस्सं ? मरणम्मि मन्दभाअहेआणं अहिमदत्ति सुदुल्लहं होदि (१) ।

लवं० । स्वगतं । अदिकिलामिदा खु पिअसही एदिणा अणुकूलविप्पलम्भेण (२) ।

प्रविश्य नेपथ्यकृता प्रतीहारी । अमच्चो भअवदीं विण्णवेदि, एदिणा णलिन्दाणुमोदिदेण विवाहणेवच्छेण देवदापुरदो अलङ्करिदव्वा मालदित्ति (३) ।

कामं० । युक्तमाहामात्यः, माङ्गलिकमेतत् स्थागतो दर्शय ।

प्रती० । इदं दाव धवलवट्टंसुअचोलअं, एदं च उत्तरीअं रत्तवण्णंसुअं इमेअ सव्वङ्गिआआहरण-सञ्जोआ, अअं च मोत्तिआहारो, एदं चन्दणं, कुसुमापीडं अ (४) ।

कामं० । अपवार्य । रमणीयं हि वत्सभकरन्दमवलोकयिष्यति मदयन्तिका । प्रकाशं गृहीत्वा । भवत्वेवमुच्यतामामात्यः ।

प्रतिहारी तथेति निष्क्रान्ता ।

कामं० । वत्से लवङ्गिके ! प्रविश त्वमभ्यन्तरं वत्सया मालत्या सह ।

---

(१) केन पुनरुपायेन साम्प्रतं मरणनिर्वाणस्यान्तरं सम्भावयिष्ये ? मरणमपि मन्दभागधेयानामभिमतमिति सुदुर्लभं भवति ।

(२) अतिक्लामिता खलु प्रियसखी एतेनानुकूलविप्रलम्भेन ।

(३) अमात्यो भगवतीं विज्ञापयति; एतेन नरेन्द्रानुप्रेषितेन विवाहनेपथ्येन देवतापुरतोऽलङ्कर्त्तव्या मालतीति ।

(४) इदं तावद्धवलपट्टांशुकचोलकं इदमुत्तरीयं रक्तवर्णांशुकं, इमे च सर्वाङ्गिका आभरणसंयोगाः, अयञ्च मौक्तिकाहारः, इदं चन्दनं कुसुमापीडञ्च ।

Digitized by Google

सवं । अध अज्जवहो उण्ण कहिं ?।

कामं । अहमपि तावद्विविक्ते अवाङ्करणरत्नावां प्राप्तसंज्ञ आत्मानः प्रतीक्षिष्ये । इति विष्क्रान्ता ।

माल । सखदं । कधं, सवङ्किआमेत्तपरिवारस्सि संवुत्ता ! ।

सवं । इदं देवहाअन्दिरदुवारं ता पविसस्सा । इति प्रविशतः ।

मक । वयस्य ! दूतसम्भावपवारितशरीरौ तिष्ठावः । तथा कुरुतः ।

सवं । सहि ! अअं अङ्कराओ, इमाओ कुसुममालाओ ।

माल । तदो किं ।

सवं । सहि ! इमस्सिं पाणिग्गहणमङ्गलारम्भे, कल्लाणसम्पत्तिणिमित्तं देवहाओ पूजेहित्ति, अम्बाए अणुण्णेसिदासि (१) ।

माल । किं दाणिं दारुणसमारम्भदेवदुव्विलासपरिणामदुःखणिग्घाडिद-माणसं पुणोपुणो वि मम्म-च्छेअ-दुःसहं मन्दभाइणीं दुणेसि (२) ।

सवं । अइ ! किंवत्तुकामासि ?

माल । अं दाणिं दुल्लहाहिणिवेसिमणोरहविसंवदन्तभाअधेअो अणो मन्तेदि (३) ।

मक । सखे ! श्रुतं ।

माध । श्रुतमसन्तोषश्च हृदयस्य ।

माल । सवङ्किकां परिष्वज्य । ता, पस्सअ सवङ्किणि किअसहि सव-

(१) सखि ! अस्मिन् पाणिग्रहणमङ्गलारम्भे, कल्याणसम्पत्तिनिमित्तं देवताः पूजयेति, अम्बयानुमन्त्रितासि ।

(२) किमिदानीं दारुणसमारम्भदैवदुर्विलासपरिणामदुःखनिर्घृष्यमानत्वां पुनर्मर्मच्छेददुःसहां मन्दभागिनीं दुनोषि ।

(३) यदिदानीं दुर्लभाभिनिवेशिमनोरथविसंवादभागधेयो जनो मन्त्रयते ।

Digitized by Google

ङ्गिए! एसा दाणिं दे पिअसही अणाहा, मरणे वट्टमाणा आगब्भ-णिग्गम-णिम्मिद-णिरन्तरोपआर-विरूढ-वीसम्भ-सरिसं परिस्सङ्गेण तुमं पत्थेदि, जइ दे अहं अणुवट्टणीआ, तदो मं हिअएण धारअन्ती, समग्ग-सोहग्ग-लच्छी-परिग्गहेक्क-मङ्गलं माहवसिरिणो मुहारविन्दं आणन्दमसिणं अवलोअइस्ससि (१)।

इति रोदिति ।

माध । वयस्य मकरन्द !

स्नानस्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
आनन्दनानि हृदयैकरसायनानि,
दिष्ट्या मयाप्यधिगतानि वचोऽमृतानि ।।

माल । जहा तस्स जीविदप्पदाइणो जणस्स, अवसिद्धेत्तिमं सुणिअ सन्तप्पमाणस्स, तं तहाविहं सरीररअणं ण परिहीअदि, जधा अ परलोअदम्मि मं उद्दिसिअ सो जणो संसारणकधामेत्तपरिसेसं कालन्तरेवि लोअजत्तं न सिढिलेदि तहा करेसि। एवंज्जेव पिअसहीए पसादादो मालदी कदत्था भोदि (२)।

---

(१) तत्परमार्थभगिनि प्रियसखि लवङ्गिके ! एषा इदानीं ते प्रियसखी अनाथा, मरणे वर्त्तमाना, आगर्भनिर्गमनिर्म्मितनिरन्तरोपकारविरूढविश्रम्भसदृशं परिष्वङ्गेण त्वां प्रार्थयते, यदि ते अहमनुवर्त्तनीया ततो मां हृदये धारयन्ती समग्रसौभाग्यलक्ष्मीपरिग्रहैकमङ्गलं माधवस्त्रियो मुखारविन्दमानन्दमसृणमवलोकयिष्यसि । अनुवर्त्तनीया उपकर्त्तव्या ।

(२) यथा तस्य जीवितप्रदायिनो जनस्यावसितेति मां श्रुत्वा सन्तप्यमानस्य, तत्तथाविधं शरीररत्नं न परिहीयते, यथा च मां परलोकगतामुद्दिश्य स जनः संसारयात्रकथामात्रपरिशेषां कालान्तरेऽपि लोकयात्रां न शिथिलयति, तथा करिष्यसि, एवमेव प्रियसखीप्रसादात् मालती कृतार्था भवति । लोकान्तर इति क्वेषु पाठः ।

Digitized by Google

मक । हन्त ! अतिकरुणं वर्त्तते ।

माध । मैराश्यकातरधियो हरिणेक्षणायाः
श्रुत्वा निकामकरुणञ्च मनोहरञ्च ।
वात्सल्यमोहपरिदेवितमुद्वहामि,
चिन्ताविषादविपदञ्च महोत्सवञ्च ।।

लवं । अदू! पडिहदं दाणिं दे अमङ्गलं ण अदीवि अधिअदरं सुणिस्सं ।

माल । सहि ! पिअं कुरु तुह्माणं मालदीजीविदं, ण उण मालदी ।

लवं । किं एव्वं भणिदं भोदि ।

माल । आत्मानं निर्दिश्य । जेण असज्जणपच्चासाबन्धणेहिं वअणसंविहाणेहिं जीआविअ दूमंज्जेव्व महाबीभच्छारम्भं अणुभाविदम्हि, सव्वदं उण मम मणोरहो एसोज्जेव्व जं तस्स देवस्स परोक्खगुणकित्तणेण अणवरद्धं अत्ताणं परिच्चइस्सन्ति, ता, दूमस्सिं पओअणे पिअसही मे अपरिपन्थिणी होदु (१) ।

इति पादयोः पतति ।

मक । सैषा सीमा खेदस्य । लवङ्गिका माधवं संज्ञया वारयति ।

मक । वयस्य ! उपसृत्य लवङ्गिकायाः स्थाने तिष्ठ ।

माध । वयस्य ! परवानस्मि साध्वसेन ।

मक । दृश्यमेव नेदीयसां प्रकृतिरभूदवानां ।

माधवः सैरं लवङ्गिकास्थाने तिष्ठति ।

---

(१) येनान्यजनप्रत्याशानिबन्धनैर्वचनसंविधानैर्जीवयित्वा दूमनेव महाबीभत्साराम्भमनुभावितास्मि । सात्मतं पुनर्मम मनोरथ एष एव यत्तस्य देवस्य परोक्षगुणकीर्त्तनेन अनपराद्धमात्मानं परित्यक्ष्यामीति । तदस्मिन् प्रयोजने प्रियसखी मे अपरिपन्थिनी भवतु । परोक्षगुणकित्तनेनेत्यत्र परार्थीयत्तेतिक्वचित्पाठः ।

Digitized by Google

माल। सहि! करेहि अणुअत्तदाए पसादं।

माध। सरले! साध्वसरागं परिहर, रम्भोरु! सुष्ठु संरम्भं।
विरसं विरहायासं, सोढुं तव चित्तमक्षमं मे॥

माल। सहि! अलंवणीओज्जेव्व दे मालदीए जणो।

माध। सहर्षं। किं वा भणामि विच्छेदहारणाबाससारिणि!।
कामं कुरु वरारोहे! देहि मे परिरम्भणं॥

माल। सहर्षं। कधं अणुगहीदम्हि। उत्थाय। दृढमालिङ्गामि। दंसणं उण पिअसहीए वाहपपीडणिरुद्धं अप्पक्खिमं ण लभीअदि। आलिङ्ग सानन्दं। सहि! कठोरकमलगब्भपाओ अणारीसोज्जेव्व दे अज्ज णिव्वाबेदि मं सन्तप्पमाणं पिअसहीए सरीरप्फंसो। साधं। किंच, मउलिविणिवेसिदञ्जली मम वअणेण विण्णवेसि तं जणं, जधा, ण मए मन्दभाइणीए, विअसंतपुण्डरीअलच्छीविलाससारिणो संपूण्णचन्दमण्डलादिसमस्स मुहस्स दे सच्चन्दंसणेण सम्भाविदो चिरं अक्खवो लोअणाणं सुधामण्णोरहेहिं अ अविरदविअम्भमाणउल्लावल्लेअग्गदुरुव्वित्तमाणबन्धणं धारिअं हिअअं। गमिआ अ वारंवारं सविसेसदूमणाहूअसहीअणा सरीरसन्दावा, कधंपि अदिवाहिदा चन्दाहवमसअमारुदयमुहा अणत्थपरम्परा, सम्पदं उण णिरासाह्मि संवुत्तेति, तुएवि पिअसहीए सव्वदा सुमरिदव्वह्मि। एसा अ सिरिमाकन्दसहत्थणिम्माणमणुहरा वउलमाला मालदीजोविदणिव्विसेसं पिअसहीए दट्ठव्वा हिअए धारणीएत्ति (१)। स्वगतादनीय माधवस्य हृदि विन्यस्यन्नीषदसोमहस्त साध्वसोत्कम्पं नाटयति।

---

(१) कथमनुगृहीतास्मि। दृढमालिङ्गामि। दर्शनं पुनः प्रियसख्या बाष्पो-

Digitized by Google

माध । अपवार्य । हन्त !

एकीकृतस्यचि निमग्नदृषावधीद्य
निर्भुग्नपीनकुचकुम्भलयानया मे ।
कर्पूरहारहरिचन्दनचन्द्रकान्त-
निष्यन्दशीतलतरालहिमादिवर्णः ॥

मालं । सखि । अहो ! लवङ्गिआए मालही विअ लद्धा ।

माध । अयि ! स्ववेदनामात्रनिवेदिनि परव्यथानभिज्ञे ! दुरनुपास्यासे ।

उद्दामदेहपरिदाहमहाज्वराणि,
सङ्कल्पसङ्गविनोदितदेहभाजि ।
त्वत्स्नेहसम्विदवलम्बितजीवितानि,
किं वा मयापि न हि मान्यतिवाहितानि ? ॥

लवं । सहि ! उवालम्भणिज्जं उवालम्भसि ।

कल । अहो ! सत्तसरक्खोआहा संभिआरोच्च ।

मक । मकरन्दअगे ! एवमेतत् ।

त्वीडनिरुद्धं समधिगन्तुं न लभते । सखि ! कठोरकमलवर्णमृणालः सुकुमारोटन्याडश्च एव ते अद्य निर्व्यापयति मां शरीरसर्गः । किञ्च सौलिविनिवेशिताङ्गविभ्रमं वचनेन विश्रामयिष्यसि तं जनं, यया, न मया मन्दभाग्यया, विकचपुण्डरीकलक्ष्मीविलासहारिणः सम्पूर्णचन्द्रमण्डलाभिरामस्य मुखस्य ते स्वच्छन्ददर्शनेन सम्भावितश्चिरं महीयसो लोचनाभ्यां । सुधामनोरथैश्चाविरतविजृम्भमाणदुर्भारोद्वेगव्यतिकरोद्वृत्तमानबन्धनं धारितं हृदयं । गमितास्च वारंवारं सविशेषदुःसहारम्भदुर्मनायितसखीजनाः शरीरसन्तापाः, कथमयतिवाहितास्चन्द्रातपमलयमारुतप्रमुखा अनर्थपरम्पराः, साम्प्रतं पुनर्निराशाश्चि संवृत्ता इति, त्वयापि प्रियसख्या सर्व्वदाहं स्मर्त्तव्याश्चि । एषा च श्रीमाधवसुहृत्सम्भावनमनोहरा वकुलमाला मालतीजीवितनिर्विशेषं प्रियसख्या, सर्व्वथा हृदये धारणीया इति ।

Digitized by Google

त्वं वत्सलेति कथमप्यवलम्बितात्मा,
सत्यं जनोऽयमियतो दिवसाननैषीत् ।
आवद्धकङ्कणकरप्रणयप्रसाद-
मासाद्य, नन्दतु चिराय, फलन्तु कामाः ॥

लवं । महाणुभाव ! छिण्णए वि अपडिहदसअंगाहसाहसो अअं जणो, किं दाणिं कङ्कणाभरणं करं विआरेदि महाभाओ (१) ?

माल । सगतं । हा ! हद्धी ! हद्धी ! हदत्थि, कन्नआजणविरुद्धं किम्पि एसा उवणयदि (२) ।

प्रविश्य कामन्दकी । पुत्रि ! कातरे ! किमेतत् ? ।

मालती कम्पमाना कामन्दकीमाश्लिष्यति ।

कामं । वत्साश्लिष्यकालमत्र ।

पुरश्चूतारामस्तदनुमनसोऽन्यपरता,
तनुज्ञानिर्यस्य त्वयि समभवद्यत्र च तव ।
युवा, सोऽयं, प्रेयानिह, सुवदने ! मुञ्च जडतां,
विधातुर्वैदग्ध्यं विलसतु, सकामोऽस्तु सुहृदः * ॥

लवं । भअवदि ! कसण-चउद्दसी-रअणी-मसाण-सञ्चरण-णिव-

---

(१) महानुभाव ! छिन्नेऽपि अप्रतिहतसत्त्वं साहसाहसोऽयं जनः किमिदानीं कङ्कणाभरणं करं विचारयति महाभागः ।

(२) हा ! हा धिक् ! हा धिक् ! हताऽस्मि, कन्यकाजनविरुद्धं किमप्येषा उपनयिष्यति ।

---

* "चक्षुःप्रीतिर्मनःसङ्गः संकल्पोत्पत्तिरेव च । निद्राच्छेदस्तनुत्वं च व्यावृत्तिर्विषयान्तरात् । लज्जानाशश्च उन्मादो मूर्च्छा मरणमेव च" इत्यादि कामदशोद्भावनपूर्वकं गान्धर्वविवाहविधिमाह पुरश्चूत्यादिना ।

Digitized by Google

त्तिद-विसम-व्यवसाअ-णिट्ठावि अ-चण्ड-मासण्ड-पंअण्ड-दोद्दण्ड-साहसो साहसिओ क्खु एसो, अदोमे पिअसही उक्कम्पिदा (१)।

मक । खगतं । साधु, खवञ्चिके ! साधु, अवसरे खल्वनुरागोपकारयोर्गरीयसोरुपन्यासः ।

माल । हा तात ! हा अम्ब ! ।

कामं । वत्स माधव ! ।

माध । आज्ञापय ।

कामं । दूयमानेषसामन्तमस्तकोत्तंसपरागरञ्जितचरणाङ्गुलेरमात्यभूरिवसोरेकमपत्यरत्नं मालती, भगवता सदृशसंयोगरसिकेन वेधसा, मन्मथेन, मया च, तुभ्यं प्रदीयते । इति रोदिति ।

मक । फलितं हि नस्तर्हि भगवतीपादप्रसादेन ।

माध । तत्किमिति वाष्पायितं भवत्या ? ।

कामं । चीवराञ्चलेन नेत्रे परिमृज्य । विज्ञापयामि कल्याणिनं ।

माध । नन्वाज्ञापय ।

कामं । परिणतिरमणीयाः प्रीतयस्तद्विधाना-
महमपि तव मन्ये हेतुभिस्तैश्च तैश्च ।
तदिह सुवदनायां तात ! मत्तः परस्मा-
त्परिचयकरुणायां सर्व्वथा मा विरंसीः ॥

इति पादयोः पतितुमिच्छति ।

माध । निवारयन् । अहो ! बालस्यादतिक्रामति प्रसङ्गः ।

मक । भगवति !

---

(१) भगवति ! क्षणचलदृशोरजनीश्वरगानसञ्चरणनिर्वर्त्तविषमव्यवसायनिष्ठापितचण्डपाशण्डप्रचण्डदोर्दण्डसाहसः साहसिकः खल्वेषः, अतोमे प्रियसखी उत्कम्पिता । विषमव्यवसायो महामांसविक्रयः । निष्ठापितो निहतः ।

Digitized by Google

श्लाघ्यान्वयेति, नयनोत्सवकारिणीति,
निर्व्यूढसौहृदभरेति गुणोज्ज्वलेति ।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि ? ।

कामं । वत्स माधव !

माध । आज्ञापय ।

कामं । वत्से मालति !

लवं । आणवेदु भअवदी ।

कामं । प्रेयो मित्रं, बन्धुता वा समग्रा,
सर्वे कामाः श्रेयधिर्जीवितञ्च ।
स्त्रीणां भर्त्ता, धर्मदारास्च पुंसा-
मित्यन्योन्यं वत्सयोर्ज्ञातमस्तु ।।

मक । अथ किं ।

लवं । भअवदि ! जधा तुह्मे आणवेध ।

कामं । वत्स मकरन्द! त्वमनेनैव वैवाहिकेन मालतीनेपथ्येन प्रसाधितः, परिणयात्मानं । इति मेदुरालमर्पयति ।

मक । यदाज्ञापयति भगवती, यावदितश्चित्रजवनिकामन्तर्धाय नेपथ्यं धारयामि । तथा करोति ।

माध । भगवति ! सुलभवञ्चनमतिसङ्कटमिदं वयस्यस्य ।

कामं । आः कस्त्वमस्यां चिन्तायां ? ।

माध । एवं भगवत्येव जानाति ।

प्रविश्य मकरन्दः । विहसन् । वयस्य ! मालत्यस्मि । सर्वे सकौतुकं पश्यन्ति ।

माध । मकरन्दं परिष्वज्य, सोपहासं । भगवति ! कृतपुण्य एव नन्दनो, यः प्रियामीदृशीं मनसा मुहूर्त्तमपि कामयिष्यति ।

Digitized by Google

कामं । वत्सौ मालतीमाधवौ ! इतो निर्गत्य, तृच्चगह्वनेन निर्गम्यतामुद्वाहमङ्गलार्थमस्माद्विहारिकायाः पश्चादुद्यानवाटिकायाः, सुविहितं तत्रैव वैवाहिकद्रव्यजातमवलोकितया सर्व्वं सम्पादितमास्ते; भूयश्च

गाढोत्कण्ठकठोरकेरलबधूगण्डावपाण्डुच्छदै-
स्ताम्बूलीपटलैः पिनद्धफलिनश्यानम्बपूगद्रुमाः ।
कङ्कोलीफलजग्धिमुग्धविकिरव्याहारिणस्तद्भुवो
भागाः प्रेङ्खितमातुलङ्गलतयः, प्रेयो विधास्यन्ति वां ।।

गत्वा च तत्रैव मकरन्दमदयन्तिकागमनं यावत् स्थातव्यं ।

माध। वच्छे । कल्याणान्तरावतंसाहि कल्याणसंपदुपरिष्टात् भवति ।

कल । दिट्ठिआ एदम्मि णो भविस्सदि ।

माध । कथं सन्देह एवात्मभवतः ।

लवं । सुदं पिअसहीए ।

कामं । वत्स मकरन्द ! वत्से लवङ्गिके ! इत इतः प्रतिष्ठामहे ।

माल । सहि ! तुएवि गन्तव्वं ? ।

लवं । विहस्स । संपदं क्खु वअं एत्थ उवचरामो ।

इति निष्क्रान्ताः कामन्दकीलवङ्गिकामकरन्दाः ।

माध । अयमहमिदानीं

आमूलकण्टकितकोमलबाऽनाल-
मार्द्राङ्कुलोद्दलमनङ्गनिदाघतप्तः ।
अस्याः करेण करमाकलयामि कान्त-
मारक्तपङ्कजमिव द्विरदः सरस्याः ।।

इति निष्क्रान्ताः सर्व्वे । मालतीमाधवे चौरिकाविवाहोनाम षष्ठोऽङ्कः ।

Digitized by Google

सप्तमोऽङ्कः ।



ततः प्रविशति बुद्धरक्षिता । *

बुद्ध । अम्महे! सुसिलिट्ठ-मालदी-णेबच्छ-लच्छी-विप्पलद्ध-णन्दण-किद-करग्गहो अमच्चभूरिवसुमन्दिरे, भअवदीवअण-संविहाणेण, खेमेण गोबाइदो मअरन्दो । व्रजति । अज्ज अम्होबि दूमं णन्दणावासं उबगदा, तदो भअवदी णन्दणमापुच्छिअ गदा आवसहं । अवअ, णव-बद्ध-गिह-प्पवेस-विरइदाकाल-कौमुदी-महसव-प्पउत्ति-प्पज्जाउलासेस-परिअणो पदोसो अणुअल-दूसदि अज्ज णो ववसिदं । सम्पदं क्खु तुवरन्तकामो कामिणीं कामेदुं बद्धसो सपादवन्दनं अब्भत्थिअ, पुणोबि बलामोडिअ अद्दिदवन्तो, मअरन्देण णिट्ठुरपडिहदो जामादा, स अ अधिअदरवेलक्खखलन्तअक्खरो, रोसणिब्भरदुःक्खिदो, रुदिअ-पप्फुरन्तणअणो, ण मे सम्पदं तुमए कोमारबन्धईए प्पओअणंत्ति, ससबहं पदूसं काउण, वासभवणादो णिग्गदोत्ति । एदिणा पसङ्गेण मदअन्तिअं आणीअ मअरन्देण सह सङ्गोजइस्सं (१) ।

इति निष्क्रान्ता । प्रवेशकः ।

---

(१) अहो ! सुश्लिष्टमालतीनेपथ्यलक्ष्मीविप्रलब्धनन्दनकृतकरग्रहोऽमात्यभूरिवसुमन्दिरे, भगवतीवचनसन्धिधानेन क्षेमेण, गोपायितो मकरन्दः । अद्य च वयमिमं नन्दनावसथमुपगताः, ततो भगवती नन्दनमापृच्छ्य गता आवसथं । अन्यच्च, नवबधूवृत्तप्रवेशविरचिताकालकौमुदीमहोत्सवप्रवृत्तिप्रत्यूहाकुलाश्चेषपरि-

---

* नियुक्तैव मया तत्र बुद्धरक्षितेति प्रथमाङ्कोपक्षिप्तं बुद्धरक्षिताप्रवेशमाह ततइति ।

Digitized by Google

ततः प्रविशति यथोक्तागतो मालतीवेशो मकरन्दो लवङ्गिका च ।

मक० । लवङ्गिके ! अपि नाम बुद्धरक्षितासंक्रान्ता भगवतीनीतिरविपर्य्येष्यति ।

लव० । को सन्देहो एत्थ महाणुभावस्स ? किञ्चऽणा, जहा एसो मञ्जीरसद्दो सुणीअदि तहा तक्केमि तेण ववदेसेण आणीदा बुद्धरक्खिदाए मदअन्तितात्ति, ता उत्तरीओवारिदो पसुत्तलक्खणो चिट्ठदु (१) । मकरन्दस्यथा करोति ।

ततः प्रविशति बुद्धरक्षिता मदयन्तिका च ।

मद० । सहि! सच्चं ज्जेव परिकोविदो मे भादा मालदीए ।

बुद्ध० । अधट्ठं ।

मद० । अहो! अच्चाहिदं ता-एहि वामसीलं मालदीं निब्भच्छेम्ह (२) । परिक्रामतः ।

जनः प्रदोषोऽनुकूलयिष्यति यदा नो व्यवसितं । साम्प्रतं खलु त्वरमाणकामः कामिनीं कामयितुं बद्धशः सपादवन्दनमभ्यर्थ्य, पुनर्बलात्कारेणाभिद्रवन्मकरन्देन निष्ठुरप्रतिहृतो जामाता, सचाधिकतरवैलक्ष्यस्खलदक्षरो रोषनिर्भरदुःखितो रुदितप्रस्फुरदधरो न मे त्वया साम्प्रतं कौमारबन्धकया प्रयोजनमिति, सशपथं प्रतिज्ञां कृत्वा, वासभवनान्निर्गतइति । एतेन प्रसङ्गेन मदयन्तिकामानीय मकरन्देन मह्यं संयोजयिष्ये। रोषनिर्भरइत्यत्र रोषस्खलङ्गित इति क्वचित्पाठः। खलङ्गितं मौनं । आपृच्छ आमन्त्र्य । कोजागरे सदा सद्भिः कौमुदीमह इत्यत इत्यकालत्वं स्त्रीसमयप्रवृत्तत्वादितिभावः । कौमारबन्धकी अविवाहितावस्थायां वेश्या माधवानुरक्तत्वादित्यर्थः । रोषनिर्भरदुक्खिदो रुदिअ-इत्यत्र वड्ढमाणोरुमसु इति क्वचित्पाठः ।

(१) कः सन्देहोऽत्र महानुभावस्य ? किं बहुना, यथा एष मञ्जीरशब्दः श्रूयते तथा तर्कयामि तेन व्यपदेशेन आनीता बुद्धरक्षितया मदयन्तिकेति, तदुत्तरीयापवारितः प्रसुप्तलक्षणस्तिष्ठतु । तेन व्यपदेशेन मालतीप्रबोधलुब्धेन ।

(२) अहो ! अत्याहितं तदेहि वामशीलां मालतीं निर्भर्त्सयामः ।

Digitized by Google

बुद्ध । इदं वासभवणदुवारं । इति प्रविशतः ।

मद । सहि लवङ्गिए ! जाणाहि दाव पसुत्ता दे पिअसही णवेत्ति (१) ।

लवं । सहि ! एहि, मा णं पडिबोधेहि, जदो एसा चिरं दुम्मणाअन्ती, इदाणीं ज्जेव ईस मसुं उज्झिअ पसुत्तेति, तदो सणिअं दूधज्जेव सअणुप्पन्ते उवविस (२) ।

मद । तथा कृत्वा । सहि ! कधं दुम्मणाअदि अअं वामसीला (३) ।

लवं । कधं णाम, णववधूविस्सम्भणोवाअजाणुअं लउहं विअड्ढमहुरभासिणं अरोसणं अं दे भाअरं भत्तारं समासादिअ पिअसही ण दुम्मणाइस्सदि (४) ।

मद । बुद्धरच्चिदे ! पेक्ख, पेक्ख, विप्पडीअं अम्हेवि उवालंभीआमो (५) ।

बुद्ध । विप्पडीअं ण विप्पडीअं बि ।

मद । कधंविअ ? ।

बुद्ध । जं दाव चलणपडिओवि मत्ता ण वज्जमाणिदो, एत्थ लज्जादोसेण एसो जणो ण उवालम्भिज्जो, जम्पि, पिअसहि ! णव-बद्ध-विरुद्ध-रहसोवक्कम-क्खलण-वेलक्ख-विच्छड्डिद्ध-

---

(१) सखि लवङ्गिके ! जानीहि तावत्प्रसुप्ता ते प्रियसखी नवेति ? ।

(२) सखि ! एहि मैनां प्रतिबोधय यत एषा हि चिरं दुर्म्मनायमाना इदानीमेव ईषत् मन्युमुज्झित्वा प्रसुप्तेति, ततः शनैरित्थैव शयनीयोपान्ते उपविश ।

(३) सखि ! कथं दुर्म्मनायमाना वामशीला ? ।

(४) कथं नाम नववधूविश्रम्भणोपायज्ञातारं सुकुमारं विदग्धमधुरभाषिणं सस्नेहमरोषणञ्च, ते भ्रातरं भर्त्तारं समासाद्य, मे प्रियसखी न दुर्म्मनायिष्यते ? ।

(५) बुद्धरक्षिते ! पश्य, पश्य, विप्रतीपं वयमपि उपालभामहे ।

Digitized by Google

महाणुभावत्तणस्स भादुणो दे वाआगदं किंचि अपरिट्ठाणं तेण तुम्हेत्ति (१)।

किञ्च। संस्कृतमाश्रित्य। कुसुमसधर्म्माणो हि योषितः, सुकुमारोपक्रमाख्यानधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः, सद्य संप्रयोगे विद्वेषिण्यो भवन्ति, एवं किल कामसूत्रकारा भणन्ति।

लवं। साधु। घरे घरे पुरिसा कुलकन्नकाओ समुव्वहन्ति, ण क्खु कोवि लज्जापराधीणं अणवरद्धं लद्धसब्भावं कुसुकुमारीअणं, पहरामीति वाआमलेण पज्जालेदि। एदे क्खु दे हिअअसल्लनिक्खेवा, आमरणं सुमरिज्जन्तदुःसहा, पदिघरणिवासवेरग्गकारिणो महापरिभवा, जाणं कदे इत्थिआणं जम्मलाहं जुगुच्छन्ति बान्धवाः (२)।

मद। अइ बुद्धरक्खिदे! अदिदुम्मविहा पिअसखी लवङ्किआ, अदिमहन्तो क्खु कोवि मे भादुणा वाआअवराधो से कदो (३)?।

बुद्ध। अधदं सुदं अम्होहिं।

मद। सहि! केरिसो।

बुद्ध। मअ ण तुए संपदं कोमारबन्धवए पओअणंत्ति।

---

(१) यत्तावत्प्रत्यक्षपतितोऽपि भर्त्ता न वक्त्रमानिलोऽपि लज्जादोषेण एष जनो, नोपालम्भनीयः। यदपि, प्रियसखि! नवबधूविद्वेषकारभूतोपक्रमस्खलनवैलक्षविच्छर्दितमहानुभावत्वस्य भ्रातुस्ते वागतं, किमप्यपरिस्खानकं तेन वृथमिति।

(२) सदृशे सदृशे कुलकन्यकाः समुद्वहन्ति, न खलु कोऽपि लज्जापराधीनमनपराद्धं सुकुमारस्वभावं कुलकुमारीजनं, प्रहरामीति वाक्यमात्रेण प्रज्वालयति। एते खलु ते हृदयशल्यनिक्षेपा, आमरणं स्मर्यमाणदुःसहाःपतिगृहनिवासवैराग्यकारिणो महापरिभवाः येषां कृते स्त्रीजनायां जन्मलाभं जुगुप्सन्ते बान्धवाः। लक्षक शब्दः सुकुमारस्वपार्थदेशी। एवं पूर्वत्र।

(३) अयि बुद्धरक्षिते! अतिदुर्मनायमाना प्रियसखी लवङ्किका अतिमहान् खलु कोऽपि मे भ्राता वागपराधोऽस्याः कृतः।

Digitized by Google

मद। कर्णौ पिधाय। अहो अतिक्रमो! अहो प्रमादो! सखि लवङ्गिए! असमत्थाम्हि दे मुहंपि सम्मदं दट्ठिदुं तथावि पभवामित्ति किम्पि मन्तइस्सं (१)।

लवं। साधीणो दे अअं जणो।

मद। चिट्ठदुज्जेव्व मह भादुणोदुःसीलदा, अवरिट्ठाणं अ तुम्हेहिं एरिसोवि सम्मदं, जधा, चित्तमणुवत्तणीओ जेण भत्ता एसोत्ति। अण्णं च। णअ तुम्हे दूमस्स दूतीअणअणभिजाददुरक्खराधिक्खेवीबालभावस्स जं मूलं तं ण जाणध (२)।

लवं। कधं वा आगदंवि, णाम, ण जाणीमो (३)।

मद। जं दाणिं तस्सिं महाणुभावे माधवे किंवि किल मालदीए वाआमेत्तअं आसी तहिं अ सव्वलोअस्स अदिभूमिंगदो पवादो, ता कधु एदं विअम्भदि? ता पिअसहि! जधा एसभत्तुणो अवक्खाधिणिवेसो णिरवसेसं हिअआदो उज्झरीअदि तधा करेध, असाधा, महादोसोत्ति जाणिदं भोदु। णिक्कंपदारुणा कधु असकाओ दुल्लावेदि हिअअं मणुस्साणं; दूरिसी दुरभिसङ्केति मा भणिस्सध मदअन्तिआए कधिदंपि (४)।

(१) अहो अतिक्रमो! अहो प्रमादः! सखि लवङ्गिके! असमर्थास्मि ते मुखमपि साध्वसं दर्शयितुं, तथापि प्रभवामीति, किमपि मन्त्रयिष्ये।

(२) तिष्ठत्येव ममभ्रातुर्दुःशीलता, अपरिज्ञानस्य युष्माभिरीदृशोऽपि सांप्रतं, यथा चित्तमनुवर्त्तनीयः येन भर्त्ता एष इति। अन्यच्च। अथ यूयमेतस्य स्त्रीजनानभिज्ञातदुरक्षराधिक्षेपोपालभ्यस्य यन्मूलं तत् न जानीथ।

(३) कथं वागतमपि, नाम, न जानीमः।

(४) यदिदानीं तस्मिन्महानुभावे माधवे किमपि किल मालत्या वाचामैत्रकमासीत्, तत्र च सर्वलोकस्यातिभूमिंगतः प्रवादः तत्कथमिदं विजृम्भते। तत्प्रियसखि! यथा एष भर्तुरपक्षाभिनिवेशो निरवशेषं हृदयदाह्रियते तथा कुरुत;

Digitized by Google

लवं । अइ असावधाणे असम्बद्धलोअप्पवादमोहिदे! अवेहि, ण तुए सह किम्पि मन्तिदव्वं (१) ।

मद० । सहि! पसीद, पसीद, अहवा ण तुम्हे अपुडं भणिदाओ चिट्ठह । किंअ । अम्हे सच्चकं ज्जेव माहवेक्क-मअ-जोअ-लोअं मालदीं क्खु ण जाणीमो? केण वा कठोर-केदअ-गब्भ-विब्भमाव-अव-द्दोव्वल्ल-णिव्वत्तिद-सुन्दरत्तण-विसेसं, माहव-सहत्थ-णिम्माविद-वउलावली-विरइद-कण्ठावलम्ब-मेत्त-सञ्जीवणं मालदीए, माहवस्स अ प्पभात-चन्द-मण्डलापाण्डुर-परिक्खाम-रमणीअदंसणं ण विभाविदं सरीरं? किंअ, तहिअसे कुसुमाअरु ज्जाण-पेरन्त-रत्थामुह-समागमे, सविब्भमुल्लसिद-कोदूहलुप्फुल्ल-लोअण-विलास-मसिण-सञ्चार-चारु-तारआ-विराअन्त-विब्भमा अणङ्ग-णट्टाआरिअ-सव्वाआरो-वदेस-णिम्मिद-विअट्ठ-मुद्दमञ्जरा, मएवि ण णिरूविदा, दूमाणं दिट्ठिसम्मोहा? किंअ, मम भादुणो दाणवुत्तन्तं सुणिअ तक्खणु-च्छलिद-गम्भीरावेअ-व्वदूअरङ्गारिद-मिलाअन्त-देह-सोहाणं, उव्वत्त-माणमूलबन्धणं विअ, ण लक्खिदं हिअअं? किंअ, मए अवरम्पि सुमरिदं (२) ।

अन्यथा महादोष इति ज्ञातं भवतु । निष्कम्पदारुणा खलु कन्यका उपतापयति हृदयं मनुष्याणामीदृशी दुरभिग्रहेति मा भणिष्यथ, मदयन्तिकया कथितमिति । दुन्नावेदीत्यस्य दुन्नन्तीति संस्कृतानुवादः दूङो दूम इति प्राकृतप्रकाशसूत्रसम्मतः । प्रा, प्र, ८म, ८सू ।

(१) अयि असावधाने! असम्बद्धलोकप्रवादमोहिते! अपैहि, न त्वया सह किमपि मन्त्रयितव्यं ।

(२) सखि! प्रसीद, प्रसीद, न यूयमस्फुटभणान्यभिधत्थ । किञ्च वयं सत्यमेव माधवैकमयजीवलोकां मालतीं खलु न जानीमः? केन वा कठोरकेतक-

Digitized by Google

लवं । किं दाणिं अवरं ? ।

मद । जं क्खु मम तस्स जीविदप्पदाइणो महाणुभावस्स चेअणा-पडिलम्भ-पिअ-णिवेदिआए मालदीए, भअवदी-विअड्ढ-वअणोवण्णास-बोधिदेण, हिअअं जीविदं अ माहवेण पारितोसिअत्तणेण सअंगाहसाहसे णिउत्तं । अहअ, लवङ्गिए ! तहिं तुए ज्जेव भणिदं, पडिच्छिदो क्खु णो पिअसहीए अअं पसादोत्ति (१) ।

लवं । आं सहि ! कदमो उण महाभाओत्ति विसुमरिदं मए (२) ।

मद । सहि ! सुमर, सुमर, जेण तस्सिं दिअसे विकट-दुट्ठस-हूलावदेस-काल-गोअरं गदा असरणा, तक्कालसण्णिहिदेण जीवि-दप्पदाइणा पीअर-भुअत्तम्भ-सम्भाविद-णिक्कारण-बान्धवेण सअ-

---

गर्भविभ्रमावयवदौर्बल्यनिर्व्यर्त्तितसुन्दरत्वविशेषं, माधवस्वहस्तनिर्म्मितवकुलावली-विरचितकण्ठावलम्बमात्रसञ्जीवनं मालत्या, माधवस्य प्रभातचन्द्रमण्डलापाण्डुर-परिच्छामरमणीयदर्शनं न विभावितं शरीरं ? । किञ्च । तस्मिन् दिवसे कुसु-माकरोद्यानपर्य्यन्तरथ्यामुखसमागमे सविभ्रमोल्लसिनकौतूहलोत्फुल्ललोचनविलास-मदनसञ्चारचारुतारकाविराजमानविभ्रमा अनङ्गोन्मत्तायितसर्व्वाकारोपदेशनि-र्म्मितवैदग्ध्यामुग्धमधुरा, मयापि न निरूपिता, अनयोर्दृष्टिसम्भेदाः ? किञ्च, मम भ्रातुर्दानदत्तान्तं श्रुत्वा तत्क्षणोच्छ्वसितगम्भीरावेगव्यतिकराकारितस्फाय-मानदेहशोभयोरुद्वर्त्तमानमूलबन्धनमिव न लक्षितं हृदयं । किञ्च मयाऽपर-मपि स्मृतं ।

(१) यत्खलु मम तस्य जीवितप्रदायिनो महानुभावस्य चेतनाप्रतिलम्भ-प्रियनिवेदिकाया मालत्याः, भगवतीविदग्धवचनोपन्यासबोधितेन, हृदयं जीवितञ्च माधवेन पारितोषिकत्वेन स्वयंग्राहसाहसे नियुक्तं । अथच लवङ्गिके ! त्वयैव भणितं प्रतिष्ठितः खलु नः प्रियसख्या अयं प्रसाद इति ।

(२) सखि कतमः पुनर्महाभाग इति विस्मृतं मया ।

Digitized by Google

ल-भुवणेक्क-सार-णिअ-देहोवहारसाहसं कदुअ, परिरक्खिद-दहि, जेण अ दिढ-दाढा-विदारिअ-विअड-मंसलुत्ताण-परिणाहि-वक्खत्थल-लक्खणेण जरढ-जज्जरिद-जवापीड-हारिणा करुणेक्कमणेण मम किदे विसहिदा अतिदुट्ठ-सद्दुल-णहर-सिहावज्ज-प्पहारा, मारिदो अ सो दुट्ठसद्दूलो महारक्खसोत्ति(१)।

लवं । ज्जं, मअरन्दो ।

मद । सागदं । पिअसहि ! किं भणासि ।

लवं । णणु भणामि मअरन्दोत्ति । सस्पृहं । शरीरमस्याः स्पृशन्ती संस्कृतमाश्रित्य ।

वयं तथा नाम यदात्थ किं वदा-
म्ययञ्च कस्माद्विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विभुद्भसुग्धः कुलकन्यकाजनः ? ॥

मद । सलज्जं । सहि ! कीस मं उवहससि ? णं भणामि, णिव्वाबेहि मं तादिसस्स अप्प-णिरवेक्ख-ववसाइणो किदन्त-कवलिज्जन्त-जीविद-बलामोडिअ-पञ्चाणअण-गुरुदरोवआरिणो जणस्स संकधासु णाम-ग्गहण-सुमरणाइं अ, तधा अ, सो तुएवि, ग्गाढ-प्पहार-वेअणारत्त-विप्पारिद-सरीर-सङ्गलिद-सेअ-सलिलुप्पीलो मोह-मउलाअन्त-णेत्त-कन्दोट्ट-जुअलो भूमि-विगलि-

(१) सखि ! क्षार, क्षार, येन तस्मिन् दिवसे विकटदुष्टशार्दूलापदेशकालगोचरं गता अमरता, तत्क्षणसन्निहितेन जीवितप्रदायिना पीवरभुजस्तम्भसम्भावितनिष्कारणबान्धवेन सकलभुवनैकसारनिजदेहोपहारसाहसं कृत्वा, परिरक्षितास्मि, येन च दृढदंष्ट्राविदारितविकटमांसलोत्तानपरिणाहिवक्षस्थललाञ्छनेन जरठजर्जरितजवापीडहारिणा करुणैकमनसा मम कृते विसोढा अतिदुष्टशार्दूलनखरश्रिखावज्रप्रहाराः, मारितश्च, स दुष्टशार्दूलो महाराक्षस इति ।

Digitized by Google

दासि-लदा-विट्टम्भ-धीरत्तण-धारिद-सरीरो पच्चक्खीकदो ज्जेव, मदअन्तिआ-णिमित्त-मेत्त-विहडिअ-महा-महग्घ-जीवलोओ-महाभाओत्ति (१) । मदयन्तिका खेदादीन्विकारान्नाटयति ।

बुद्ध । ववसिदं पिअसहीए सरीरेण ।

मद । पिअसहि ! अवेहि, उव्विग्गाह्मि सहवासिणीए वीसम्भेण (२) ।

लवं । सहि मदअन्तिए ! अम्हेवि जाणिदव्वं जाणीमो, * ता पसीद, विरम ववदेसादो एहि वीसम्भ-गब्भ-कधाणुबन्ध-सरिसं सुहं चिट्ठम्ह (३) ।

बुद्ध । सोहणं लवङ्गिआ भणादि ।

मद । विधेअह्मि सम्पदं पिअसहीणं ।

लवं । जइ एवं ता कधेहि कधं णु दे कालोगच्छदित्ति ।

मद । णीसामेहि पिअसहि ! मम बुद्धरक्खिदा-परोक्ख-वाद-पच्चएण पढमं ज्जेव तस्सिं जणे अदिभूमिगदो अणुराओ । अवि अ । तस्सिं जणे अकिदुव्वरन्त-कोदूहलु-

(१) सखि ! किं मामुपहससि ? ननु भणामि, निर्वापयति च मां तादृशस्य आत्मनिरपेक्षव्यवसायिनः कृतान्तकवल्ल्यमानजीवितबलात्कारप्रत्यानयनगुरुतरोपकारिणो जनस्य, सङ्कथासु नामोपहसनस्मरणानि च; तथाच स त्वयापि, गाढप्रहारवेदनारम्भविस्मारितशरीरसङ्कलितखेदसलीलोत्पीडो, मोहमीलन्नेत्रकन्दोष्ठयुगलो भूमिविगलितासिलतावितम्भधैर्यधारितशरीरः, प्रत्यक्षीकृत एव, मदयन्तिकानिमित्तमात्रविच्छर्दितमहामहार्घजीवलोको महाभाग इति ।

(२) सखि ! अपैहि, उद्विग्नास्मि सहवासिन्या विस्रम्भेण ।

(३) सखि मदयन्तिके ! वयमपि ज्ञातव्यं जानीम एव, तत् प्रसीद, विरम व्यपदेशात् एहि विस्रम्भगर्भकथानुबन्धसदृशं सुखं तिष्ठामः ।

* जानीम इति कामन्दक्यादिद्वारा तव मकरन्दस्य च चेष्टितं ज्ञातमेव तत्कथमपह्नव इति भावः ।

Digitized by Google

क्कण्ठा-मणोरहं हिअअं आसि, तदो विधि-णिओअ-णिउत्त-दंसणा भविअ दुव्वार-दारुणाणङ्ग-दुःख-संदाविदुक्कण्ठिअ-चित्त-विहडन्त-जीविआ सम्भाविअच्छि,विअम्भिद-अपुव्व-सव्वङ्ग-संज्वलिद-मअण-ऊअबऊहाम-दूःसहाआसदुम्मणाअन्त-परिअणा पच्चाशा-विमोक्ख-मेत्त-सुलह-मरण-णिव्वाण-पडिउल-बुद्ध-रक्खिदावअण-वड्ढिदावेअ-व्वदूअर-विसंठुला दूमं जीअलोक-परिवत्तमणुभवामि, सङ्कप्प-सिविणन्तरेसु अ मणोरऊम्मादमोहिदा, पेक्खामि अ तं जणं, सोवि, पिअसहि! मुऊत्त-णिब्भूढ-विच्छाअ-विसंठुलुव्वेल्ल-वित्थरन्त-ललिद-णेत्त-पुण्डरीअन्त-तण्ड-वुब्भड-प्पारूढ-मैरेअ-मअ-घुणिअं विअ चिरं णिज्झाएदि मं। किंअ। कवलिदारविन्द-केसर-कसाअ-कण्ठ-कलहंस-घोस-घर्घर-खलिदं गम्भीर-भरिद-कसविवरं मं, पिए मदअन्तिए! एहित्ति, वाहरदि। अध अ। पप्फुरन्त-पओहरुच्छलदुत्तरीअंसुअञ्चलावलम्बण-परिभवेण ससम्भुत्तरङ्ग-धमधमाअन्त-हिअअं मं समुत्तासेदि, सहसा विसज्जिअंसुअप्पसरिदं, तक्खण-कठोर-कमल-दण्डाअमाण-वाऊ-बन्धणाबवारिअ-पओहर-रुग्गमं विहडन्त-विहड-मेहला-वलअ-सन्दाणिज्जन्त-पीवरूरु-पडिसिद्ध-विप्पदीव-गमणं,पडिऊल-वादिणीपि मं अच्चाअर-पअत्त-णिवत्तिअ-सुऊत्त-कोबोबराअ-दुःख-परुसीकिद-हिअअं, णिसिद्ध-पुणरुत्त-पल्लत्थ-लोअणविभाविदासेस-चित्तसारं, मं उवहसदि। द्विउणवाऊ-दंडावेठण-णिअन्तिदं, पिअसहि! परूढ-सदूल-कठोर-करोरुहोरप्पहार-विअड-पत्तावली-पसाहणुत्ताणव-च्छूत्थणिवेसणिट्ठुरणीसहं मं कदुअ सावेअविऊअमत्थआबद्ध-कवरी-णिहिद-कर-परिग्गहोवग्गिदणामिद-णिच्चलमुहावअव-

Digitized by Google

सच्छन्द-विकासिद-विअड्ढ-वअण-कमलोवामकपोल-मूल-चिर-णिहिद-पप्फुरन्त-पुञ्जिदाहर-समुग्गद-मणुहर-प्फंस-णिव्भरुल्लसिद-सरीर-सोहं, उल्लसिद-सच्चसाणन्द-विसमसम्भम-वलण-मोड-मन्थर-भमन्त-लोअणं, किम्पि दुव्विसहा-साहसाणुरूव-वसा-ओ मं अमावभत्थणीअं अभत्थेदि, समक्खं सव्वं अणुभविअ, तदो भत्ति सुसारअसरिसं पुणोवि मन्दभाइणी विभावेमि जीअलो-अन्ति (१)।

---

(१) निशामय, प्रियसखि ! मम तावद्बुद्धरक्षितापरोक्षपात (पक्षपात) प्रत्ययेन प्रथममेव तस्मिन् जने अतिभूमिं गतो ऽनुरागः। अपिच तस्मिन् जने भूतोद्भूतकौतूहलोत्कण्ठामनोरथं हृदयमासीत्, ततो विधिनियोगनिर्वृत्तदर्शना भूत्वा दुर्वारदारुणमदनदुःखसन्तापितोत्कण्ठितचित्तविघटमानजीविता सम्भावितास्मि, विजृम्भितापूर्वसर्वाङ्गसंज्वलितमदनज्वरोद्दामदुःसहायासदुर्मनायमानपरिजना प्रत्याशाविमोक्षमात्रसुलभमरणनिर्वाणप्रतिकूलबुद्धरक्षितावचनवर्द्धितावेगव्यतिकरविसंष्ठुला दूरं जीवलोकपरिवर्त्तमनुभवामि, सङ्कल्पसप्तान्तरेषु च मनोरथोन्मादमोहिता, पश्यामि तं जनं, स चापि, प्रियसखि ! मूहूर्त्तनिर्व्यूढविस्मयविसंष्ठुलोद्वेल्लद्विस्तार्यमाणरक्तनेत्रपुण्डरीकताण्डवोद्भटप्ररूढमैरेयमदघूर्णितमिव चिरं निर्ध्यायति मां। किञ्च। कवलितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरस्खलितगम्भीरभारती भरितकर्णविवरं मां प्रिये मदयन्तिके ! एहि, इति व्याहरति। अथच। प्रस्फुरत्पयोधरस्खलदुत्तरीयांशुकाञ्चलावलम्बनपरिभवेन सम्भ्रमोत्तरङ्गितमधमायमानहृदया मां समुल्लासयति सहसा विसर्जितांशुकप्रहृताश्च तत्कालकठोरकमलदण्डायमानबाहुबन्धनापवारितपयोधरोद्भां विघटमानविकलमेखलावलयसन्दानितपीवरोरुप्रतिषिद्धविप्रतीपगमनां प्रतिकूलवादिनीमपि मामत्यादरप्रयत्ननिवर्त्तितमुहूर्त्तकोपोपरागदुःखपरुषीकृतहृदयां निषिद्धपुनरुक्तपर्यस्तलोचनविभावितावेषचित्तसारां मामुपहसति, द्विगुणबाहुदण्डवेष्टननिपीडितां प्रियसखि ! पौढग्राढूलकठोरकररुहाक्रमणविकटपत्रावलीप्रसाधनोत्तानवक्षस्थलनिष्ठुरनिवेशनिःसहां मां कृत्वा, सावेगविधृतमल्लकाबद्धकवरीनिहितकरपरिग्रहपुञ्जीकृतोद्दामनिश्चलमुखावयवस्वच्छन्दविकाशितविदग्धवदनकम-

Digitized by Google

लवं। विहस्य। सहि मदअन्तिए! फुडमाचक्खेहि, अथ तस्मिं अवसरे सिणेहविब्भमुम्मीसहास-विअसन्त-बुड्ढरक्खिदालोअणात् णिरूविदं, परिअणादो गोअणीज्जं, दे आसणमचूलअं सअणीअपक्कदवटोवारिदं होदि किंवा ण वेत्ति ? (१)।

मद। अदू असम्बद्धपरिहासशीले! अवेहि ण तुए सह-मन्तिअं।

बुद्ध। सहि मदअन्तिए! मालदी पिअसहीज्जेव्व दूदिसादूं मन्तिदुं जाणादि।

मद। सहि! मा क्खु एवं मालदीं उवहस।

बुद्ध। सहि मदअन्तिए! पुच्छिस्सं दाणिं दे किम्पि, जदू ण वीसासभङ्गं करेसि (२)।

मद। सहि! पुणोवि पणअभङ्गेण किं कदापराहो अअं जणो जेण एवं भणेसि, पिअसहि, तुमं लवङ्गिआए समं सम्पदं मम हिअअं (३)।

लो वामकपोलमूलचिरनिहितप्रस्फुरितपुञ्जिताधरसमुद्गतमनोहरस्वर्गनिर्भरोद्गर्षितशरीरशोभां, सभयोल्लसितसाध्वसानन्दविषमसम्भ्रमवलनमोहमन्थरभ्रमल्लोचनां, किमपि दुर्विनयसाहसानुरूपव्यवसायोत्तमनभ्यर्थनीयमभ्यर्थयति। प्रियसखि! समाश्वस्य सर्वमनुभूय ततो झटिति मुख्यारण्यसन्निभं पुनरपि मन्दभाग्या विभावयामि जीवलोकमिति। विअन्तिआ इति क्वचित्पृथक् पदा।

(१) सखि मदयन्तिके! स्फुटमाख्याहि, अथ तस्मिन्नवसरे स्नेहविभ्रमोन्मिश्रहासविकसद्बुद्धरक्षितालोचनात्, निरूपितं, परिजनगोपनीयत्वे आसनमचूठकं शयनीयप्रच्छदपटापवारितं भवति किं नवेति ?।

(२) सखि मदयन्तिके! प्रक्ष्यामीदानीं ते किमपि, यदि मे विश्वासभङ्गं न करोषि।

(३) सखि! किं पुनरपि प्रणयभङ्गेन कृतापराधोऽयं जनो, येनैवं भणसि, प्रियसखि! लवङ्गिकाया समं त्वं साम्प्रतं मे हृदयं।

Digitized by Google

बुद्ध। जइ दे कधञ्चि मअरन्दो पुणोवि दंसणपधं ओदरदि, तदो किं तुए कादव्वं ?।

मद। एक्केकावअव-णीसङ्ग-लग्गा-णिच्चलं चिरं लोअणे णिव्वा वइस्सं।

बुद्ध। अध सोवि मन्महबलक्कारिदो, कदंपजणणीं तुमं रुक्मिणीं विअ पुरुसोत्तमो सअंगाहसधम्मचारिणीं करेदि तदा का पउत्ती (१) ?।

मद। निःत्रस्य। कीस मं एत्तिअं आसासेध !।

बुद्ध। सहि ! कहेहि।

लवं। कधिदं ज्जेव्व हिअअआवेअसूअएहिं दीहणीसासेहिं।

मद। सहि ! काअहं इमस्स तेणज्जेव्व अत्ताणअं पणीकदुअ दुट्ठसद्दूलकवलादोकट्ठिदस्स तस्सज्जेव्व केरअस्स अत्तणो सरीरअस्स (२)।

लवं। सरिसं महाणुभावदाए।

बुद्ध। सुमारहसि एदं वअणं।

मद। कधं, दुदीअपरणाडिआविच्छेदपडहो ताडीअदि ; ता जाव णन्दणं णिवभवत्थिअ, सपाअपडणं अब्भत्थिअ मालदीए उवरि अणुऊलइस्सं (३)। इति उत्थातुमिच्छति।

मकरन्दो मुखमुद्घाट्य हस्तेन गृह्णाति।

---

(१) अथासावपि मन्मथबलात्कारितः, कन्दर्पजननीं त्वां रुक्मिणीमिव पुरुषोत्तमः स्वयंग्राहसधर्म्मचारिणीं करोति, तदा का प्रवृत्तिः ?।

(२) सखि ! काहमस्य तेनैवात्मानं पणीकृत्य दुष्टशार्दूलकवलादाकृष्टस्य तस्यैव कृत्यकरस्यात्मनः शरीरस्य।

(३) कथं द्वितीयप्रहरनाडिकाविच्छेदपटहस्ताड्यते, तत् यावत् नन्दनं निर्भृत्य सपादपतनं चाभ्यर्थ्य मालत्या उपरि अनुकूलयिष्यामि।

Digitized by Google

मद० । सहि मालदि ! विबुज्झसि । विलोक्य सहर्षं सबाष्पसम्भ्रमम् । अहो ! अयं ज्जेव्व किम्पि वट्टदि ।

मक० । रम्भोरु ! संहर भयं, क्षमते विसोढु-*

मुत्कम्पनं स्तनभरस्य न मध्यभागः ।

इत्थं त्वयैव कथितप्रणयप्रसादः,

सङ्कल्पनिर्वृतिषु संस्तुत एष दासः ।।

बुद्धरक्षिता मदयन्तिकामुखमुन्नमय्य संस्कृतमाश्रित्य ।

प्रेयान्मनोरथसहस्रवृतः स एष

सुप्तप्रमत्तजनमेतदमात्यवेश्म ।

प्रौढन्तमः कुरु कृतघ्नतयैकभद्र-

मुत्क्षिप्तमूकमणिनूपुरमेहि यामः ।।

मद० । सहि बुद्धरक्खिदे ! कहिं उण अज्जोहिं मन्तिदव्वं ।

बुद्ध० । जहिं पुव्वं ज्जेव्व मालदी ।

मद० । किं णिव्वुत्तसाहसा मालदी ? ।

बुद्ध० । अधर्दं, अयं च तुमं भणामि । का अहं इमस्स । इत्यादि पठति । मदयन्तिका अश्रूणि पातयति ।

बुद्ध० । महाभाग ! दिट्ठो क्खु अत्ता पिअसहीए ।

मक० । अत्यूर्जितं विजितमेव मया किमन्य-

दद्योत्सवः फलवतो मम यौवनस्य ।

यस्य प्रसादसुमुखेन समुद्गतेव

देवेन वान्धवधुरा मकरध्वजेन ।।

---

* विसोढुमित्यत्र विकारमिति क्वचित्पाठः । उत्कम्पनमित्यत्र उत्कम्पित-मिति क्वचित्पाठः ।

Digitized by Google

तदनेन पथद्वारेण विनिर्गत्य साधयामः * । निष्क्रान्ते परिक्रामन्ति ।

मक० । अहो! त्रिभुवनैकसञ्चाररमणीयता मार्गस्य । तथाहि सम्प्रति ।

प्रासादानामुपरि वलभीतुङ्गवातायनेषु
भ्रान्त्वाढक्तः † परिचितसुरागन्धसंस्कारगर्भः ।
माल्यामोदी मुखरुपचितस्कारकर्पूरवासो
वायुर्यूनामभिनवबधूसन्निधानं व्यनक्ति ।।

इति निष्क्रान्ताः सर्वे ।

मालतीमाधवे सप्तमोऽङ्कः ।

---

* साधयाम गच्छामः । प्रायेण ग्रन्थकाः साधिगमेः स्थाने प्रयुञ्जते इति वाहित्यदर्पणः ।

† भ्रान्ताढक्त इति पाठे आदौ भ्रान्तः पश्चादाढक्तः क्वचिच्च भ्रान्ताढक्त इति पाठोऽस्ति ।

Digitized by Google

अष्टमोऽङ्कः ।

ततः प्रविशति अवलोकिता ।

अव। वन्दिदा मए जाव णन्दणावासपडिणिउत्ता भअवदी, ता जाव मालदीमाहवसआसं ज्जेव्व गच्छामि। परिक्रम्य। णिवत्तिदगीह्मदिअहावसाणमज्जणा दीहिअतडसिलातलं अलङ्करेति, जाव उवसप्पिस्सं (१)। इति निष्क्रान्ता। प्रवेशकः।

ततः प्रविष्टौ मालतीमाधवौ अवलोकिता च।

माध। खगतं सनन्दं। वर्त्तते हि मन्मथप्रोढसुहृदो निशीथस्य यौवनश्रीः।

तथाहि। द्रलयति परिशुष्यत्प्रौढतालीव पाण्डु-
स्तिमिरनिकरमुद्यन्नैन्दवः प्राक्प्रकाशः।
वियति पवनवेगादुन्मुखः केतकीनां
प्रचलित इव सान्द्रो मन्दमन्दः परागः॥

तत्कथं वामशीलां मालतीमुपावर्त्तये*; भवत्वेवं तावत् प्रकाशं। प्रिये मालति! प्रत्यग्रसायन्तनस्नानविशेषशीतलामलभवतीं निदाघतापशान्तये विज्ञापयामि तत्क्रियमिति नित्यमन्यथैव मां सम्भावयसि?।

निश्चोतन्ते† सुतनु! कवरीविन्दवो यावदेते,
यावन्मध्यः स्तनयुगलयोर्नार्द्रभावं जहाति।

---

(१) वन्दिता मया तावन्नन्दनावासप्रतिनिष्टत्ता भगवती, तस्माद्यावन्मालतीमाधवसकाशमेव गच्छामि। एतौ निवर्त्तितग्रीष्मदिवसावसानमज्जनौ दीर्घिकातटशिलातलमलङ्कुरुतः। तद्यावदुपसर्पामि।

---

* उपावर्त्तये सन्मुखीकरोमि।

† निश्चोतन्ते स्रवन्ति क्षरन्तीत्यर्थः।

Digitized by Google

यावत्प्राग्द्रप्रतनुपुलकोद्भेदवत्यङ्कयष्टि-
स्तावद्गाढं वितर, सखदृश्यङ्कपालीं * प्रसीद ।।

अयि निरनुरोधे !

जीवयन्निव समूढसाध्वसस्वेदविन्दुरधिकक्षमपंतां † ।
वाञ्छरैन्दवमयूखपुञ्जितस्यन्दिचन्द्रमणिहारविभ्रमः ।।

अथवा, दूरे तावदेतत्, कथमालापसंविभागस्याप्यभाजनमयं जनो भवत्याः ।

दग्धं चिराय मलयानिलचन्द्रपादै-
र्निर्व्यापितस्तु परिरभ्य वपुर्न नाम ।
आमत्तकोकिलरुतव्यथिता तु हृद्या-
मद्य श्रुतिः पिबतु किन्नरकण्ठि! वाचं ।।

अव । उपसृत्य । अयि अणिव्वहणशीले ! जं दाणिं मुहुत्तं अदिट्ठमाहवा दुम्मणाअन्ती मम पुरदो भणासिः 'चिराअदि अज्जउत्तो, अवि णाम केच्चिरेण पेक्खिस्सं जेण विच्छद्दिआसेससद्धसा विसुमरिदणिमेसविग्घमवलोअअन्ती, एवं भणिस्सं, द्विउणावेट्टनपरिरम्भेण सम्भावएत्ति' सम्पदं तस्सिं दे अयं परिणामो (१) । मालती साक्षूयमिव तां पश्यति ।

(१) अयि अनिर्व्वहणशीले! यदिदानीं मुहूर्त्तमात्रान्तरितमाधवापि दुर्म्मनायमाना मम पुरतो भणसि, 'चिरयत्यार्य्यपुत्रः अपि नाम कियच्चिरेण प्रेक्षिष्ये, येन विच्छर्दिताशेषसाध्वसा विस्मृतनिमेषविघ्नमालोकयन्ती, एवं भणिष्यामि, द्विगुणावेष्टनपरिरम्भेण सम्भावये' इति; साम्प्रतं तस्मिंस्तेऽयं परिणामः । अनिर्व्वहणं आरब्धानुरूपसमाप्तिराहित्यं । तस्मिं दे इत्यत्र तस्मै दे इति पाठः सम्यक् ।

* अङ्कपालीं अङ्कप्रदेशं । अङ्कपालीं परीरम्भमितिवा ।

† समूढः सद्योजातः पुञ्जितोवा साध्वसस्वेदविन्दुर्यत्र । ससाध्वासश्रम इति क्वचित्पाठः ।

Digitized by Google

माध । स्वगतं । अहो ! भगवतीप्रधानान्तेवासिन्याः सर्व्वतोसुखं वैदग्ध्यं, अक्षयश्च सुभाषितरत्नकोषः । प्रकाशं । प्रिये ! सत्यमवलोकिता वदति ? । मालती तिर्य्यक्प्रेक्षणं चालयति ।

माध । ग्रापितासि मया लवङ्गिकावलोकितयोर्जीवितेन यदि वाचा न कथयसि ।

माल । नाहं किञ्चि जाणामि । इत्यर्द्धोक्तं लज्जां नाटयति ।

माध । अहो ! अनवसितार्थमन्यरस्य वचसश्चारुता । सहसा निरूप्य । अवलोकिते ! किमेतत् ? ।

वाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि, राजतएष यस्मिन् ।
गण्डूषपेयमिव कान्यसतं पिपासु-
रिन्दुर्निवेशितमयूखमृणालदण्डः ॥

अव । सखि ! किं दाणिं उच्छलिदवाहजोलमन्थरा रोदिसि (१) ।

मल । अनार्त्तिकं । केत्तिरं पियसहीए लवङ्गिआए असन्निधानदुःक्खमणुभविस्सं पउत्तिलम्भोवि से सुदुल्लहोत्ति (२) ।

माध । अवलोकिते ! किं नाम ? ।

अव । तुह ज्जेव सवधोवक्खासेण एसा लवङ्गिअं सुमरिअ, ताए पउत्तिणिमित्तं उत्तल्लहि (१) ।

---

(१) सखि ! किमिदानीमुच्छलितवाष्पोत्पीडमन्थरा रोदिषि । उच्छलितो बहुलीभवन् ।

(२) कियच्चिरं प्रियसख्या लवङ्गिकाया असन्निधानदुःखमनुभविष्यामि प्रवृत्तिलम्भोऽपि तस्या सुदुर्लभ इति ।

(३) तवैव सदृशोपन्यासेन एषा लवङ्गिकां स्मृत्वा, तस्याः प्रवृत्तिनिमित्तमुक्तास्यति ।

Digitized by Google

माध । नन्विदानीमेव मया कलहंसकः प्रहितः, प्रच्छन्नः सन्निपत्य नन्दनावासं प्रवृत्तिमुपलभस्वेति । सामंतं । अवलोकिते! अपि नाम बुद्धरचिताप्रयत्नः सफलोदर्क एव मदयन्तिकां प्रति स्यात् ? ।

अव । कुदोसन्देहो महाणुभावस्स ? महाभाअ ! पढमं ज्जेव सहूलणहरालङ्किदस्स मअरन्दस्स मोहविरामम्मि सवं णिवेदअन्तीए मअवदीए णिउत्तेण मअवदा मालदीए समं जीविदेण, पसादीकिदं हिअअं अदू कोवि तुमं मदअन्तिआलम्भेण सम्पदं वड्ढापदि, किं तस्स पारितोसिअं भविस्सदि ? (२) ।

माध । अनयानुयोक्तव्यमनुयुक्तोऽस्मि । हृदयमवलोक्य । इयमस्ति मालतीप्रथमदर्शनाभिषङ्गसाक्षिणः कामकाननालङ्कारस्य लक्ष्मीवतः केसरतरोः प्रसवमाला ।

प्रेम्णा मङ्गथितेति या प्रियसखीहस्तोपनीतानया,
विस्तारिस्तनकुम्भकुड्मलभरोल्लङ्घेन सम्भाविता ।
सम्प्राप्ते त्वथ पाणिपीडनविधौ मां प्रत्ययेत्यादृया
यामण्येव लवङ्गिकेत्यवगते सर्व्वस्वदायीकृता ॥

अव । सहि मालदि ! वल्लहा क्खु दे इअं वउलमाला, तदो अवहिदा भव, जधा एसा सहसं ज्जेव दाणिं परहत्थगदा ण भविस्सदित्ति (१) ।

---

(१) कुतः सन्देहोमहानुभावस्य ? महाभाग ! प्रथमनेव शार्दूलनखालङ्कृतस्य मकरन्दस्य मोहविरामसमये निवेदयन्त्यै मालत्यै भगवत्या नियुक्तेन भवता जीवितेन समं हृदयं प्रसादीकृतं यदि कोऽपि त्वां मदयन्तिकालम्भेन सम्भावयति वर्द्धापयति तदा किं तस्य पारितोषिकं भविष्यति ।

(२) सखि मालति ! वल्लभा खल्वियं ते वकुलमाला, ततोऽवहिता भव, इदानीमप्येषा सहसैव परहस्तगता न भविष्यतीति ।

Digitized by Google

माल । पिअं पिअसही मे उवट्ठिससि ।

अव । कधं पट्ठसहीविअ ।

माध । नेपथ्याभिमुखमवलोक्य । अये कलहंसकः प्राप्तः ।

माल । दिट्ठिआ वड्ढसि मदअन्तिआलम्बेण ।

माध । सहर्षं परिष्वज्य । प्रियं नः । आत्मनः कण्ठादवतार्य वकुलमालां ददाति ।

अव । णिव्वूढो खु भअवदीए सम्भावणाभारो बुद्धरक्खिदाए (१) ।

माल । सहर्षं । अम्हे पिअसही लवङ्गिआवि दीसदु ।

सर्वे उत्तिष्ठन्ति ।

ततः प्रविशन्ति संभ्रान्ताः कलहंसमदयन्तिकाबुद्धरक्षितालवङ्गिकाः ।

लवङ्गिका । परित्ताअदु परित्ताअदु महाभाओ, अद्धमग्गे खु णअररक्खिपुरुसाभिओओ मअरन्दस्स आदो, तदोत्तकाल मिलिदेण कलहंसएण सहिदा अम्हे अणुप्पेसिदाओत्ति (२) ।

कल । अधा दूदोसुद्धागदेहिं अम्होहिं महन्तो ओधकलकलो सुदो तधा तक्केमि अण्णम्पि पारक्कं बलं उवगदत्ति (३) ।

माल । अवलोइदे ! हद्धी ! हद्धी ! समकालंज्जेव हरिसुव्वेअसम्भेदो उवगदो (४) ।

---

(१) निर्व्यूढः खलु भगवत्याः सम्भावनाभारो बुद्धरक्षितायाः ।

(२) परित्रायतां परित्रायतां महाभागः, अर्द्धमार्गे खलु नगररक्षिपुरुषाभियोगो मकरन्दस्य आवत्तत्कालमिलितेव कलहंसकेन समं वयमस्मानुप्रेषिता इति ।

(३) यथा दूतोसुखागतैर्महान् युद्धकलकलः श्रुतोस्माभिस्तथा तर्कयामि अन्यदपि पारक्यं बलमुपगतमिति । पारक्यं परकीयं ।

(४) अवलोकिते ! हा धिक् ! हा धिक् ! समकालमेव हर्षोद्वेगसम्भेद उपगतः ।

Digitized by Google

माध। सखि मदयन्तिके! स्वागतमेवोहि; अनुगृहीतमस्माकं भवत्याः ननु स एवासौ, माभूत्परिभवोद्वेगः, किमित्यस्था भवती, एकाकिनो बन्धुभिरभियोग इति न किञ्चिदेतद्वयस्यस्य ।

पश्य । हरेरतुलविक्रमप्रणयलालसस्याग्रतो,

सएष भवति क्षणत्क्षरदरुग्रप्रचण्डः सखा ।
स्फुरत्करटकोटरस्खलितदानसिक्ताननद्विपेश्वरशिरःस्थितास्थिदलनैकवीरः * करः ।

तदहमपि विक्रमानुरूपं विलसन्तः प्रियसुहृदः प्रत्यनन्तरीभवामि । इति विकटं परिक्रामन् कलहंसकेन सह निष्क्रान्तः ।

अवलोकितावलम्बिकाद्वयरक्षिताः । अवि णाम अम्हाहदा पडिणिअत्तिस्सन्ति एदे महाणुभावो ? (१) ।

माल । सहिओ अवलोइदाउहरक्खिदाओ ! तुरिअं गदुअ भअवदीए दूअं वुत्तन्तं णिवेदेह; तुमम्पि पिअसहि लवङ्गिए! तुरिदं विण्णवेहि अज्जउत्तं अदु ताव तुम्हाणं अम्हे अणुकम्पणीआ तदो अप्पमत्ता परिक्कमेति (२) ।

निष्क्रान्ताअवलोकितावलम्बिकाद्वयरक्षिताः ।

माल । कहं णु आणीअदि लवङ्गिआ किं चिराअदि, कथं

(१) अपि नामानाहूताः प्रतिनिवर्त्तिष्यन्ते महानुभावाः ।

(२) अवलोकितावुद्धरक्षिते ! त्वरितं गत्वा भगवत्या दूतं वृत्तान्तं निवेदयतं, त्वमपि प्रियसखि लवङ्गिके ! गत्वा त्वरितं विज्ञापयार्य्यपुत्रं, यदि तावद्युष्माकं वयमनुकम्पनीयास्ततोऽप्रमत्ताः परिक्रामतेति ।

* स्फुरतः करटस्य गण्डस्थलस्य कोटरान्मध्यात् स्खलितेन च्युतेन दानेन मदजलेन सिक्ताननो योद्धिपेश्वरस्य गिरस्त्वादि ।

Digitized by Google

एत्तिआ वेला गमिअदुत्ति, भोदु, पिअसहि मदअन्तिए! पिअसहीए लवङ्गिआए पडिणिउत्तिमग्गमणुगमिस्सं (१)।

परिक्रामति।

मद। थावइं। फुरिदं क्खु वामेदरेण लोअणेण (२)।

उपविशति।

प्रविश्य। कपालकुण्डला। आः पापे! तिष्ठ।

मालती। सत्रासं। अज्जउत्तदुत्यङ्कीति। वाक्खलं नाटयति।

कपा। सक्रोधं। नन्वाक्रान्द, नन्वाक्रान्द।

त्वद्वत्सलः क्व स तपस्विजनस्य * हन्ता,
कन्याविटः पतिरसौ परिरक्षति त्वां।
श्येनावपातचकिता वनवर्त्तिकेव,
किश्चेष्टसे ननु चिरात्कवलीकृतासि!॥

यावत् श्रीपर्व्वतमुपनीय लवङ्गो लवङ्ग एनां निकृत्य दुःखमरणां करोमि। इति मालत्या सह निष्क्रान्ता।

मद। अहम्पि मालदीं ज्जेव्व अणुगमिस्सं। परिक्रम्य। पिअसहि मालदि! (३)।

प्रविश्य लवङ्गिका। सहि मदअन्तिए! लवङ्गिआ क्खु अहं।

मद। अवि सम्भाविदो तुए महाणुभाओ (४)।

---

(१) हा धिक् न श्रावते लवङ्गिका किं चिरायति, कथमेतावती वेला गम्यते इति, भवतु, प्रियसखि मदयन्तिके! प्रियसख्या लवङ्गिकायाः प्रतिनिवृत्तिमार्गमनुगमिष्यामि।

(२) स्फुरितं खलु वामेतरेण नयनेन। वामशब्देन दक्षिणाक्षणेनेति क्वचित्पाठः।

(३) अहमपि मालतीमनुगमिष्यामि प्रियसखि मालति!।

(४) अपि सम्भावितस्त्वया महानुभावः।

---

* तपस्विजनस्य अघोरघण्टस्य। विटः कामुकः।

Digitized by Google

लवं। णहि, णहि, सो क्खु उज्जाणवाडोवणिग्गमादो ज्जेव्व कलकलं सुणिअ, सावक्केवावविद्धविकटोरुदण्डणिब्भरं पधाविअ, पराणीअं पविट्ठो, तदो पडिणिउत्तस्सि मन्दभाइणी, सुणामि अ घरे घरे गुणाणुरागणिब्भरस्स पौरलोअस्स, हा महाणुभाव! हा माहव! हा मअरन्द! हा साहसिअत्ति! परिदेवणाओ, महाराओपि किल एदाणं मन्तिधीआणं विप्पलम्भवुत्तन्तं सुणिअ, सञ्जाअमच्छराधिक्खेवो, तक्खणाविसज्जिदपौढपाइक्कणिवहो चन्दादवेण सौहसिहरट्ठिदो पेक्खदित्ति मन्तीअदि (१)।

मद। हा हदस्सि! मन्दभाइणी।

लवं। सहि! मालदी उण कहिं?।

मद। सा क्खु पढमंज्जेव्व दे मग्गमवलोइदुं पसरिदा, पच्छादो अहं ण तं पेक्खामि। अवि णाम उज्जाणगहणे पविट्ठा भवे (२)।

लवं। सहि! तुरिदं अणेसत्ता। अदिकाअरा खो पिअसही दूमणिअं अवसरे अप्पाणं ण धारेदि। त्वरितं परिक्रम्य। सहि

(१) नहि, नहि, स खलूद्यानवाटोपनिर्गमादेव कलकलं श्रुत्वा, सावज्ञेनाघविद्धविकटोरुदण्डनिर्भरं प्रधाव्य परानीकं प्रविष्टः, ततः प्रतिनिवृत्तस्यापि मन्दभागिनी, शृणोमि च गृहे गृहे गुणानुरागनिर्भरस्य पौरलोकस्य, हा महानुभाव माधव! हा मकरन्द! हा साहसिक! इति परिदेवनाः; महाराजोऽपि किलैतयोर्मन्त्रिदुहितृयोर्विप्रलम्भवृत्तान्तं श्रुत्वा, संजातमत्सराधिक्षेपस्तत्क्षणविसर्जितप्रौढपदातिनिवहश्चन्द्रातपेन सौधशिखरस्थितः प्रेक्षत इति मन्यते।

(२) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रस्थिता, पश्चादहं न च तां पश्यामि। अपि नाम उद्यानगहने प्रविष्टा भवेत्।

Digitized by Google

मालदि! किं भणामि सहि मालदित्ति! (१)। इतस्ततः परिक्रामतः।

प्रविश्य प्रहृष्टः कलहंसकः। दिट्ठिआ कुसलेण अच्छो णिग्गदा समरसङ्कटदुग्गमादो। हीमाणहे! पेक्खामि विअ णिम्मल-गिरन्तरुच्छत-धौत-तरवारि-धारा-पडिफलिद-चन्द-किरणुज्जल-विदुरिल्ल-दंसणं, मद्द-लीला-कलिद-कामपाल-विअट-भुजदण्डा-विद्ध-इलहेला-विब्भलिदुद्देल्लदुहोलिद-कलिन्द-तणआ-सोत-सण्णिहं, विअट-विसङ्कलुप्पडिद-णिहअ-मन्द-मअरन्द-वहुअर-क्खोभ-विअड-पडिजोध-पडिवत्तगुग्गद-समत्थ-गअणङ्गणावआस-विअसत्कलकलं पारक्कबलसमूहं। अविअ। सुमरामि भीसण-भुअ-वज्ज-जज्जरिद-पञ्चराबसरिद-सुभडहत्थावलुत्त-विविहाउह-णिअह-घातिदासेअ-रिउ-सेणाहद-विअडापसार-पादुक्क-सूसु-मग्ग-सञ्चार-णिअत्तिद-विसम-समर-साहसं णाहमाहवं। अहो गुहाणुराओ णरन्दस्सु! अंहाणिं सोहसिहरट्ठिदावत्तिसप-डिहारविणओमग्गासपडिसमिद्धिरोहसङ्कडोवणीदे माहवम-अरन्दमुहचन्दे वारंवारं सञ्चारिदसिणिहलो अणो, कलहंस-आदो अभिजणं जाणिअ, णिवत्तिदमहग्घबद्धमाणो, प्फुरिद-मत्तूर-वेल्लक्क-मसी-मलिणिअ-मुहे भूरिवसु-णन्दणे मद्धरवअणो-वण्णासेण, किं दाणिं तुह्माणं भुअणाभोअभूसणेहिं महाणुभावेहिं अभिअणदंसणगुमाहिरासेहिं णवचन्द-दंसण-रमणीएहिं आमादुएहिं परितोसोत्ति पडिबोहिअ, गदो अब्भन्तरं राआ।

---

(१) सखि! त्वरितमन्विष्यावः। अतिकातरा नः प्रियसखी अस्मिन्नवसरे न धारयत्यात्मानं। सखि मालति! ननु भणामि मालतीति।

Digitized by Google

दूमेवि माहवमअरन्दा आअच्छन्ति । अहम्पि भअवदीए एदं वुत्तन्तं निवेदेमित्ति (१) । निष्क्रान्तः ।

ततः प्रविशतो माधवमकरन्दौ ।

मक० । अहो प्रेयसः सर्व्वपुरुषातिशायि निर्व्याजमूर्जितं तेजः । तथाहि । दोर्निष्पेषविशीर्णसञ्चय-* दलत्कङ्कालसुन्मग्नतः
प्राग्वीरानुपलभ्य तत्प्रहरणानाच्छिद्य विक्रामतः ।
उद्वेलन्नरिरुण्डखण्डनिकराकीर्णस्य, संखोदधे-
र्द्वैधाखण्डितपक्तिपङ्क्तिविकटः पन्थाः पुरस्ताद्भूत् ।।

माध० । नन्वप्यनुपयुक्तमेतत् ।

अद्यैवेन्दुमयूखखण्डखचितं पीतंनिशीथोत्सवे,
यैर्लीलापरिरम्भदायि दयितागण्डुषगण्डूषं मधु ।

(१) दिष्ट्या कुशलेन वयं निर्गताः समरसङ्कटदुर्गमात् । कौमारहरे ! प्रेक्षे इव निरन्तरोद्भूतधौततरवारिधाराप्रतिफलितचन्द्रकिरणोज्ज्वलितविकटदर्शनं, मदलीलाकलितकामपालविकटभुजदण्डाविद्धहलहेलाविकलितोद्वेल्लिततरङ्गसङ्क्षिन्नतनयास्रोतःसन्निभं विकटविश्लिष्टखड्गोत्पतितनिर्दयामन्दमकरन्दध्वजतिकरक्षोभविकलप्रतियोधपरिवर्त्तनोद्भूतसमस्तगगनाङ्गनावक्त्राङ्कलितकलङ्कं पारक्यबलसमूहं । अपिच स्खलामि भीषणभुजबलबलितपक्षरापरुतसुभटहस्तावलुप्तविविधायुधनिवहघातितारातिपरिपुसैन्यकृतविकटत्वरितापसारपदातिशून्यमार्गसञ्चारनिवर्त्तितविषमसमरसाहसं नाथमाधवं । अहो ! गुणानुरागो नरेन्द्रस्य, यदिदानीं सौधशिखरोत्तीर्णप्रतीहारविनयोपन्यासप्रतिग्रमितविरोधसंकटोपनीते माधवमकरन्दमुखचन्द्रे वारंवारं सञ्चारितस्निग्धलोचनः कलहंसकादभिजनं ज्ञात्वा, निवर्त्तितमहार्घगुरुबन्धुमानः प्रस्फुरन्मत्सरवैलक्ष्यमसीमलिनितमुखे भूरिवसुनन्दने मधुरवचनोपन्यासेन, किमिदानीं युवयोर्भुवनाभोगभूषणाभ्यामभिजनदर्शनगुणाभिरामाभ्यां नवचन्द्रदर्शनरमणीयाभ्यां जामातृभ्यां परितोष इति प्रतिबोध्य, गतोऽभ्यन्तरं राजा । एतावपि माधवमकरन्दावागच्छतः । अहमपीमं वृत्तान्तं भगवत्यै निवेदयामीति ।

* सञ्चयः सन्धिस्थानं ।

Digitized by Google

सम्प्रत्येव भवद्भुजार्गलगुरुव्यापारभग्नास्थिभि-
र्गात्रैस्ते कथयन्त्यसारविधुरान् प्रायेण संसारिणः ।।

स्मर्तव्यन्तु सौजन्यमस्य नरपतेः यदपराधिनोरप्यनपराधयोरिव * नौ कृतप्रसादमधिष्ठितवान्। तदेहि मालतीसमक्षमधुना मदयन्तिकायाः कलहंसेन रणदुत्तान्तं विस्मरतः कथ्यमानं श्रोतुमिच्छामि ।

अन्यच्च। कथयति त्वयि सस्मितमालतीचलितलोलकटाक्षपराहतं।
वदनपङ्कजमुल्लसितत्रपास्मितदृष्टि सखी नमयिष्यति।।

इति परिक्रामतः । अयमसावुद्यानवाटः ।

प्रविशतो माधवमकरन्दौ ।

माध । कथं शून्याएव प्रदेशाः ।

मक । वयस्य ! नूनमस्माद्यतिरेकोद्वेगपर्य्याकुलत्वादितस्ततः परिभ्रमन्त्य आत्मानमत्रैवोद्यानगहने विनोदयिष्यति, तदेहि पश्यावः । उभौ परिक्रामतः ।

सर्वं । सखि मदयन्तिए ! मालदि ! । सहसावलोक्य । दिट्ठिआ पुणोवि एदे भट्टाणुभाआ दीसन्ति (१) ।

मकरन्दमाधवौ । भवत्यौ क्व सा मालती ? ।

उभे । कुदो मालदी, पदमद्देण, अम्हे विप्पलद्धाओ मन्दभाइणीओ (२) ।

माध । कथं कथमपि, विध्वंसते † मे हृदयं, अतः समभिधीयतां ।

(१) सखि मदयन्तिके ! मालति । दिष्ट्या पुनरपि एते भट्टानुभावा दृश्यन्ते ।

(२) कुतो मालती, पदमद्वेष वयं विप्रलब्धा मन्दभागिन्यः ।

* यत्रापराधयोरप्याविष्कृतप्रसादमाचेष्टितमिति पाठान्तरं ।

† विध्वंसते स्थितिं न बध्नाति ।

Digitized by Google

मम हि कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे-
र्द्रवति हृदयमन्तस्तस्यतीवान्तरात्मा ।
स्फुरति हि खलु चक्षुः स्पष्टमेतच्च वामं,
वचनमिह भवत्योः सर्व्वथा वा हतोऽस्मि ।।

मद० । तदो क्खु दूदो णिग्गदे महाणुभावे, अवलोइदं बुद्धरक्खिदं भअवदीए सआसं पेसिअ, अप्पमत्तणिमित्तं अज्जउत्तं विण्णवेहिसि त्तमङ्किआ अणुप्पेसिदा, तदो उत्तम्भमाणाए ताए मग्गं अवलोइदुं अग्गदो परिट्ठिदा, पच्छादे अहं णअ तं पेक्खामि, तदो अच्छीहिं एत्थ विउअन्तराणि जाव विचुणिदाणि ताव तुम्हे दिट्ठेत्ति (१) ।

माध० । हा प्रिये मालति ! ।

किमपि किमपि प्राङ्के मङ्कलेभ्यो यदन्यद्
विरमतु परिहासस्तावदेतावता ते ।
कलयसि कलितोऽहं वल्लभे ! देहि वाचं,
भ्रमति हृदयमन्तर्विह्वलं, निर्दयासि ।।

उभे० । हा पिअसहि ! कहिं गदासि * ।

मक० । किमित्यविज्ञाय वयस्य ! वैक्लव्यमवलम्ब्यते ।

माध० । सखे! किं त्वमपि न जानासि माधवस्नेहदुःखितायास्याः कातर्य्यचेष्टितानि ।

---

(१) तदा खलु इतोनिर्गते महानुभावे बुद्धरक्षिता भगवतीसकाशं विसृज्य, प्रसादनिमित्तं विज्ञापयाम्यार्य्यपुत्रमिति लवङ्गिकामनुप्रेष्य, उत्ताम्यमानायास्तस्यामार्गमवलोकयितुमग्रतः प्रस्थिता, पश्चादहं न च तां पश्यामि, तत आवाभ्यामिह विहरन्तीभ्यां यावद्विटपान्तराणि विचितानि तावद्युवां दृष्टाविति ।

---

* निहआसीति क्वचित्पाठः ।

Digitized by Google

मक । अस्त्येतत्, किन्तु भगवतीपादमूलगमनमभ्यागङ्कते, तदेहि तत्र, तावत्प्रस्थावः ।

उभे । एवम्पि सम्भावीअदि ।

माध । एवं नाम भवतु । सर्वे परिक्रामन्ति ।

मक । विचिन्त्यात्मगतं ।

याता भवेद्भगवतीभवनं सखी नो
जीवन्त्यथैष्यति, नचेत्यभिशङ्कितोऽस्मि ।
प्रायेण बान्धवसुहृत्प्रियसङ्गमादि,
सौदामिनीस्फुरणचञ्चलमेव सौख्यं ।।

इति निष्क्रान्ताः सर्वे ।

इति मालतीमाधवे अष्टमोऽङ्कः ।

Digitized by Google

नवमोऽङ्कः ।

ततः प्रविशति सौदामिनी ।

सौदा । एषास्मि सौदामिनी, भगवतः श्रीपर्व्वतादुपेत्य पद्मावतीमुपसृत्य मालतीविरहिणः संस्तुतप्रदेशदर्शनासहिष्णोः स्थानं परित्यज्य, सहसुहृद्वर्गेण दृढद्रोणीशैलकान्तरप्रवेशं परिभ्रमतो माधवस्याधुनान्तिकमुपयामीति । भोस्तथाहमुत्पतिता यथा सकल एष गिरिनगरग्रामसरिद्रण्यव्यतिकरश्चक्षुषा परिक्षिप्यते । पश्चादवलोक्य । साधु, साधु ।

पद्मावतीविमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो विभर्त्ति ।
उत्तुङ्गसौधसुरमन्दिरगोपुराढ्-
संघट्टपाटितविसृक्वमिवान्तरोर्व्वं ।।

अपिच । सैषा विभाति लवणा * ललितोर्म्मिपङ्क्ति-
रम्भागमे जनपदप्रमदाय यस्याः ।
गोगर्व्भणीप्रियनवोलपमालभारि-
सेव्योपकण्ठविपिनावलयो विभान्ति ।।

अन्यतोऽवलोक्य । अयमसौ भगवत्याः सिन्धोर्द्दारितरसातलप्रायस्तटप्रपातः ।

यत्तत्य एष तुमुलो ध्वनिरम्बुगर्भ-
गम्भीरनूतनघनस्तनितप्रचण्डः ।

---

* सैषेति अध्ययनकालेऽनुभूतत्वात् प्रत्यभिज्ञा । लवणा लवणा नाम नदी । उत्पलो लवणविशेषः ।

Digitized by Google

पर्य्यन्तभूधरनिकुञ्जविजृम्भमाण-
हेरम्बकण्ठरसितप्रतिमानमेति । *

एताश्चन्दनाम्बुकर्णसरलपाटलप्रायतरुगहनाः परिणतमा-लूरसुरभयोऽरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्बजम्बूवनावनद्धान्धकारगुरुनिकुञ्जगभीरगह्वरोद्गारगोदावरीरवमुखरितविशालमेखलाभुवो दक्षिणारण्यभूधरान्, अयञ्च मधुमतीसिन्धुसम्भेदपावनो भगवान्भवानीपतिरपौरुषेयप्रतिष्ठः सुवर्णबिन्दुरित्याख्यायते । प्रणम्य ।

जय देव भुवनभावन ! जय भगवन्नखिलनिगमनिधे ! ।
जय रुचिरचन्द्रशेखर! जय मदनान्तक! जय जगदादिगुरो! ।।

गमनमभिनीय । अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्म्मदमुखरमयूरीसुक्तसंसक्तकेकः ।
शकुनिशबलनीडानोकहस्निग्धवर्ष्मा,
वितरति दृढदम्भा पर्व्वतः प्रीतिमच्चेतः ।।

अपिच । दधति कुहरभाजां मत्तभल्लूकयूना-
मनुरसितगुरूणि स्थानमभ्यूढतानि ।
शिशिरकटुकषायः स्थायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिस्यन्दगन्धः ।।

ऊर्ध्वमवलोक्य । कथं मध्याह्नः, तथाह्यद्य सम्प्रति
काश्मर्य्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते,
तीराम्रान्तकशिम्बिचुम्बिनमुखा धावन्त्यप घूर्णिकाः ।
दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं,
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुटाः ।*

* काश्मर्य्या गम्भार्याः, कृतमालमारग्वधदत्तमुद्गतपत्रं टीकते गच्छति ।

Digitized by Google

तङ्गवतु माधवमकरन्दावन्विष्य, यथाप्रस्तुतं सम्पादयामि ।

इति निष्क्रान्ता विष्कम्भकः ।

ततः प्रविशति माधवो मकरन्दश्च ।

मक । सकरुणं निःश्वस्य ।

न यत्र प्रत्याशामनुपतति नो वा रहयति,
प्रविच्छिन्नं चेतः प्रविशति च मोहान्धतमसं ।
अकिञ्चित्कुर्व्वाणाः पशव इव तस्या वयमहो
विधातुर्व्वामत्वाद्विपदि परिवर्त्तामह इमे ।।

माध । हा प्रिये मालति! क्वासि, कथमविज्ञाततत्त्वं झटिति पर्य्यवसितासि, नन्वकरुणे ! प्रसीद सम्भावय मां ।

प्रियमाधवे किमसि मय्यवत्सला ननु सोऽहमेव यमनन्दयत्पुरा ।
अयमुपगृहीतकमनीयकङ्कणस्तव मूर्त्तिमानिव महोत्सवः करः ।।

वयस्य मकरन्द! दुर्लभः पुनर्ज्जगति तावतः स्नेहस्य सम्भवः ।

सरसकुसुमच्छामैरङ्गैरनङ्गमहाज्वर-
श्चिरमविरतोन्माथी सोढः प्रतिक्षणदारुणः ।
तृणमिव ततः प्राणान्मोक्तुं मनो विधृतंतया,
किमपरमतोनिर्व्यूढं यत्करार्पणसाहसं ।।

अपिच । मयि विगलितप्रत्याशत्वाद्विधाहविधेः पुरा,
विकलकरणैर्मर्म्मच्छेदव्यथाविधुरैरिव ।

कोयष्टिकः कोवा इति ख्यातः पक्षीति जागद्वरी । तीरस्थोऽश्मन्तकोऽमकोला इति ख्यातः । आम्रातको वीरणं वेति कश्चित् । तस्य शिम्बिः शिखा । पूर्णिकाः पक्षिविशेषाः । पूर्णिका कुम्भीरभक्षिका इति कश्चित् । अश्मन्तयः शिंशपाश्च इति कोचित् । दात्यूहैः पक्षिभेदैः । तिनिशस्य अतिमुक्तकाख्यद्रुमस्य । क्षतमालं सुवर्णकमिति मालाङ्कः । कोयष्टिकाः टिट्टिभः ।

Digitized by Google

स्मरसि रुदितैः स्नेहाकूतं तथा व्यतनोदसा-
वहमपि यथाभूवं पीडातरङ्गितमानसः ।।

सावेगं । अहो नु खलु भोः !

दहति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुञ्चति चेतनां ।
उवलयति तनूमन्तर्दाहः करोति न भस्मसात्,
प्रहरति विधिर्मर्म्मच्छेदी न क्षन्तति जीवितं ।।

मक० । वयस्य माधव ! निरवग्रहं दहति दैवमिव दारुणो विवस्वान्, दृश्यञ्च ते शरीरावस्था, तदस्य पद्मसरसः परिसरे मुहूर्त्तमास्यतां । अत्र हि

उन्नालवालकमलाकरमाकरन्द-
निष्यन्दसञ्चलनमांसलगन्धबन्धुः ।
त्वां प्रीणयिष्यति पुरा परिवर्त्तमान-
कल्लोलशीकरतुषारजडः समीरः ।।

इति परिक्रम्योपविशतः ।

मक० । स्वगतं । भवत्वेवं तावदन्यतः प्रक्षिपामि । प्रकाशं । वयस्य माधव ! ।

एतस्मिन्मदकलमल्लिकाख्यपद्म-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
वाष्पाम्भःपरिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः * ।।

माधवः सोद्वेगमुत्तिष्ठति ।

---

* दृश्यन्तां कुवलयिनो भुवो विभागा इति क्वचित्पाठः ।

Digitized by Google

मक० । कथं प्रतिपत्तिशून्यमुत्थाप्यान्यतः प्रवृत्तः । निःश्वस्योत्थाय च । सखे ! प्रसीद । पश्य

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः,
पर्य्यन्तेषु * च यूथिकासुमनसामुज्जृम्भितं आलकैः ।
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनिह,
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्व्वितानीयते ।।

अपिच । जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः
शैलाभोगभुवो भवन्ति, ककुभः कादम्बिनीश्यामलाः ।
उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरित्स्रोतसा-
माविर्भूतशिलीन्ध्रलोध्रकुसुमक्षीरा वनानां ततिः ।।

माध० । सखे ! पश्यामि, किन्तु दुरालोकरमणीयाः सम्प्रत्यरण्यभूमयः तत्किमेतत् । साम्प्रं । अथवा किमन्यत्, ।

उत्फुल्लार्জ্জুन सर्জ্জवासितवहत्पौरस्त्यभञ्जानिल-
प्रेङ्खोलत्सवलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।
धारासिक्तवसुन्धरासुरभयः प्राप्तास्तएवाधुना
घर्म्मान्मोविनमागमव्यतिकरश्रीवाहिनो वासराः ।।

हा प्रिये मालति ! ।

तरुणतमालनीलबकुलोन्मदम्बुधराः,
शिशिरसमीरणावधूतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमतो-
र्म्मदकलनीलकण्ठकलहैर्मुखराः ककुभः ।।

शोकार्त्तिं नाटयति ।

मक० । कोऽप्यतिदारुणो दृष्टविपाकः सम्प्रति वयस्यस्य । साम्प्रं ।

---

* आसक्तवासमित्यत्र आरक्तवासमिति क्वचित्पाठः । प्राग्भारेषु शिखरेषु ।

Digitized by Google

मत्रा पुनर्व्वज्रमयेन कोऽपि विनोद आरब्धः । निश्वस्य । एवं पर्य्यवसितप्रायैव नो माधवं प्रति प्रत्याशा । सभयं विलोक्य । कथं प्रसुप्त एव । आकाशे । सखि मालति ! किमपरं निरनुक्रोशासि ।

अपहस्तितबान्धवे त्वया विहितं साहसमस्य तृणया ।
तदिहानपराधिनि प्रिये सखि ! कोऽयं करुणोज्झितक्रमः ।।

कथमद्यापि नोच्छ्वसिति; हन्त मुषितोऽस्मि दैवेन ।

मातर्मातर्दलति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्मन्ये तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति, कथं मन्दभाग्यः करोमि ।।

कष्टं भोः कष्टं !

बन्धुता हृदयकौमुदीमहो, मालतीनयनपूर्णचन्द्रमाः ।
सोऽयमद्य मकरन्दनन्दनो, जीवलोकतिलकः प्रलीयते ।।

हा वयस्य माधव ! ।

गात्रेषु चन्दनरसो दृशि शारदेन्दु -
रानन्द एव हृदये, मम यस्त्वमासीः ।
तत्त्वां निकामकमनीयमकाण्ड एव
कालेन जीवितमिवोज्झरता हृतोऽस्मि ।।

मूर्च्छति ।

अकरुण ! वितर स्मितोज्ज्वलां दृशमतिदारुण ! देहि मे गिरं ।
सहचरमनुरक्तचेतसं प्रियमकरन्दं, कथं न मन्यसे ।।

माधवः संज्ञां लभते ।

मक । सोच्छ्वासं । अयमचिरधौतराजपट्टरुचिरमांसलच्छविर्नव-जलधरस्तोयशीकरासारेण मे वयस्यं जीवयति, दिष्ट्या जगदुच्छ्वसितन्तावत् ।

Digitized by Google

माध। तत्कथमत्र विपिने प्रियावार्त्ताहरं करोमि। विलोक्य। साधु, साधु।

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलिततनुतरङ्गामुत्तरेण स्रवन्तीं ।
उपचितघनमाल-*प्रौढ़तापिच्छनीलः,
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ।।

सादरमुत्थाय उन्मुखः कृताञ्जलिः।

क्वचित्सौम्य ! प्रियसहचरं विद्युदालिङ्गति त्वा-
माविर्भूतप्रणयसुमुखाश्चातका वा भजन्ते ।
पौरस्त्यो वा सुखयति मरुत्साधु सम्भाव्यनाभि †
र्विष्वग्बिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ।।

आकर्ण्य। अयं प्रतिरवभरितकन्दरानन्दितोत्कण्ठकलकेका-
नुबन्धिना ऊर्ङ्कृतेन, मामनुमन्यते, यावदर्थये भगवन् जीमूत !

दैवात्यक्षेर्ज्जगति विचरन्निच्छया मत्प्रियाया-
दाख्यास्यादौ तदनु कथयेर्म्माधवीयामवस्थां ।
आश्वासन्तुर्न च कथयतात्यन्तमुच्छेदनीयः,
प्राणत्राणं कथमपि करोत्यायताख्याः स एकः ।।

सहर्षं। अहो ! प्रचलितस्तदन्यत्र सञ्चरामि। परिक्रामति। सकं। सोद्वेगं। कथमिदानीमुन्मादोपरागो माधवेन्दुमाक्रन्दति, हा तात ! हा अम्ब ! भगवति ! परित्रायस्व, परित्रायस्व। पश्य माधवावस्थां।

माध। द्विपदिकया सर्व्वतोऽवलोक्य। धिक् प्रमादः !।

---

* उपचितघनमाल इत्यत्र उपरिविघटमान इति क्वचित्पाठः।

† सम्भाव्यनाभिरित्यत्र संवादनाभिरिति क्वचित्पाठः।

Digitized by Google

नवेषु लोध्रप्रसवेषु कान्तिर्दृग्धः, कुरङ्गीषु गजेषु यातं ।
लतासु नम्रत्वमिति प्रमथ्य, व्यक्तं विभक्ता विपिने प्रियास्मिन् ।।

हा प्रिये मालति ! इति । मूर्च्छति ।

मक । सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमिव सहपांसुक्रीडनप्रौढसख्ये ।
प्रियजनविरहाधिव्याधिवेगं दधाने,
हृतहृदय ! विदीर्ण त्वं द्विधा न प्रयासि ।।

माध । आश्वस्योत्थाय । सुलभानुकारः खलु जगति वेधसो निर्म्माणसन्निवेशः, भवत्वेवं तावत् । ज्ञैः । अयमहं भोः प्रणिपत्य भूधरारण्यचारिणः सत्वान् विज्ञापयामि, ते मां मुहूर्त्तमवधानदानेनानुगृह्णन्तु ।

भवद्भिः सर्व्वाङ्गप्रकृतिरमणीया कुलबधू-
रिहस्थैर्दृष्टा, किं वा विदितमथवास्याः किमभवत् ।
वयोवस्थां तस्याः शृणुत, सुहृदो यत्र मदनः,
प्रगल्भव्यापारश्चरति हृदि मुग्धश्च वपुषि ।।

कष्टं भो ! ।

केकाभिर्नीलकण्ठस्थिरयति वचनं ताण्डवादुच्छिखण्डः,
कान्तामन्तःप्रमोदामभिसरति मदभ्रान्ततारश्चकोरः ।
गोलाङ्गूलः * कपोलं क्षुरयति रजसा कौसुमेन प्रियायाः,
कं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः ? ? ।।

अयञ्च । दन्तच्छदारुणिमरञ्जितकान्तदन्त-
मुन्नम्य चुम्बति वलीवदनः † प्रियायाः ।

---

* गोलाङ्गूलः श्यामसुखो वानरः ।

† वलीवदनो वानरः ।

Digitized by Google

काम्पिल्लक-*प्रसवपाटलगण्डपालि-
पाकारुणस्फुटितदाडिमकान्ति वक्त्रं ।

एषः प्रियतमास्कन्धविश्रान्तकरो रोहिणानोकहस्कन्धविश्रान्तकन्धरः करी कथमत्राप्यनवसरः ।

कण्डूकुड्मलितेक्षणामनुचरीं दन्तस्य कोट्या लिखन्,
पर्य्यायव्यतिकीर्णकर्णपवनैराक्षादिभिर्व्यीजयन्,
जग्धार्द्धेनवशल्लकीकिसलयैरस्याः स्थितिं कल्पयन्,
धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति ।

अयन्तु । नान्तर्व्वर्त्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं,
नासन्नात्मरसः करोति कवलान्यावर्त्तितैः ग्रैवलैः ।
दानज्यानिविषादमूकमधुपव्यासङ्गदीनाननो, †
नूनं प्राणसमावियोगविधुरस्तम्बेरमस्तम्यति ।।

अलमनेनायासितेन अन्यतः सञ्चरामि । विलोक्य । एष सानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीरकरटगर्जितध्वनिरपरो मत्तमातङ्गयूथपालः, प्रत्यग्रविकसितकदम्बसङ्गातसुरभिशीतलामोदबद्धलसम्बलितमांसलकपोलनिष्यन्दकर्दमितकषायकरटः, समुद्दलितकमलिनीखण्डविकीर्णपर्णकमलकेसरमृणालकन्दकोमलाङ्कुरमाहरन्, अनवरतप्रवृत्तकमनीयतालताण्डवप्रचलकर्णजर्ज्जरितजलतरङ्गवितततनीहारसमुद्गलकुररसारसं सरोऽवगाह्य, विहरति भवत्वेवमाभाषे । नागपते ! श्लाघ्ययौवनः खल्वसि, कान्तानुवृत्तिचातुर्य्यमप्यस्ति भवतः । सापवादं ।

---

* काम्पिल्लको रोचनाद्रुवृक्षः ।

† दानज्यान्या मदग्रोषणेन यो विषादस्तेन मूकानां मधुपानां व्यासङ्गेन दीनं शोच्यमानमाननं यस्य तथोक्तः । स्तम्बेरमो हस्ती ।

Digitized by Google

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः,
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्मे स्नेहादनरालवालनलिनीपत्रातपत्रं धृतं ॥

कथमवधीरणानीरसं व्रजति। हन्त मूढ एवास्मिन्वनेचरे वयस्यमकरन्दोचितं व्यवहरामि, हा वयस्य!।

धिगुच्छ्वसितवैश्रसं मम यदित्थमेकाकिनो,
धिगेव रमणीयतां त्वदनुभावभावाहते
त्वया सह न यत्क्षयाच्च दिवसः स विध्वंसतां
प्रमोदमृगतृष्णिकां, धिगपरत्र या मानुषे।

मक०। अये! उन्मादमोहान्तरितोऽपि सम्प्रत्ययं मां प्रत्यप्रतिकूलः, यतः कुतश्चिद्ब्रह्मकात्प्रबुद्ध एवास्य सहजस्नेहसंस्कारः, तदसन्निहितमेव मां मन्यते। पुरः स्थित्वा। एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः।

माध०। प्रियवयस्य! सम्भावय, परिष्वजस्व मां; प्रियान्तु मालतीं प्रति निराग्रः परिश्रान्तोऽस्मि। इति मूर्च्छति।

मक०। एवं सम्भावयामि जीवितेश्वरं। विलोक्य सकरुणं। हा कष्टं! आविर्भूतमत्यरिष्वङ्गोत्कण्ठ एव निश्चेतनो वृत्तस्तत्किमिदानीमाग्राव्यसनेन सर्व्वथैव मे नास्ति वयस्य इति परिच्छेदो युक्तः। हा वयस्य!।

यत्स्नेहसंज्वरवता हृदयेन नित्य-
मावज्ज्वेषु विनापि निमित्तयोगात्।
त्वय्यापदो गणयताभयमन्वभावि
तत्सर्व्वमेकपदएव मम प्रशान्तं।

Digitized by Google

सखे! वरं तावन्त एवातिक्रान्ता मुहूर्त्ताः, तथाविधमपि भवन्तं येषु चेतयमानमनुभूतवानस्मि, इदानीं तु;

भारःकायो, जीवितं वज्रकीलं* काष्ठाः शून्या निष्फलानीन्द्रियाणि।
कष्टः कालो मां प्रति त्वत्प्रयाणे, भ्रान्तालोकः सर्व्वतो जीवलोकः॥

तत्किं नु खलु माधवास्तमयसाक्षिणा मया भवितव्यमिति जीवामि? भवत्वमुष्मादेव गिरिशिखरात्पाटलावत्यां निपत्य, माधवस्य मरणाग्रेसरो भवामि। सकरुणं निर्दिश्य आलोक्य। कष्टं! भोः कष्टं!

तदेतदसितोत्पलद्युतिशरीरमस्मिन्मयू-
रमातिदृढपीडनैरपि न तृप्तिरालिङ्गनैः।
बहुल्लसितविस्मया वत निपीतवत्यः पुरा,
नवप्रणयविभ्रमाकुलितमालतीहृष्टयः॥

आश्चर्य्यमेकस्याचरमे वयसि तावतोगुणसमाहारस्य सन्निवेशः, कथमिवाभूत्। सखे माधव!।

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखं,
सञ्जातश्च घनाघनो जलधरः शीर्णश्च वायोर्बलात्।
निर्वृत्तश्च फलेग्रहिद्रुमवरो दग्धश्च दावाग्निना,
त्वं चूडामणितां गतश्च जगतः प्राप्तोऽसि सत्योर्ब्बुधं॥

विचिन्त्य। तत्परिष्वजे तावदेवं गतमपि वयस्यं, अर्थितश्चानेन सम्प्रत्येवायमर्थः। परिष्वज्य। हा वयस्य! विमलविद्यानिधे! गुणगुरो! मालतीस्वयंग्राहजीवितेश्वर! हा सौन्दर्य्यविनिर्ज्जितरतिरमणच्छाय! हा कामिनीहृदयमन्मथ! हा बान्धवपयोनिधिशरच्चन्द्र! हा कामन्दकीमकरन्दानन्दनसुखचन्द्र!

* वज्रकीलमित्यत्र वज्रशीलमिति क्वचित्पाठः।

Digitized by Google

माधव! अयमत्र ते जन्मान्यपश्चिमः पश्चिमावस्थां प्रापितो मकरन्द-बान्धवपरिष्वङ्गः, सएष मकरन्दो मुहूर्त्तमपि जीवतीति मैवं मंस्थाः।

आजन्मनः सहनिवासतया मयैव
मातुः पयोधरपयोऽपि समं निपीय ।
त्वं पुण्डरीकमुख ! बन्धुतया निरस्त-
मेको निवापसलिलं पिवसीत्ययुक्तं ।।

सकरुणं विमुच्य परिक्रम्य च । दूरमधस्तात्पाटलावती, भगवन् गौरीपते! प्रियसुहृदो यत्र मम तत्रैव सम्भवो भूयादमुत्र भूयोऽपि भूयासमनुसङ्गर इति । पतितुमिच्छति ।

प्रविश्य सहसा सौदामिनी । वारयित्वा । वत्स! अलं साहसेन ।

मक । विलोक्य । अम्ब, कासि ? किमहं त्वया प्रतिहतः ?

सौदा । आयुष्मन्, किं त्वं मकरन्दः ?

मक । सुअ, सएवास्मि मन्दभाग्यः ।

सौदा । वत्स! योगिन्यस्मि, मालत्याभिज्ञानञ्चावधारयामीति ।

वकुलमालां दर्शयति ।

मक । सौच्छ्वासं सकरुणं । अयि ! जीवति मालती ?

सौदा । अथ किं । वत्स! किमत्याहितं माधवस्य यदनिष्टं व्यवसितोऽसि ? अथ माधवः क्व ? ।

मक । आर्ये! तमहं प्रसुप्तमेव वैराग्यात्परित्यज्यागतः; तदेहि, तूर्णं सम्भावयावः । त्वरितं परिक्रामतः ।

माध । आश्वस्य । अयं प्रतिबोधित एवास्मि केनापि; नूनमस्याभिनवजीमूतजलवाहिनः प्रभञ्जनस्यानपेक्षितास्मदवस्थोऽयं व्यापारः ।

मक । दिष्ट्या पुनः प्रत्यापन्नचेतनो वयस्यः ।

Digitized by Google

सौदा। विलोक्य। सम्यदत्युभयोर्म्मालतीनिवेदितः शरीराकारः।

माध। भगवन् पौरस्त्यपवन!

भ्रमय जलदानम्भोगर्भान् प्रमोदय चातकान्,
कलय शिखिनः केकोत्कण्ठान् कठोरय केतकान्।
विरहिणि जने मूर्च्छां लब्ध्वा विनोदयति व्यथा-
मकरुण! पुनः संज्ञाव्याधिं विधाय किमीहसे ॥

मक। सुदृत्तमखिलजन्तुजीवनेन मातरिश्वना।

माध। देव वायो! तथापि भवन्तमेवं प्रार्थये।

विकसत्कदम्बनिकुरम्बपांशुना सह जीवितं वह मम प्रिया यतः।
अथवा तदङ्गपरिवासशीतलं मयि किञ्चिदीरय* भवाशु मे गतिः॥

कृताञ्जलिः प्रणमति।

सौदा। सुसमाश्वसितः खल्वभिज्ञानदर्शनस्यावसरः।

अञ्जलौ मालां मुञ्चति।

माध। साकूतविस्मयहर्षं। कथमियमस्माद्विरचिता प्रियायाः स्तनोत्सेददुर्ललितमूर्त्तिरनङ्गमन्दिरांगणवकुलप्रसवमाला। निरूप्य, सहर्षं। कः सन्देहः। तथाहि। स एवायमस्याः।

मुग्धेन्दुसुन्दरतदीयमुखावलोक-
हेलाविशृङ्खलकुतूहलनिश्चयाय।
दुर्न्यस्तपुष्परचनोऽपि लवङ्गिकाया-
स्तोषं ततान विषमग्रथितैकभागः॥

सहर्षोन्मादमुत्थाय। प्रिये मालति! दृश्यं वीक्ष्यसे। सकोपमिव। अयि मदवस्थानभिज्ञे!

प्रयान्तीव प्राणाः सुतनु! हृदयं ध्वंसतइव,
ज्वलन्तीवाङ्गानि प्रसरति समन्तादिव तमः।

---

* ईरयेत्यत्र अर्थयेति क्वचित्पाठः।

Digitized by Google

त्वराप्रस्तावोयन्न खलु परिहासस्य विषय-
स्तदक्ष्णोरानन्दं वितर मयि मा भूरकरुणा ।।

सर्वतो दृष्ट्वा सनिर्वेदं । कुतोऽत्र मालती । वकुलमालामुद्दिश्य । अयि प्रियाप्रणयिनि वकुलमाले ! उपकारिष्यसि यतः अतः स्वागतं भवत्याः ।

निष्प्रत्यूहं प्रियसखि ! यदा दुःसहाः सम्बभूवु-
र्दैन्योद्दाढ्यव्यसनगुरवो मन्मथोन्मादवेगाः ।
तस्मिन् काले कुवलयदृशस्त्वत्समाश्लेष एव
प्राणत्राणं प्रगुणनमभून्मत्परिष्वङ्गकल्पः ।।

सकरुणं निर्वर्ण्य ।

आनन्दस्निग्धमदनज्वरदीपनानि
गाढानुरागरसवन्ति तदा तदा च ।
स्नेहाकराणि मम मुग्धदृशश्च कण्ठे,
कष्टं स्मरामि तव तानि गतागतानि ।।

हृदये निधाय मूर्च्छति ।

मक० । उपसृत्य वीजयन् । समाश्वसिहि सखे ! समाश्वसिहि ।

माध० । आश्वस्य । मकरन्द ! किं न पश्यसि कुतोऽपि मालतीस्नेहस्य फललाभः, तत्कथं न मन्यसे किमेतदिति ।

मक० । वयस्य ! दृश्यमार्य्या योगेश्वरी अस्य मालत्यभिज्ञानस्य नेत्री ।

माध० । विलोक्य सकरुणं कृताञ्जलिः । आर्ये ! प्रसीद, कथय, जीवति मे प्रिया ? ।

सौदा० । वत्स ! समाश्वसिहि, समाश्वसिहि ; जीवति सा कल्याणिनी ।

Digitized by Google

माधवमकरन्दौ दृष्ट्वा उच्चैः । आर्ये! यद्येवं तत्कथय कथमेष वृत्तान्त इति ।

सौदा । पुरा करालायतने मालतीसुपरिरम्भघोरघण्टः करवालपाणिना माधवेन व्यापादितः ।

माध । सोद्वेगं । आर्ये! विरम, परिज्ञातो वृत्तान्तः ।

मक । क्व दूर्व ।

माध । सखे! किमन्यत् ? सकामा कपालकुण्डलेति ।

मक । आर्ये! अप्येवं ? ।

सौदा । एवं यथानिवेदितं वत्सेन ।

मक । कष्टं भोः कष्टं ! ।

कुमुदाकरेण मुरदिन्दुचन्द्रिका
यदि रामणीयकगुणाय सङ्गता ।
सुकृतं तदस्तु, कृतमस्त्वयं विधि-
र्यदकाण्डमेघवितति(र्व्य)यूयुजत् ।।

माध । हा प्रिये मालति ! कष्टमतिबीभत्समापन्नासि ।
कथमिव तदाभवस्त्वं कमलमुखि ! कपालकुण्डलाग्रस्ता ।
उत्पातधूमलेखाक्रान्तेव कला मृगधरस्य ।।
भगवति कपालकुण्डले !

निर्माणमेव हि तदा तव माननीयं,
मा पूतनात्वमुपगाः शिवतातिरोधि । *
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्द्ध्नि स्थितिर्न चरणैरवताडनानि ।।

सौदा । वत्स! अलमावेगेन।

---

* शिव इत्यवोधि शिवतामुपैति च पाठान्तरे ।

Digitized by Google

अकरिष्यदसौ पापमतिनिष्करुणैव सा ।
मा भविष्यमहं तत्र यदि तत्परिपन्थिनी ।।

माधवमकरन्दौ । प्रणम्य । अतिप्रसन्नमार्य्याचरणैः । तत्कथय, कथं पुनस्त्वमेवास्माकं बन्धुः ।

सौदा । श्वास्यथः खल्वेतत् । उत्थाय । दूयमिदानीमहं,

गुरुचर्य्यातपक्लान्तमन्त्रयोगाभियोगजां,
दूरमाक्षेपणीं विद्यामातनोमि शिवाय वः ।

इति समाधवा निष्क्रान्ता ।

मक । आश्चर्यमाश्चर्यं ! ।

व्यतिकर इव भीमश्यामसो वैद्युतश्च
क्षणमुपहतचक्षुर्दृष्टिमुत्क्षिप्य शान्तः ।

विलोक्य सभयं ।

कथमिह न वयस्यस्तत्किमेतत् । विचिन्त्य । किमन्यत् ।

प्रभवति हि महिम्ना स्वेन योगेश्वरीयं ।।

सवितर्कं । किमयमनर्थ इति सम्प्रति मुग्धोऽस्मि ।

अपिच । अशोकविस्मयमपस्मृतपूर्व्ववृत्त-
मुद्भूतनूतनभयज्वरजर्जरं नः ।
एकक्षणद्रुटितसङ्कटितप्रमोह-
मानन्दशोकशबलत्वमुपैति चेतः ।।

तदहमेव कान्तारगहने सहाम्राह्वर्गेण प्रविष्टां भगवतीमन्विष्य तस्या वृत्तान्तमेनं कथयिष्यामि । इति निष्क्रान्तः ।

इति मालतीमाधवे नवमोऽङ्कः ।

Digitized by Google

दशमोऽङ्कः ।



ततः प्रविशति कामन्दकी मदयन्तिका लवङ्किका च ।

कामं । साधु । हा वत्से मालति ! मदलङ्कारकारिणि ! क्वासि, देहि मे प्रतिवचनं ।

आजन्मनः प्रतिमुहूर्त्तविशेषरम्या-
ण्याचेष्टितानि तव सम्प्रति तानि तानि ।
चाटूनि चारुमधुराणि च संस्मृतानि,
देहं दहन्ति हृदयं च विदारयन्ति ।।

आकाशे । अपि च पुत्रि !

अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुट्मलाग्रं ।
वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमञ्जुजल्पितं तत् ।।

मदयन्तिकालवङ्किके । साधुमाकाशे । हा प्रियसखि ! सुप्रसन्न-
सुहृच्चन्द्रसुन्दरि ! क्वहिं गदासि, को वा सिरीसकुसुमसुउमारस्स दे सरीरस्सायं दैव्वदुव्विणयपरिणामो अकेल्लिआए उवगदो, महाभाअ माहव ! उपत्थिदत्थमिदमहुसवो दे जीअलोओ संवुत्तो (१) ।

कामं । सविशेषखेदं । हा वत्से !

---

(१) हा प्रियसखि ! सुप्रसन्नसुहृच्चन्द्रसुन्दरि ! क्व गतासि, कोवा शिरीष-कुसुमसुकुमारस्य ते शरीरस्यायं दैवदुर्विनयपरिणाम एकाकिन्या उपगतः, महाभाग माधव उपस्थितास्तमितमहोत्सवस्ते जीवलोकः संवृत्तः ।

Digitized by Google

अभिनवरागरसोऽयं भवतोः कृतकौतुकः परिष्वङ्गः ।
लवलीलवङ्गयोरिव नियतिमहावात्यया विहृतः ।।

सर्वं । सोदेगं । हृदास! वज्रमय सर्व्वथा निर्घृणोसि हृदय! (१)।

इति हृदयमाहत्य पतति ।

मद । सखि लवङ्गिके ! किं भणामि क्षणमेनमेकस्मिन् तावत् समाश्वसिहि (२)।

सर्वं । सखि ! किं करोमि, दृढवज्रलेपपिण्डवद्घृणिश्चलं मम जीवितं न मां परित्यजति (३)।

कामं । वत्से मालति ! अन्यतः प्रभृति वल्लभा ते लवङ्गिका, तत्किमेनामुज्झितजीवितां वराकीं नानुकम्पसे ।

दूयं हि । उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमससमुखी वर्त्तिः प्रदीपशिखया यथा ।।

कथं कल्याणि ! कामन्दकीं जहासि, मन्मकरन्दे ! मदीय-जीवरोधिन्येव ते प्रगुणीकृतान्यङ्गानि ।

स्वान्यत्यागात्प्रभृति सुसुखीदन्तपाञ्चालिकेव,
क्रीडायोगं तदनु विनयं प्रापिता वर्द्धिता च ।
लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव,
स्नेहो मातुर्न्मयि समधिकस्तेन युक्तस्तवापि ।।

सर्वैकाग्र्यं । चन्द्रमुखि ! संप्रति निराशास्मि ।

---

(१) हा हताश ! वज्रमय सर्व्वथा निर्घृणमसि हृदय ! ।

(२) सखि लवङ्गिके ! ननु भणामि क्षणमात्रमपि तावत् समाश्वसिहि ।

(३) सखि ! किं करोमि, दृढवज्रलेपप्रतिबद्धनिश्चलं मम जीवितं न मां परित्यजति ।

Digitized by Google

अकारणक्षोरमनोहरानन:,
शिखालसाटार्पितगौरशेखरः ।
तवाङ्गगामी परिरक्षणाभ्यया,
मया न दृष्ठ स्तनयः स्तनन्धयः ।

लवं । भअवदि ! पसीद, णीसहस्सि सम्पदं जीवणुच्छहणे, ता दूमादो गिरिसिहरादो अत्ताणअं अवधुणिअ णिव्वुदा भविस्सं, तथा मे भअवदी आसिप्पसादं करेदु, जेण जम्मान्तरेवि पिअसखीं पेक्खिस्सं (१)

कामं । ननु लवङ्गिके ! कामन्दक्यापि नातः परं वत्साविवियोगेन जीवितव्यं, समवायमुत्कण्ठावेग आवयोः ।

किञ्च । सङ्गमः कर्मणां भेदाद्यदि न स्यादनागमः ।
प्राणानान्तु परित्यागे, सन्तापोपरमः कुतः ॥

लवं । अहा तुल्ले आणवेध । उत्तिष्ठति ।

कामं । सदयंवीक्ष्य । वत्से मदयन्तिके !

मद । किं आणवेध: आग्गेसरी होदुत्ति, ता आव अवहिदम्हि ।

लवं । सहि ! पसीद. विरम एत्तो अत्तणो वावादणादो, मा एदं जणं विसुमरेसि (२)

मद । सकोपमिव । अवेहि, णत्थि दे वसंवदा (३)

कामं । स्वगतं । कष्टं ! निश्चितं वराकया ।

---

(१) भगवति ! प्रसीद, निःसहास्मि साम्प्रतं जीवनोद्दहने, तदस्माद्गिरिशिखरादात्मानं पातयित्वा निर्वृता भवेयं, तथा मे भगवती आशीःप्रसादं करोतु, येन जन्मान्तरेऽपि प्रियसखीं प्रेक्षिष्ये ।

(२) सखि ! प्रसीद, विरम एतस्मादात्मनो व्यापादनात्, नैनं जनं विस्मरिष्यसि ।

(३) अपैहि, नास्ति ते वशंवदा ।

Digitized by Google

मद । सगतं । णाह मअरन्द ! णमो दे णमो (१)

लवं । भअवदि ! अअं ज्जेव मधुमदीसोत्तसन्दाणिअपवित्त-मेहलो महीहरविअङ्को (२)

कामं । ज्ञातमिदानीं प्रस्तुतान्तरायेण । सर्व्वः पतितुमिच्छन्ति ।

नेपथ्ये । आश्चर्यमाश्चर्यं ! !

व्यतिकर इव भीमस्तामसो वैद्युतश्च,
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः ।

कामं । विलोक्य । साक्षूतहर्षं ।

पुनर्नेपथ्ये । कथमिह न वयस्यस्तत्किमेतत्

प्रविश्य मकरन्दः । —किमन्यत्,

प्रभवति हि महिम्ना स्वेन योगेश्वरीयं ।

नेपथ्ये । कथमतिदारुणो जनसम्बन्धो वर्त्तते ।

मालत्यपायमधिगम्य विरक्तचेताः,
सर्वासारिकेषु विषयेषु च जीवितेषु ।
निश्चित्य वह्निपतनाय, सुवर्णबिन्दु-
मभ्येति भूरिवसुरित्यधुना हताः स्मः ।

मद । लवङ्किके ! मालदीमाहवाणं दंसणमङ्गलओ झत्ति अन्नाहिदं अ (३)

कामन्दकीमकरन्दौ । सहर्षं । हा धिक्कष्टमाश्चर्यमाश्चर्यं ! ।

किमयमसिपत्रवन्मरुच्छटासारयोर्युगपदवपातः,
अनलस्फुलिङ्गकलितः किमयमनघः सुधावर्षः ।

---

(१) नाथ मकरन्द, नमस्ते नमः ।

(२) भगवति ! अयमेव मधुमतीस्रोतःसन्दानितपवित्रमेखलो महीधरविटङ्कः ।

(३) मालतीमाधवयोः सन्दर्शनमङ्गलओ झटित्यन्याहितञ्च ।

Digitized by Google

सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसञ्छेदं,
अद्य विधिरग्निमग्नधरमयूखसञ्चलनमनुकुरुते ॥

नेपथ्ये। हा तात! विरम, दर्शनोत्सुकास्मि ते वदनकमलस्य, प्रसीद, सम्भावयेहि मां। कथं मम कारणाद्दो समस्तलोकालोकान्तरालविख्यातनिर्व्याजकुलैकमङ्गलप्रदीपभूतमात्मानं परित्यजसि, मया पुनरनर्थया निरनुक्रोशा यूयमिति सम्भावितमासीत्(१)।

कामं। हा वत्से! जन्मान्तरादिव पुनः कथमपि लब्धासि, भीरु! यावदयं उपरागदूषितशशिकलां कवलयितुमुपस्थितोऽनर्थः।

लवं। हा पियसहि!

ततः प्रविशति प्रसुप्तां मालतीं धारयन्माधवः।

माध। कष्टं भोः कष्टं!

एषा प्रवासं कथमप्यतीत्य, यातापुनः संप्रयमन्यथैव।
का नाम पाकाग्निमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे ॥

मक। सहसोपसृत्य माधवं प्रति। सखे! अथ सा योगिनी क्व?।

माध। श्रीपर्वतादहं सत्वरमापतितस्यैव सह सद्यः करुणवनेचरवचनादनन्तरं तां न पश्यामि।

कामन्दकीमकरन्दौ। सप्रणयमाकाशे। महाभागे! पुनरायास्, किमर्थमन्तर्हितासि।

मदयन्तिकालवङ्गिके। सहि मालदि! यं भणामि मालहिन्ति सोकरुद्धं। भअवदि परित्ताहि, चिरणिरुद्धणीसासणिरुद्धं-

(१) हा तात! विरम, दर्शनोत्सुकास्मि ते वदनकमलस्य प्रसीद संभावय मां। कथं मम कारणात् समस्तलोकालोकान्तरालविख्यातनिर्व्याजकुलैकमङ्गलप्रदीपभूतमात्मानं परित्यजसि मया पुनरनर्थया निरनुक्रोशा यूयमिति सम्भावितमासीत्।

Digitized by Google

से हिअअं । हा अमच्च ! हा पिअसहि ! दुवेवि तुम्हे परप्परावसाणस्स कारणं आदो (१)

कामं । हा वत्से मालति !

माध । हा प्रिये !

मक । हा प्रियसखि ! सर्वं मोहमुपगम्य संज्ञां लभस्व ।

कामं । ऊर्ध्वमवलोक्य । तत्किमेष झटिति पाद्यमानादिवास्रुदादस्रुनिवहः परिस्रवन्नस्माग्रीणाति ।

माध । सोच्छ्वासं । अये प्रत्यापन्नचेतना मालती । तथाह्यस्याः

भवति विततश्वासा नासा, प्रसन्नपयोधरं
हृदयमपि च स्निग्धं, चक्षुर्निजप्रकृतौ स्थितं ।
तदनुवदनं मूर्च्छाच्छेदात्प्रसादि विराजते ।
परिगतमिव प्रारब्धोऽङ्कः श्रिया सरसीरुहं ।।

नेपथ्ये । अविगणय्य कृपं सहनन्दनश्चरणयोर्नतमग्निमुखे पतन् ।
सपदि भूरिवसुर्विनिवर्त्तितो मम गिरा गुरुसम्भ्रमविस्मयः ।।

माधवमकरन्दौ । ऊर्ध्वमवलोक्य सविस्मयं । भगवति ! दिष्ट्या वर्द्धसे ।

सा योगिन्यम्बरतो विघटितजलदाच्युपैत्ययं यस्याः ।
वागमृतजलासारो जलदजलासारमतिशेते ।।

कामं । प्रियं नः प्रियं ।

मालत्यादयः । दिट्ठिआ पच्चुज्जीविदत्ता * ।

---

(१) सखि मालति ! ननु भणामि सखि मालतीति । भगवति ! परित्रायस्व, चिरनिरुद्धनिश्वासनिःस्वरमस्या हृदयं । हा अमात्य ! हा प्रियसखि ! द्वावपि युवां परस्परावसानस्य कारणतां यातौ ।

---

* पच्चक्खीकदत्ता इतिक्वचित्पाठः ।

Digitized by Google

कामं । सहर्षं सबाष्पञ्च । एह्येहि पुत्रि !

माल । कधं भअवदी । पादयोः पतति ।

कामं । उत्थाप्यालिङ्ग्य मूर्द्धन्याघ्राय ।

एहि जीवितसमाय जीवितं देहि, जीवतु सुहृज्जनश्च ते ।
अङ्कैस्तुहिनसङ्कशीतलैः पुत्रि ! मां प्रियसखीञ्च जीवय ।।

माध । वयस्य मकरन्द ! सम्प्रत्युपादेयो जीवलोकः संवृत्तः ।

मक । सहर्षं । एवमेतत् ।

मदयन्तिकालवङ्गिके । पिअसहि ! मणोरहान्तरिद्दंसणे ! सम्भावेहि अच्चो परिस्सङ्गेण (१) ।

माल । हा पिअसहिओ ! । उभे आलिङ्गतः ।

कामं । वत्सौ ! किमेतत् ।

माधवमकरन्दौ । भगवति !

कपालकुण्डलाकोपदुर्जातजनितापदः ।
वयमप्युद्धृताः कृच्छ्रात् निर्ब्बन्धेनार्य्ययानया * ।।

कामं । कथमघोरघण्टबधविजृम्भितमेतत् ।

मद । लवङ्गिके ! अच्चरीअं ! पुनरुत्तदारुणस्स परिणामरमणीअं विहिणो विलसिदं (२) ।

प्रविश्य सौदामिनी । उपसृत्य । भगवति कामन्दकि ! स एष वश्चिरन्तनोऽन्तेवासिजनः प्रणमति ।

कामं । अये भद्रा सौदामिनी ।

---

(१) मनोरथातिवृत्तदर्शने ! सम्भावयास्मान् परिष्वङ्गेण ।

(२) अहो आश्चर्यमाश्चर्यं ! पुनरुत्तदारुणस्य परिणामरमणीयं विधेर्विलसितं ।

---

* अनया सौदामिन्या । निर्ब्बन्धेनातिप्रयत्नेन ।

Digitized by Google

माधवमकरन्दौ। सविस्मयं । कथमियं भगवत्याः पक्षपातस्थानं जाता शिष्या सौदामिनी तत्सर्वमधुना सङ्गच्छते ।

कामं । एह्येहि भूरिवसुजीवितदानपुण्य-
सम्भारधारिणि ! चिराय मयासि दृष्टा ।
दत्तप्रमोदमपि नन्दय मे शरीर-
मालिङ्ग्य सौहृदनिधे ! विरम प्रणामात् ।।

अपिच । वन्द्या त्वमेव जगतां स्पृहणीयसिद्धि-
रेवंविधैर्विलसितैरतिबोधिसत्वैः ।
यस्याः पुरा परिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालिविजृम्भितं ते ।।

मदयन्तिकालवङ्किके । इयं सा अज्जा सौदामिनी ।

भाव । वाढं इमाए खु भअवदीपक्खवादिणीए ! णिब्भच्छिअ कवालकुण्डलं अत्तणो अवसधं उवणीअ मं भअवदी निव्विसेसं समासासिदत्ति, किञ्च केसरावलोअहिसाणट्ठआए इह आगन्तूण, सव्वे सन्धारिदा मरणादो, सा एसा जीविदप्पदादुत्ती सौदामिणी (१) ।

मदयन्तिकालवङ्किके । सुप्पसण्णा णो कणिट्ठा भअवदी (२) ।

माधवमकरन्दौ । अहो नु खलु भोः ! ।

अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते ।
इदं त्वकृतमन्येन कृतार्थ्यमचिन्तितं * ।।

(१) अनया खलु भगवतीपक्षपातिन्या, निर्भर्त्स्य कपालकुण्डलामात्मनोऽवसथमुपनीय, भगवतीनिर्विशेषं समाश्वासितास्मि, किञ्च केसरावलोकाभिज्ञानस्त्वया इहागत्य सर्वे सन्धारिता मरणात्, सैषा जीवितप्रदायिनी सौदामिनी ।

(२) सुप्रसन्ना नः कनिष्ठा भगवती ।

* इदं त्वचिन्तितं मन्ये कृतमार्यमार्येति क्वचित्पाठः ।

Digitized by Google

सौदा। सगतं। कष्ट! लज्जयति मामेवं सौजन्यमेषां। प्रकाशं। भगवति! एतत्प्रहृष्टनन्दनाभिनन्दितेन राज्ञा पद्मावतीश्वरेण भूरिवसोः प्रत्यक्षमभिलिख्यायुष्मतो माधवस्य प्रेषितं। इति पत्रमर्पयति।

कामं गृहीत्वा वाचयति। स्वस्त्यस्तु वः, परमेश्वरः समाज्ञापयति। यथा

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्वयेऽपि त्वयि
प्रत्यक्षव्यसने महीयसि परं प्रीतोऽस्मि जामातरि।
तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै तव प्रेयसे
मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते॥

माधवमुद्दिश्य। वत्स! श्रूयतां।

माध। श्रुतमिदानीं, सर्वतः कृतार्थोऽस्मि।

माव। दिट्ठिआ एत्ताहे अपहदं णो हिअअस्स आसङ्कासल्लं (१)।

सर्वं। सम्यदं निरवसेसं माहवसिरिणो मालदीए अ समं फलिदा मणोरहा (२)।

मक। पुरोऽवलोक्य। कथमवलोकितावुज्वरचिते कलहंसकेन सह सुप्रमोदं नृत्यन्त्यावित एवागच्छतः।

ततः प्रविशतोऽवलोकितावुज्वरचिते, कलहंसश्च। विविधं नृत्यं कृत्वा सर्वे उपसृत्य सप्रणामं कामन्दकीं प्रति। जअ भअवदि कज्जणिहाणे! माधवं प्रति। जअ मअरन्दणन्दण! माहव पुण्णचन्द! दिट्ठिआ वड्ढसि (३)। सहर्षं सर्वे सस्मितं पश्यन्ति।

(१) दिष्ट्या इदानीमपहृतं नो हृदयस्याग्रङ्काशल्यं।
(२) साम्प्रतं निरवशेषं श्रीमाधवस्य मालत्याश्च समं फलिता मनोरथाः।
(३) जय भगवति कार्यनिधाने! जय मकरन्दनन्दन! माधव पूर्णचन्द्र! दिष्ट्या वर्द्धसे।

Digitized by Google

लवं। को वा इमस्मिं परिपुरिदसव्वमङ्गसवे ण णच्चदि। (१)

कामं। एवमेतत्, अस्ति वा कुतश्चिदेवम्भूतं विचित्ररमणीयोज्ज्वलं महाप्रकरणं।

सौदा। इदमत्र रमणीयान्तरं यदमात्ययोर्भूरिवसुदेवरातयोश्चिरात्पूर्णोऽयमितरेतरापत्यसम्बन्धान्मनोरथः।

माल। सगतं। कहंविअ।

माधवमकरन्दौ। सकौतुकं। भगवति! अन्यथा वस्तुवृत्तमन्यथा वचनमार्य्यायाः।

लवं। जनान्तिकं। भअवदि! किं एत्थ पडिबज्झिदव्वं।(२)

कामं। सगतं। संप्रति मदयन्तिकासम्बन्धात् नन्दनोपग्रहात्प्रत्यस्तशङ्काः खलु वयं। प्रकाशं। वत्सौ, न खल्वन्यथा वस्तुवृत्तं, यतःश्रावकावस्थायामस्मत्सौदामिनीप्रत्यक्षमनयोर्वृत्तेयं प्रतिज्ञा अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य इति, प्रधानप्रकृतिकोपक्षेवं प्रतिहतः।

माल। अहो संवरणं।

माधवमकरन्दौ। साश्चर्यं। जयन्ति महतां विसंष्ठुला प्रतीपिन्यः* कल्याणिन्यो नीतयः।

कामं। वत्स माधव!

यत्प्रागेव मनोरथैर्वृतमभूत्कल्याणमायुष्मतो-
स्तत्पुण्यैर्मदुपक्रमैश्च फलितं क्लेशेऽपि मच्छिष्ययोः।
निष्णातत्व समागमत्व विहितस्वश्रेयसः कान्तया
सम्प्रीतौ वृषनन्दनौ, किमपरं श्रेयस्तदप्युच्यतां॥

(१) भगवति! किमत्र प्रत्येतव्यं।

(२) को वा अस्मिन् परिपूरितसर्व्वप्रकारमहोत्सवे न वृत्यति।

* प्रतीपिन्यः प्रतिकूला इव भासमानाः।

Digitized by Google

माध । सहर्षं प्रणमति । भगवति! अतोऽपि परं प्रियमस्ति, तथाप्यीदृशमस्तु, भगवतीप्रसादात् ।

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयन्तु वसुधां धर्म्मे स्थिताः सर्व्वदा ।
काले सन्तनवर्षिणो जलमुचः सन्तु स्थिराः पशवतो,
मोदन्तां घनबन्धुबान्धवसुहृल्लोकीप्रमोदाः प्रजाः ।।

कामं । एवमस्तु ।

इति निष्क्रान्ताः सर्व्वे । मालतीमाधवे दशमोऽङ्कः ।

समाप्तश्चेदं मालतीमाधवप्रकरणम् ।

Digitized by Google

अशुद्धशोधनम्।

अशुद्धम्	शुद्धम्	पृष्ठाया:	पङ्क्तौ
अवलोक्य	अवलोक्य	२	१०
तस्या:	तस्य	२	१६
वक्त	वक्त (एवमन्यत्र)	२	१८
विक्खेवो	विक्खेवो	८	५
पिण्डवाद	पिण्डवाद	८	६
ब्रुहि	ब्रूहि	८	१०
बौद्धानां	बौद्धानां	८	२२
ग्रासेन	ग्रासेण	१०	७
ज्ञतम्वेति	ज्ञतंवेति	१	१५
प्रवन्धे (वन्ध)	प्रवन्धे (वन्ध एवमन्यत्र)	१५	६
वलित (वल)	वलित (वल एवमन्यत्र)	२०	३
अवलम्वन	अवलम्भन	२२	७
वारम्वारं	वारंवारं	२	१०
विम्भम	विम्भम (म्भ-म्भ एवं सर्व्वत्र)	०	१०
मुहुत्त	मुहूत्त (एवमन्यत्र)	३३	१०
तधावि	तधावि	३४	४
संवेदिणो	संवेदिणो	४०	१
फुफरसे	फ्फरसो	४६	२
लिक्कणं	लिक्कनं	५१	२०
सवीभत्सं	सवीभत्सं	५५	१०
ब्राह्मी	ब्राह्मो	६६	१४
ग्टह्यामि	ग्टह्यतामि	६६	१७
वल्मित	वल्मीत	७१	२१

Digitized by Google

अशुद्धम्	शुद्धम्	पृष्ठाया:	पङ्क्तौ
घर्घरवा	घर्घरखा	७१	१५
श्चित्ताकर्षी	श्चित्ताकर्षी	७२	२
सिनेहमय-	सिनेहअ-	७२	११
स्नेहमयहमय	स्नेहमय	७२	२०
परिवद्धच्छि	परिवद्धच्छि	७५	५
विबुद्धा	प्रतिबुद्धा	७५	२२
व्यापादय	व्यापादय	७५	२२
-खेहिं	खेहिं वारसुन्दरीकदम्बेहिं	८०	६
सुकुमारोऽ न्यादृश	अन्यादृश	८७	१६
प्रियसख्या	प्रियसख्या दृष्टव्या	८७	२५
पासखड	पासखड	८६	२३
दच्छिदं	दंसिदु	६६	२
सखि	आं सखि	६८	२६
भरिद	भारदीभरिद	१०१	१२
गतोऽनुरागः	गतोऽनुरागः	१०२	६
भारती भरीत	भारती भरित	१०२	१८
वाड	वाड	१०२	२१
समक्खं	प्रियसहि! समक्खं अ	१०२	५
जनगोपनीयं	जनात गोपनीयं	१०३	२१
णिवत्तिद	एदे णिवत्तिद	१०७	४
-डूरेति	-डूरेन्ति	१०७	५
वढ्ढापदि	वड्ढाबेदि	११०	६
मा- खूर	मालूर	१२१	३
न्यप	न्यपः	१२१	२१
चुम्बिन	चुम्बित	१३१	२१

Digitized by Google